नं० ५४४९ — घ

रणवीरविजयः ज्योतिषम्

पत्राणि ७८

संपूर्णम्

नं० ५८४-६-घ

रणवीर विजयः (ज्योतिषम्)

पत्राणि १अर्द्ध ४=७८ (संपूर्णम्)

5449

अधिकृत्यस्यां पं॰ चक्रपाणि शर्म्मणः

अधिकृत्यस्य पं॰ चक्रपाणिशर्मणः

अधिकृत्यस्याँ पं॰ चक्र पाणि शर्मणः

Writter Dated = 10-7-70

{Name = Raghu Nandan Sharma}

(5)

ॐश्रीगणेशाय नमः ॥ गणेशं शिवं भास्करं रामचंद्रं मर्थ्यः ॥
नीप्रणम्याथ टीकां सुरम्याम् ॥ चमत्कारचिंतामणेर्दैववेत्तॄ
दीप्रबोधाय धर्मेश्वरः संब्रवीति ॥१॥ अथ लग्नकुंडलि
कायां जातकोक्तभावफलाफलज्ञानाय चमत्कारचिंता
मणिं विवक्षुर्नारायणाचार्यः पारीप्सितनिर्विघ्नपरि
समाप्त्यर्थं श्रीकृष्णप्रणामरूपं मंगलमाचरन् शिष्यशि
क्षाय निबध्नाति इत्यर्थः ॥ अत्रास्मिन्ग्रंथसमयप्रारंभस
मये नारायणाचार्योऽहं लसच्छोभि पीतवर्णपट्टांबरं यस्य
तं विद्युत्वात् घनं मेघमिव राधयालिंगितं कृष्णचंद्रमिवा
ह्लादकं श्रीकृष्णं प्रणम्य कायवाङ्मनोभिर्नत्वा चमत्कारचिंता
मणिनामानं ग्रंथं संप्रवक्ष्यते सम्यक्प्रकारेण रचयामीत्यर्थः ॥२॥
पुनर्बालगोविन्दभजनपूर्वकं पूर्वोक्तं मुकुन्दं प्रकटयति ॥

॥ ॐश्रीगणपतिर्जयति ॥ लसत्पीतपट्टां
बरं कृष्णचंद्रं मुदा राधयालिंगितं विद्युते
व ॥ घनं संप्रणम्याथ नारायणाख्यं चम
त्कारचिंतामणिं संवक्ष्ये ॥१॥ क्वणत्किं
प्र
किणीजालकोलाहलाढ्यं लसत्पीतवा
सोवसानं चलंतम् ॥ यशोदाङ्गणे यो
गिनामप्यगम्यं भजेऽहं मुकुन्दं घनश्याम
वर्णम् ॥२॥ चतुर्लक्षमाज्योतिर्महाबोधि
मुच्चैः श्रमध्येव विद्वज्जनानन्दहेतोः ॥
परं युक्तिरम्यं सुसंक्षिप्तशब्दं भुजंगप्रय
तैः प्रबंधं करोमि ॥३॥

क्वणतः शब्दायमानस्य किंकिणीजालस्य कटिबद्धक्षुद्र
घंटिकासमूहस्य कोलाहलेन रुणत्कारेणाढ्यं युतं तच्च
वं नतत्मानसं वा लसत्पीतवासोवसानं शोभमानं पीतां
बरं धारयंतं योगिनामप्यगम्यं प्राप्तुमशक्यमपि यशोदां
गणे चलंतं गच्छंतं घनवत् श्यामवर्णं कृष्णरूपं मुकुंदं अ
हं भजे योगिभिरप्राप्यं यशोदांगणे पर्यटंतं श्रीकृष्णं मन
सा स्मरामीति स्वमहद्भाग्यातिशयोक्तिः ॥२॥ अथ प्रयो
जनं ग्रंथं विक्तिनष्टि ॥ महान्बोधो ज्ञानं यस्मात्तच्चतुर्लक्ष
मितं ज्योतिषं ज्योतिःशास्त्रमुच्चैरेव श्रमध्येव सम्यक् विचा
र्य विद्वज्जनानां दैवज्ञानामानंदहेतोः सुखार्थं परं श्रेष्ठं यु
क्तिभिः पदलालित्यैः रम्यं सुन्दरं संक्षिप्तशब्दमबहुविस्तरं भु

...प्रजातैर्भुजंगप्रयातं भवेदैश्वतुर्भिरितिलक्षणकं भुजं
...प्रयाताख्यछन्दोभिः प्रबंधं चमत्कारचिंतामणिरूपंकरोमि
...लघुजीहापठैस्तोविलहइति पिंगलोक्तत्वाद्यपादेद्वितोभंगः शं
कनीयः चतुर्लक्षकं ज्योतिषं भूरिभेदमित्येवंवा प्रथमपादः पठ
नीयः ॥२॥ अथग्रहभावफलं कथयामीति प्रतिजानीते ॥

॥ नचेत्खेचराः स्यापितैः किं भचक्रे नचेत्स्पष्ट ॥
गाः स्यापितैः किं ग्रहैर्द्वैः ॥ अभावोदि ॥
ता स्पष्टिताकात्रहेतुः फलेरेव सर्वं ब्रुवे ॥
॥ तानितस्मात् ॥ ४ ॥

नेति भचक्रे स्याः खेचराः ग्रहानचेत्स्यापिते भचक्रे राशिमंड
लेकिन्नकिं चित्फलमित्यर्थः तथाग्रहा अपिस्पष्टगा दृग्ग
णितसाधितानचेत्स्यापितैर्ग्रहैर्द्वैः किं अभावोदिताभाव
स्पष्टीकृतं विनासाधिताग्रहस्पष्टतापिकाचनकिं चित्करे
त्यर्थः तस्मादादौस्पष्टाः खेचरालग्नादिभावाश्वसाध्याइ
ते इतिशेषः ॥ यतः फलैरेव जंतोः सर्वं ज्ञायते तस्मात्तानि
ग्रहभावफलानि ब्रुवे कथयामि ॥४॥ रः रैर रं रैं रंऽ ॥

॥ मूलम् ॥
॥ तनुस्योरविस्तुङ्गयष्टिं विधत्ते मनःसं
तपद्दारदायादवर्गात् ॥ वपुः पीड्यते वा
तपित्तेन नित्यं सवै पर्यटन् ह्रासवृद्धिं प्र
॥ याति ॥ १ ॥ ०ठः ॥ ०ठः ॥

तत्रादौ रवेर्लग्नादिभावफलानि कथयति ॥ यस्यतनु
स्थोलग्नस्थो रविस्तस्यतुंगयष्टिमुच्चस्वरूपं विधत्ते दारदा
यादवर्गात् स्त्रीपुत्रादिसमूहात् मनः संतपेत् संतापंप्राप्नु
यात् वातपित्तेन वायुयुतपित्तेन वपुः शरीरं पीड्यते ॥
तथा सपुरुषः पर्यटन् देशांतरंगच्छन् नित्यं निश्चितं ह्रास
वृद्धिं धनन्यूनाधिकत्वे प्रयाति प्राप्नोति ॥ १ ॥ अथद्विती
यभावस्थरविफलम् ॥ यस्यनरस्य लग्नभावकुंडलिका
याः धने लग्नाद्द्वितीयस्थाने भानुः सूर्यः सपुरुषोभाग्याधि
कः श्रेष्ठभाग्यैः स्यात् चतुष्पात्सुखं गजाश्वादिसौख्यंल
भेदितिशेषः ॥ चपुनः स्वंद्रव्यं सद्व्ययेयातिगच्छति धर्मा
दिविषये व्ययं कुर्यादितिभावः जायथानिमित्तम् तथा

कुटुंबे स्वबंधुविषये कलिः कलहो जायते भवेदित्यर्थः ॥
तथा लाभस्य हेतोः प्रागल्भ्यात्क्रियापि निष्फला याति कृतो
पि यात्नाद्युद्यमः स्वाहंकारेण निष्फलं स्यादित्यर्थः ॥ २ ॥
अथ तृतीयस्थरविफलम् ॥ जन्मकाले तृतीयो यदा अहर्म
णिः सूर्यस्तदा स पुरुषः प्रतापाधिको यस्मिन्नेतादृशं विक्रमं
पराक्रममातनोति ॥ च पुनः सोदरैर्भ्रातृभिस्तप्यते संतापमा
प्नुयात् ॥ तीर्थचारी तीर्थगमनशीलो भवेत् ॥ संगरे संग्रामे
सदा रिक्तयः शत्रुनाशस्तथा नरेशान्नृपात् शं कल्याणं स्यात् ॥ ३ ॥
अथ चतुर्थभावफलम् ॥ तुरीये सुखभावे दिनेशे सूर्ये वि
द्यमाने जनो मनुष्योऽतिशोभाधिकारो योऽधिकारो द्रव्यं
शं यद् एकमान्यतारूप तस्माद्धेतोर्बंधुतः स्वजनेभ्यः विग्र

॥ धने यस्य भानुः स भाग्याधिके स्याच्च
तुष्पात्सुखं सद्व्यये स्वं च याति ॥ कुटुं
बे कलिर्जायया जायते पि क्रियापि नि
ष्फला याति लाभस्य हेतोः ॥ २ ॥ तृतीये
यदाहर्मणिर्जन्मकाले प्रतापाधिकं वि
क्रमं चातनोति ॥ तदा सोदरैस्तप्यते
तीर्थचारी सदा रिक्तयः संगरे शं नरेशात् ॥ ३ ॥
तुरीये दिनेशेऽतिशोभाधिकारी जनः सं
लभेद्विग्रहं बंधुतोऽपि ॥ प्रवासी विपक्षा
हवे मानभंगं कदाचिन्न शांतं भचेत्तस्य चे
तः ॥ ४ ॥ सुतस्थानगे पूर्वजापत्यतापी कु
शाग्रा मतिर्भास्करे मंत्रविद्या ॥ रतिर्वंचने सं
चकोऽपि प्रमादी मतिः क्रोडरोगादिजा भावनीया ॥ ५ ॥

तान्येभ्यो विग्रहं विकलहं ॥ तथा विपक्षाहवे शत्रुसंग्रामे मान
स भंगमतुलमेदमाप्नोति ॥ प्रवासी विदेशगमनशीलो भवे
त् ॥ तथा तस्य चेतो मानसं कदाचिन्न शांतिं भजेत् सदा व्या
कुलं स्यादित्यर्थः ॥ ४ ॥ अथ सुतभावफलम् ॥ भास्करे सुत
स्थानगे पंचमे सति नरः पूर्वजापत्यतापी पूर्वजस्य प्रथ
मजातस्यापत्यस्य पुत्रतापि तापवान् लनमरणशोकं त
तो दुःखं प्राप्नुयादित्यर्थः ॥ मंत्रविद्या यस्येति स आगमवे
त्ता नीतिशास्त्रज्ञो वा ॥ प्रमादी असावधानः संकोचकोऽद्र
व्यसंचयकृद्भवेदित्यर्थः ॥ तथा तस्य मतिर्बुद्धिः कुशाग्र्याति
सूक्ष्मवस्तुविचारणी वंचने परप्रतारणे रतिः प्रीतिः ॥ को

डुरोगादिजा कुक्षिव्याधिभवा मतिर्भावनीया ज्ञेयेति सर्व
त्रान्वयः ॥५॥ अथ षष्ठभावफलम् ॥ यस्य षष्ठे रिपुभव
ने भास्करः स रिपुध्वंसकृच्छत्रुघाती स्यात् ॥ तथा राजतो रा
जदंडनमित्तान्मित्रतोऽमित्रकार्यहेतोर्वा व्ययम् ॥ द्रव्यहा
यं करोति कुर्यात् ॥ तथा प्रयाणे यात्रायां निषादैर्भिल्लैर्लु
2 भिर्विषादं दुःखं करोति मार्गे चोरकृतलुंठनवशात् दुःखं
प्राप्नुयादित्यर्थः ॥ मातुः कुले मातृवंशे तथा चतुष्पादतोऽ
पि पशुघातात् दुःखं भवेदिति शेषः ॥ अथवा मातृकुलात् हननपतनात् कुं
(कुलादिति पाठः ॥६॥ अथ सप्तमभावे रविफलम् ॥ अस्मिन्व्याख्याने
नाप्यः सूर्यः द्यूनजातः सप्तमगस्तदा नरस्य प्रियातापनं स्त्री
क्लेशः पिंडपीडा च चिंता तत्पदार्थालाभे मनोव्याकुलत्वं
(स्वशरीरकष्टम् ५)
॥ रिपुध्वंसकृद्भास्करो यस्य षष्ठे न
नोति व्ययं राजतो मित्रतो वा ॥ कुले मा
तुरापच्चतुष्पादतो वा प्रयाणे निषादैर्वि
षादं करोति ॥६॥ द्युनाथो यदा द्यूनजा
तो नरस्य प्रियातापनं पिंडपीडा च चिंता ॥
भवेत्तुच्छलब्धिः क्रये विक्रयेऽपि प्रति
स्पर्द्धया नैति निद्रां कदाचित् ॥७॥ क्रि
यालंपटं त्वष्टमे कष्टभाजं विदेशीयक
तो वा विलंबाद्विपद्भुक्तताभानुरुग्रो विधत्ते
स्तेभजेऽप्यवस्तु ॥ वसुक्षीणता दस्यु
अथ वस्तुसंग्रहे विक्रये गृहीतवस्तुद्रव्यविनिमये तुच्छलब्धिः ॥८॥
स्वल्पलाभो भवेत् ॥ तथा प्रतिस्पर्धया प्रतिवादी वैधाक
दाचिन्न निद्रामेति लभेदित्यर्थः ॥७॥ अथाष्टमभावफ
लम् ॥ अष्टमे मृतिभावे भानुर्ग्रहे क्रियालंपटः व्यवहार
का५ अतीव धूर्त्तमतः एव कष्टभाजं क्लेशिनं विधत्ते करोति ॥
तथा विदेशीयदारानुगामी अथवा वल्लभ दाम पि भजेत् ॥
दस्युतो चौराद्वातो वा विलंबाद्दर्भा उनाल स्याद्वा वस्तुक्षी
ला द्रव्यहीनता गुप्तजा विपत्परस्त्री कृतेंद्रियविषयक
वाताबीजन्य क्लेश अष्टमे रवौ स्यादित्यन्वयः ॥८॥ ॥=
॥ लग्नदशमर्थेदशफलम् ॥ दिवानायके सूर्ये कोणयाते न
वमस्थे सनरोऽनिच्छया मनोभावरहितया तपश्चर्यया तुंग
तां क्रियाश्रेष्ठत्वं लापकव्यवहारेण तुंगतां पूज्यतां प्रा
ति दांभिकत्वेऽपि लोकमान्यः स्यादिति भावः तथा सोदरेण

श्रात्रा हेतुभूतेन संतप्तः स्यात् ॥ यतो दुष्टता परत्नोहत्त्वमत
एव चिंताविरामः शांतिरस्य चेतो नैवाप्नोति ॥ अत्र कोणश
ब्देन त्रित्रिकोणं विवक्षितं वेदितव्यमित्यर्थः ॥९॥ अथ द
शमभावफलम् ॥ यस्य दशमे प्रजातः स्थितोंशुमान् सूर्योऽ
स्य नरस्य जनन्याः मातुर्यातनां रोगोद्भवं क्लेशं आतनोति ॥
विस्तारयति ॥ तथा अस्य श्रमः पराक्रमो राजतुल्यः सिद्धि
दो नृपोद्भवस्त्सर्वार्थसाधकः स्यादित्यर्थः ॥ वल्लभैः प्रि
यैर्मित्रपुत्रकलत्रादिभिर्विप्रयोगः ततः क्लमो ग्लानिः सं
क्रमेत्संभवेदिति तात्पर्यार्थः ॥१०॥ अथैकादशस्यार्कफलं ॥
लाभोपयातो भवगो रवौ सनरो नृपद्वारतः स्वेद्रव्यं राजदत्त
मुद्राधिकारादनेकधा श्रेयो गजाश्वादिसंपदः श्रेयो लभेत् ॥
किंच प्रतापानलेशत्रवः संपतंति तदुत्तमाधिकारदर्शनेन संत

॥ दिवानाथके दुष्टताकोणयातेन चाप्नो
तिचिंताविरामोऽस्य चेतः ॥ तपश्चर्यया
ऽनिच्छयापि प्रयाति क्रियातुंगतां तप्यते
सोदरेण ॥९॥ प्रयातोंशुमान्यस्य मे
षूरणेऽस्य श्रमः सिद्धिदो राजतुल्यो नर
स्य जनन्यास्तथा यातनामातनोति क्ल
मः संक्रमे द्वल्लभैर्विप्रयोगः ॥१०॥ र
वौ संलभेत्स्वं च लाभोपयातेन्नृपद्वारतो
राजमुद्राधिकारात् ॥ प्रतापानलेशा
त्रवः संपतंति श्रियोनेकधा दुःखमंगो
द्भवानाम् ॥११॥ रविर्द्वादशेनेत्रदोषं
करोति विपक्षाहवे जायते सोजयश्रीः ॥
स्थितिर्लब्धया लीयते देहदुःखं पितृव्या
दयो हानिरध्वप्रदेशे ॥१२॥ शुभम् ॥

प्ताः स्युरिति भावः ॥ तथांगोद्भवानामपत्यानां दुःखं च सं
लभेदित्यनेनान्वयः ॥११॥ अथ द्वादशस्यार्कफलम् ॥
द्वादशेगतोऽसौ रविर्नेत्रदोषं मंददृष्टित्वं पितृव्यापदः
पितृव्यभव क्लेशान्करोति ॥ तथा विपक्षाहवे शत्रु
संगरे जयश्रीः लब्ध्या लब्धुमिच्छया स्थितिरेकत्राव
स्थानं अध्वप्रदेशे मार्गे हानिः क्षतिर्जायते भवेत् ॥ तथा
देहदुःखं लीयते नश्यति आगत्य पथे वा यथानुभवं व्या
ख्येयं ॥ पितृव्यस्यादौ अध्वप्रदेशे पितृव्यापदः पितृव्यमर
णं तदलंघनाख्या हानिः स्यादित्यर्थः ॥१२॥ इति रवेर्लग्नादि
भावफलम् ॥१२॥

अथ चंद्रस्य तन्वादिद्वादशभावफलान्याह ॥ विधुश्चन्द्रो
गोकुलीराजगो वृषकर्कटमेषस्थः सन् वपुस्थो लग्नगो धना
ध्यक्षं धनाधिकारिणं आनन्दलावण्यपूर्णम् प्रमोदनैपुण्ययु
क्तं ॥ शेषलग्ने कथितान्यराशौ अधर्मे धर्मरहितं क्षीणदेहं मं
दवीर्यं दरिद्रं धनहीनं जडं मूकं मतिहीनं वाश्रोत्रहीनं वधि
रं नरं विधत्ते करोति ॥१॥ हिमांशौ चन्द्रे वसुस्थानगे द्विती
यस्थानगे शरीरेऽतिसौख्यं ॥ अंगनानां स्त्रीणां विलासः क्री
3 डा कुटुंबे स्वबंधुषु ॥ तद्वारतिः अल्पमतिर्जायते भवेत् ॥ तथा
दर्शने तस्मिन्पुरुषे दृष्टे देवांगनापि वशं याति किमुतान्ययो
षित् ॥ अतिसुंदरः स्यादितिभावः ॥२॥ विधौ विक्रमे तती-

॥ विधुर्गौरकुलीर४ज१गः सन्वपुस्थो धना
ध्यक्षलावण्यमानन्दपूर्णम् ॥ विधत्तेऽधर्मं
क्षीणदेहं दरिद्रं जडं श्रोत्रहीनं नरं शेषलग्ने ॥१॥
हिमांशौ वसुस्थानगे धान्यलाभः शरीरेऽति
सौख्यं विलासोऽङ्गनानाम् ॥ कुटुंबैरतिर्जा
यते तस्य तुच्छं वशं दर्शने याति देवांगना
पि ॥२॥ विधौ विक्रमे विक्रमेणोऽतिवित्तं त
पस्वी भवेद्भामिनीरंजितोऽपि ॥ किं यच्चिंतये
त्साहजं तस्य शर्म प्रतापोज्वलो धर्मिणो
वैजयंत्या ॥३॥ यदा बंधुगो बांधवैरत्रिज
न्मा नृपद्वारसर्वाधिकारी सदैव ॥ वयस्या
दिमे ताहृशं नैव सौख्यं सुतस्त्रीगणान्तोष
॥ मायाति सम्यक् ॥४॥

येंदौ विक्रमेणोद्यमेन वित्तं धनमेति प्राप्नोति ॥ भामिन्या सुंद
रस्त्रिया रंजितो लोभ्यमानोऽपि तपस्वी धर्मिणो वैजयंत्या ध
र्मध्वजित्वेन प्रतापोज्वलो यशःशोभितश्च भवेत् ॥ तथा त
स्य साहजं भ्रातृभवं सर्वसुखं किं यच्चिंतये बहुलं भवेदित्य
र्थः ॥३॥ बंधुगश्चतुर्थे अत्रिजन्मा चन्द्रो यदा तदा पुरुषो बां
धवैः सौख्यं ॥ सुतस्त्रीगणात्पुत्रकलत्रसमूहात्सम्यक्तो
षं संतोषं ॥ सदैव नृपद्वारसर्वाधिकारी राजद्वारसर्वका
र्यकर्त्ता ॥ आदिमे प्रथमे वयसि ताहृशं नैव याति प्राप्नोति
णाधिकारोत्ति मद्योद्वेगवानिति भावः ॥४॥ यस्य जन्मनि
पंचमो यदा नक्षत्रनाथो विधुरस्ते संतानतोषं निर्मलां म
तिं रत्नलाभं भूमीशाद्ववृद्धिमपि ददाति ॥ तथा कुशीदेन
कालांतरव्यवहारेण यो व्यवसाय एव व्यवसाय उद्यमः

तस्मान्मानाश्रयो वहुवस्तुलाभाः स्युरिति शेषः ॥ ५ ॥ रिपोश्शत्रुभवने विधोः सति राजविग्रहेणापि प्रतापोज्वलः ॥ तेजसा कांतियुतः सन् राजते शोभते ॥ तेऽरयः शत्रवो जिताः पराजिता अपि भूरिशो वहुधा तदग्रे निःप्रभाः अप्रतिभा अपि भूयः पुनः संभवंति ॥ तथा मातरि शीलमस्यास्तीति से तद्भक्तः इत्शो नस्यादिति शेषः ॥ ६ ॥ सप्तमे शीतरश्मिर्दारसंस्त्रीसुखं ॥ अर्थवाणिज्यतो विदेशव्यापाराद्धनित्वमपि दद्यते ॥ कृशपक्षे तु स्त्रीजने रतिं तद्भाषणाद्यशक्तिं न तु तत्सुखमिष्टभुक् लुब्धचेता मिष्टभुंजि चेतो यस्य सः ॥ कृशो दुर्वलो विपक्षाभिभूतः शत्रुभिः पराजितो भवेदिति शेषः ॥ ७ ॥ अथाष्टमभावगतचंद्रफ० ॥ तस्य गेहे भैषजी भिषजां वैद्यानामियं सभा ॥ सदा क्वाथमुखो

॥ यदा पंचमो यस्य नक्षत्रनाथो ददातीह संतानसंतोषमेवं ॥ मतिं निर्मलां रत्नलाभं च भूमिं कुसीदेन नानाश्रयो व्यावसायात् ॥ ५ ॥
रिपौ राजते विग्रहेणापि राजा जितारोपि भूयो विधौ संभवंति ॥ तदग्रे रयो निःप्रभा भूयसोपि प्रतापोज्वलो मातृशीलो न तद्वत् ॥ ६ ॥ तदेदारसंसप्तमे शीतरश्मिर्धनित्वं भवेदथ वाणिज्यतोपि ॥ रतिं स्त्रीजने मिष्टभुग्लुब्धचेताः कृशः कृशपक्षे विपक्षाभिभूतः ॥ ७ ॥ सभा विद्यते भैषजी तस्य गेहे पचेत्कर्हिचित्क्वाथमुख्योदकानि ॥ महाव्याधयो भीतयो वारिभूताः शशीक्लेशकृत्संकटान्यष्टमस्थः ॥ ८ ॥

दकानि पचेत् ॥ ज्वराद्यभिभूतत्वे सति तन्निवारणाय वहवो वैद्याजनाः संतः स्युरिति भावः ॥ कर्हिचिद्वारिभूता जलनिदानभव महाव्याधयो राजरोगादयः भीतयो जलनिमज्जनभयानि संकटानि दुर्जनादिजनितवंधनानि दुःखानि भवंतीत्येव क्लेशकृत् कष्टकारकः शशी यद्यष्टमस्थो विद्यते भवेदित्यर्थः ॥ ८ ॥ अथ नव० भा० फ० ॥ यस्य जनस्य तपोभावगो नवमस्थस्तारकेशश्चंद्रस्तं द्विजाः ब्राह्मणक्षत्रियविशो वंदिनः स्तुतिपाठकाः प्रजास्तदितरजनाः स्तुवंति गुणारोपं कुर्वंति ॥ यतो यौवनादेः यौवनस्थिरत्व धनत्व शीलव्यवहारादिहेतोर्भाग्याधिको

भवत्येव ॥ तथा शरीरे सुखं साहसं मनः प्रागल्भ्यं च ॥ चंद्र
वच्छोभनं ॥ अथवा कदाचिद्वर्धमानं कदाचित्क्षीयमानं भव
तीत्यनेनैवान्वयः ॥ ९ ॥ अथ दशमभा० फ० ॥ समुद्रांगजे
अब्धिसुते चंद्रे खगे दशमे सति धर्मकर्मा पुण्यकारी सन् बां
धवेभ्यः सुखम् ॥ नरेशादितो राजप्रभृतिजनेभ्यः श्रीकल्याण
मपि ॥ नवीनांगनानां वैभवे प्रभुत्वे सुप्रियत्वं सुतरां वल्लभ
त्वम् ॥ तथा पुरोजातके प्रथमसुते स्वसौख्यं ॥ यद्वा पुरो जा
यतेऽग्रे भवतीति पुरगणा जातको भृत्य अस्मिन् स्वल्पं सु
खं प्रयाति प्राप्नोतीत्यर्थः ॥ १० ॥ अथैकादशभा० चं० फलम् ॥
लाभगे नैकादशस्थेनेंदुना चंद्रेण भूमिपाद्राज्ञः सकाशात्
क्रमेण प्र[illegible]र्बुधिकारां वराणि मान्यताध्यक्षत्वं वस्त्राणि लभेत् ॥
॥ तपोभावगतार्के शोजनस्य प्रजांश्च द्वि
जावंदिनस्तं भवंति ॥ भवत्येव भाग्याधि
को यौवनादेः शरीरे सुखं चन्द्रवत्साहसं म ॥ ९ ॥
सुखं बांधवेभ्यः खगे धर्मकर्मा समुद्रांग
जे शं नरेशादितोपि ॥ नवीनांगनावैभ
वे सुप्रियत्वं पुरोजातके सौख्यमल्पं
करोति ॥ १० ॥ लभेद्भूमिपादिंदुना ला
भगेन प्रतिष्ठाधिकारां वराणि क्रमेण ॥
श्रियोथ स्त्रियोंतःपुरे विभ्रमंति क्रिया
वैकृती कन्यका वस्तुलाभः ॥ ११ ॥ शशी
द्वादशे शत्रुनेत्रादिचिंताविचिंत्यैः सदा
सद्व्ययो मंगलेन ॥ पितृव्यादिमात्रादितो
नर्विषादो न चाप्नोति कामं प्रियाल्पप्रियत्वं ॥ १२ ॥
अर्थांतःपुरे गृहमध्ये स्त्रियो धनानि स्त्रियो वनिता विभ्रमंति
स्थिरा भवंति ॥ तथा वस्तुभ्यो नानापदार्थेभ्यो लाभः ॥ क्रियया
वैकृती क्रूरा कन्यका च भवेदिति शेषः ॥ ११ ॥ अथ द्वा० चं० फलम् ॥
[illegible]द्वादशे शशी चेत् शत्रुतो भयं नेत्रादेर्विकारेण चिंता धिचिंत्या
तैया ॥ मंगलेन विवाहादिकार्येण सद्व्ययः ॥ शोभने कुटुंबा
दौ द्रव्यत्यागः पितृव्यादिमात्रादितः पितृव्यात् पितृभ्रातु
रादिशब्दात् तत्सुतवनितादिभ्यो मातुः शकाशात् आदिशब्दान्
मातृपितृकुलजेभ्यश्चांतर्मनसि विषादो दुःखं ॥ प्रियाल्पप्रिय
त्वं स्वल्पसंतोषत्वं ॥ तेषां तेषु विरागित्वं भवेदिति शेषः ॥
च पुनः कामं मनोभिलषितं न आप्नोतीत्यर्थः ॥ १२ ॥ ॥
॥ इति द्वादशभावगतचन्द्रफलम् ॥ शुभमस्तु ॥

॥ अत एव मानसं तपेत् ॥ तथापि द्वितीयः ३
स

अथ भौमस्य लग्नाद्भावफलम् ॥ विलग्ने कुजे भौमेति ॥ दंडलोहा
ग्निभीतिः कलत्रादिघातः ॥ स्त्रीपुत्रनाशः शिरोनेत्रपीडा ॥ फला
नां कार्यसिद्धि विपाके परिणामे सदैव प्रतिकार्यमुपसर्गो वि
घ्नो भवेदित्यग्रे ॥ न्वयः ॥ केसरी किं सिंहवद्दुर्धर्षी स्यादिति
भावः ॥१॥ अथ द्वितीयभा० भौ० फ० ॥ यस्य धने द्वितीयभावे
अंगारको भौमो भवेत्तस्य विद्यमाने लब्धे धने वा सति कुटुं
बे स्वजनविषये किं न किंचित्फलमित्यर्थः ॥ यथा मर्कटो
वानरः कंठहारं केनापि कंठे समारोपितं गुंजादिरचितहारं त्राय
ते रक्षति तथा सोपि कृपणो धनं रक्षति ॥ न तद्धनं कदाचिदपि कु
टुंबोपयोगाय भवतीति भावः ॥ तथा तस्य वादे भग्नः पराजितः
पुनर्भूयोपि विवादार्थं सन्मुखं कोपि भवेदिति मरवत्तरः स्यादित्या
शयः ॥२॥

॥ भौमस्य ॥

॥ विलग्ने कुजे दण्डलोहाग्निभीतिस्तपे
मानसं केसरी किं द्वितीयः ॥ कलत्रादि
घातः शिरोनेत्रपीडा विपाके फलानां स
दैवोपसर्गः ॥१॥ भवेत्तस्य किं विद्य
माने कुटुंबे धनेंगारको यस्य लब्धे ध
ने किम् ॥ यथा त्रायते मर्कटः कंठहारं
पुनः सन्मुखः कोभवेद्वादभग्नः ॥२॥ कु
तो बाहुवीर्यं कुतो वा कुलक्ष्मीस्तृतीये
न चेन्मंगलो मानवानाम् ॥ सहोत्थव्य
था भ्रातृकेन तेषां तपश्चर्यया चोपहा
स्यं कथं स्यात् ॥३॥ यदा भूसुतः संभवेत्तु
र्यभावे तदा किं ग्रहाः सानुकूला जनानां ॥
सुहृद्वर्गसौख्यं न किंचिद्विचिंत्यं कृपाव
लाद्भूमिर्लभेद्भूमिपालात् ॥४॥ श्री ॥

अथ तृ० भौ० फ० ॥ बाहुवीर्यं भुजबलं कुतः ॥ कुतो वा कुलक्ष्मीः
स्वभुजोपार्जितं द्रव्यं ॥ सहोत्थव्यथा भ्रातृपीडा केन भवति
कथ्यते केनापीत्यर्थः ॥ च पुनः तपश्चर्यया उपहासः जनहासः
कथं तेषां स्यात् येषां मानवानां तृतीयो मंगलो न चेत्स हजस्थे
भौमे सति तत्फलं स्यादित्याशयः ॥३॥ अथ चतुर्थभा० भौ० फ० ॥
॥ यदा भूसुतः भौमस्तुर्यभावे चतुर्थस्थाने संभवेत्तदा जनानां
ग्रहाः सानुकूलाः शुभफलदाः किं ते नेत्यर्थः ॥ तस्मात्सुहृद्वर्ग
सौख्यं बंधुमित्रगृहमात्रादिजनितं सुखं न किंचिद्विचिंत्यं ॥
तथा भूमिपालाद्राज्ञः सकाशात् कृपा च दया बलं च प्रसादः ॥
भूमिश्च ग्रामादिलाः कृपाबलाद्भूमिर्लभेत् ॥४॥

अथ पंचमभावे भौ॰फ॰॥ पंचमे कुजे जाठरोग्निः उदराग्निर्ब
लीयान् प्रबलः॥ किल्बिषे पापेपि अनल्पाभूयसी मतिः स्यात्॥
स्वयं चांतर्मनसि दुग्धवत्तप्यते॥ सदैव व्याकुलः स्यादित्यर्थः॥
तदानीमेक एव कुजो जातमन्यत्॥ जातमपत्यं निहंति तु मारय
त्येव॥५॥ अथ षष्ठभा॰भौ॰फ॰॥ षष्ठे रिपुभावे अंगारके भौ
5 मे सति शक्तिमंतः सबला अप्यरयः शत्रवस्तदंगेरिताः स्वांगेर
मात्याभिरेवोत्सारिताः संगरे संग्रामे न तिष्ठंति पलायंत इत्यर्थः॥
तद्वन्मनीषा विचारबुद्धिर्मातुलेयो मातुः सहजं सुखी स्यादिति
शेषः॥ तथा वित्तं द्रव्यं विलीयेत नश्येत्॥ अपि पुनर्भूरि बहु
वित्तं लभेत्॥६॥ अथ सप्त॰भा॰भौ॰॥ सप्तमे मेदिनीजः कुजः
स्पर्धिनां वादिनां प्रहादनैः ताडनपीडनादिभिर्मुहुः पुनः पुनर्भं

॥ कुजे पंचमे जाठराग्निर्बलीयान्नजातं
नु जातं निहंत्येक एव॥ तदानीमनल्पा
मतिः किल्बिषेपि स्वयं दुग्धवत्तप्यते
तः सदैव॥५॥ न तिष्ठंति षष्ठेऽरयोंगा
रकेवै तदंगेरिताः संगरे शक्तिमंतः॥
मनीषा सुखी मातुलेयो न तद्वद्विलीयेत
वित्तं लभेतापि भूरि॥६॥ अनुद्धारभू
तेन पाणिग्रहेण प्रयाणेन वाणिज्यतो
नो निवृत्तिः॥ कुभंगदः स्पर्धिनां मेद
नीजः प्रहादनैः सप्तमे दंपतिघ्नः॥७॥
शुभालस्य किं खेचराः कुर्युरन्ये विधा
नेपि चेदष्टमे भूमिसूनुः॥ सखा किंनु
शात्रूयते सत्कृतोपि प्रयत्ने कृते भूयते
॥ चोपसर्गैः॥८॥ श्रीं हूँ लँः॥

गदः पराजयकारी॥ तथा दंपतीघ्नः स्त्रीपुंसौ नर्मशाकोऽर्थात्
पुंजन्मकुंडलिकायां सप्तमे विद्यमानः स्त्रीघ्नः॥ कन्यकाजन्म
कुंडल्यां च तत्पतिघ्नः इति शेषः॥ तथा अनुद्धारभूतेन नि
श्चितेन पाणिग्रहेण विवाहेन हेतुना वाणिज्यतो व्यापा
रहेतोः प्रयाणेन यात्रागामी न निवृत्तिर्न पराहेत्यागमं स्या
दित्यर्थः॥ विवादाशया व्यापारलोभाद्वा बहुकालविदेश
स्यो भवेदिति भावः॥७॥ अथाष्टमभा॰भौ॰॥ अष्टमे भू
मिसूनु भौमश्चेत्तस्य विधाने भाग्येपि अन्ये शुभाः खेचराः किं
कुर्युः कुजस्य दुष्टफलत्वेन शुभफलप्रतिबंधकत्वात् सत्
कृतो मानितोपि सखापि नु शात्रूयते शत्रुरिवाचरति॥
प्रयत्ने कृतेपि उपसर्गैर्विघ्नैर्भूयते आरब्धकार्ये विघ्ना संभ
॥भवंतीत्यर्थः॥८॥

अथ नवमभा॰ भौ॰ ॥ तपोभावगो नवमः स्थितो मंगलः लं नरं
भाग्यवित्तं भाग्येन वित्तं द्रव्यं धस्यतं ॥ महोग्रतेजस्विनं करो
ति ॥ तथा महोग्रा अतिक्रूरा मतिर्भवेत् ॥ आदिमः प्रथमः शृ
लको वनिता भ्राता न कुतः सोदरः स्वभ्राता पिनमदेदित्यर्थः ॥
तथा विक्रमत्रिथमा एणो धम विपाके फलकाले तुच्छो लाभो भवे
त् लुच्छ स्वल्पो लाभो धस्योति ॥९॥ अथ दशा॰ भा॰ भौमफलम् ॥
यदि मध्यमभावे दशमे नो मंगलः तस्य कुले किं मंगलमपि तु
स्वस्य भौम एव कल्याणकार्यं स्यादिति अतिशयोक्तिः ॥ त
था जनैर्भूत्यैर्भूयते ॥ वकुभत्यः स्यादित्यर्थः ॥ अहो नरः स्वत
एव सोधमादेव सिद्धिसंपन्नकार्यो वर्तसीयते ॥ तथा वराकोहि
लोके धुमंडलाघते २५

॥ महोग्रामतिर्भाग्यवित्तं महोग्रं तपोभाव
गो मंगलः लं करोति ॥ भवेन्नादिमः शृपा
लकः सोदरो वा कुतो विक्रमस्तुच्छलाभो
विपाके ॥९॥ कुले तस्य किं मंगलं मंग
लैर्नो जनैर्भूयते मध्यभावे यदि स्यात् ॥
स्वतः सिद्धभावाव तंशीयते सौवराकोपि
कंठीरवः किं द्वितीयः ॥१०॥ कुजः पीड
येल्लाभगोपत्यशत्रून् भवेत्सन्मुखो दुर्मु
खोपि प्रतापात् ॥ धनं वर्द्धते गोधनैर्वा
हनैर्वा सकृच्छून्यता चैव पैशून्यभावात् ॥११॥
घाताच्चोपि तत्सत्ततो लोहघातैः कुजो श
दशार्थस्य नाशं करोति ॥ मृषा किम्बदं
तीभयं दस्युतो वा कलिं पारधीहेतुदुः खं
विचिंत्यम् ॥१२॥

नकुलोद्भवोपि द्वितीयः कंठीरवः किं सिंहतुल्यपराक्रमः स्यादि
ति भावः ॥१०॥ अथैकाद॰ भा॰ भौ॰ ॥ लाभगः कुजः भौम अप
त्यानि च शत्रंव भ्रातान् पीडयेत् तथा दुर्मुखः आक्रोशकोपि प्रता
पात्तेजोधिकत्वात् सन्मुखो लोकदर्शनीयवक्त्रो भवेत् ॥ गोव
धनैर्वाहनैर्वा भिन्निन्नै लैरथ गोश्वादि व्यापरेण धनं पैशून्य
भावाद्वगुणाति लोकप्रसिद्धाद् अर्थ शून्यता अव्याहानिता च
सकृदेकवारं भवेत् ॥११॥ अथ द्वा॰ भा॰ भौ॰ ॥ द्वादशो व्ययभा
वगः कुजः अर्थस्य द्रव्यस्य नाशं करोति ॥ तथा शार्तेद्व इंडो
पि लोहघातैः शस्त्रप्रहारैः सन्ततमलेन घातकर्ता तेन सह
तमानः स्यात् ॥ सनरो अरिघातको भवेदिति भावः ॥ मृषाकिं
वदंतीभयं मिथ्या जनश्रुति भीतिदस्युतश्चौरात् भयं वा क
लिः कलहो भवेत् ॥ तथा पारधीहेतुदुः खं भस्यजानेत हेत
॥ दुः खं दिशिचिंत्यम् ॥१२॥ इति कुजसंवादिमा
वफलम् ॥२२॥

५

अथ बुधस्य लग्नादिभावफलम् ॥ बुधो मूर्त्तिगो लग्नस्थोऽन्य
रिष्टमन्यग्रहजनितदोषं मार्जयेन्नाशयेत् ॥ तथा वरिष्ठ
धियः श्रेष्ठबुद्धयः तेजनादिव्यचामीकरीभूतदेहा उत्तम
स्वर्णनिभशरीरा ॥ श्चिकित्साविदो भिषग्विद्याकुशला ॥
वैखरीवृत्तिभाजो वैपथ्यालेखणव्यवहारेण वृत्ति ॥ कुटुं
वापोषणादिकानां भजंति ते ॥ अथवा वैखरीवृत्तिभाश्रिता
दुश्चिकित्सा दुःसाध्या भवंति ॥१॥ अथ द्वितीय भा० बु० फलम् ॥
धने द्वितीयभावे बुधे सत्ययं नरो बुद्धिमान् ॥ बाहुतेजा भुजे
ताप वान् ॥ सभासंगतः पंडितसमाजस्थो व्यास एव भासते शोभते ॥
इति रूपकालंकारः ॥ भोगतः षट्पदो भ्रमरः सर्वभोगविषे
यरसग्राहीत्यर्थः ॥ तद्वत्कल्पद्रुमस्य पृथू दारता कुदानेश्वा

॥ बुधो मूर्त्तिगो मार्जयेदन्यरिष्टं वरिष्ठा
धियो वैखरीवृत्तिभाजः ॥ जनादिव्य
चामीकरीभूतदेहाश्चिकित्साविदो दुः
श्चिकित्सा भवंति ॥१॥ धने बुद्धिमान्बो
धने बाहुतेजाः सभासंगतो भासते व्या
स एव ॥ पृथूदारता कल्पवृक्षस्य तद्व
द्बुधे भर्णपते भोगतः षट्पदो यम् ॥२॥
वणिङ्मित्रतापण्यकृत्तिशीलो व
शित्वं धियो दुर्वशानामुपैति ॥ विनीतो
श्रितो लेलतावान् ॥३॥ चतुर्थे चरेद्ब्रं
द्रजश्चारुमित्रो विशेषाधिरूढ मिना
तदुक्तं नदाशावरैःपेत्रकं नो धनं च ॥४॥
श्रीमत्वं बुधैः पंडितैर्भर्णपते वर्ण्यते ॥२॥ अथ तृ० बु०
फलम् ॥ तृतीये बुधे सति वणिजां पराय जीविनां मि
त्रतया स्नेहेन पण्यकृतां क्रयकारिणां वृत्तिं व्यवहा
रं शीलयति भजतीति ॥ सत पोक्तः विनीतः शील
वान्सन् दुर्वशानाम वश्यानां धियास्वबुद्ध्या वशित्वं
शकारित्वमुपैति ॥ अनुजैर्भ्रातृभिर्लेलतावल्लवल्लीभि
र्द्रुम इवाश्रितो वेष्टितो अतिभागं बहुविषयानुभवं
भजेत् ॥ वाक्यानंतरार्थः ॥ भोगानंतरमनो वयसि स
न्यसेत्तत्त्यजेत् विषयानितिशेषः ॥ यद्वा सहजैर्लता
वदाश्रितः संकटे प्राप्ते विषयान्रसे वेदित्यन्वयः ॥३॥
॥ इति बुधसहजस्थानफलम् ॥

अथचतुर्थभा०फ०॥ चंद्रजो बुधो यदि चतुर्थे चरेत्तदा चा
रुमित्रः सुहृद्भिर्नाथाङ्गनस्य राजद्वारस्य विशेषाधि
कृत्सर्वाध्यक्षो लेखकः शोभनवर्णलेखो भवेद्वा ॥ अ
थवा तद्दशापरैस्तदाश्रितान्यलेखाधिकारी भिलडुकं
तन्मुखनिर्गतवाक्यं लिख्यते इति लिङ्पेलिङ॥ च पु
नः पैतृकं पित्रोपार्जितं धनं नो भवेत् पितृधनानयंस्या
दित्यर्थः ॥४॥ इति बुधचतुर्थस्थानफलम्॥ अथपंच
मभा०बुधफ०॥ पंचमे रोहिणेये रोहिण्यपत्यं बुधोऽ
स्ति तस्यादिमे वयसि पुत्रगर्भो न तिष्ठेत्तस्माज्जातश्चे
दम्रियेत ॥ स्वपत्न्यं वास्यात् ॥ मेधा बुद्धिरर्थसंपाद

॥ वयस्यादिमे पुत्रगर्भो न तिष्ठेद्भवेत्तस्य
मेधार्थसंपादयित्री ॥ बुधे भण्यते
पंचमे रौहिणेये क्रियाद्धियते केल
वस्याभिचारात् ॥५॥ विरोधो ज
नानां निरोधो रिपूणां प्रबोधो यती
नां च रोधो निलानाम् ॥ बुधे सद्य
ये व्यवहारे निधीनां बलादर्थक
स्संभवेच्छत्रुभावे ॥६॥ श्रीकृष्णः॥

यित्री द्रव्यार्जनचतुरा ॥ साभिचारमभिचारे मारणो
च्चाटनादिभिः सह वर्तमानं केतबं छलं क्रियद्दपरि
मितं वियत इति बुधे हौरावित्भिर्भण्यते कथ्यते इ
त्यर्थः ॥५॥ अथषष्ठभा०बुध०॥ बुधे शत्रुभावे ष
ष्ठस्थे सति जनानां विरोधो जनैः कलहः ॥ रिपूणां
निरोधः असह्यकारो गृहस्थापनं अनिलानां वायू
नां अविरोधो वायुना बद्धकोष्ठ इत्यर्थः ॥ यतीनां सं
न्यासिनां प्रबोधो ज्ञानं सम्भवेदस्येति शेषः ॥ तथा
सनरो निधीनां द्रव्याकाराणां सद्यं व्यवहार
ति विदधातीति सः बलात्स्वसामर्थ्यादर्थकृद्द्रव्यो
पार्जकः संभवेत् ॥६॥ इति षष्ठस्थानफलम्॥
अथसप्तमभा०बुधफलम्॥ सप्तमे नस्तंगते उदिते श्री
तगो श्चंद्रस्य सुते पुत्रे बुधे युवत्याः स्त्रीसम्बन्धं परन्तु

भोगे रतिसमये तुच्छं स्वल्पकाले स्यापि वीर्यं वीजं च वि
धत्ते ॥ तथा हेमवत्सुवर्णतुल्या देहशोभा शरीरकांतिं त
त्संपदः स्वश्रियो वा अनुकर्तुमनुविधातुं न शक्नोति स
मर्थो भवेदित्यन्वयः इति शेषः ॥ तस्य कांति लक्ष्मी वाऽ
विकलं विदधातीत्यर्थः ॥ ७ ॥ अथाष्टमभा० बुधफलम् ॥
रंध्रगे अष्टमस्थे राजपुत्रे चंद्रसुते सति शतंजीविनः शू
नरा नृपाज्ञाजः सकाशाद्धिक्रेया व्यवहारान्निधानं द्रव्य
संचयं ॥ युवत्यु भवं क्रीडनं लीके लीमंतमनसि डीति
सुखं लभंते प्राप्नुवंति ॥ ८ ॥ अथ नवमभा० बुध० ॥
॥ सुतः सीतगोः सप्तमे संयुवत्या विध
त्ते तथा तुच्छवीर्यं च भोगे ॥ अन
लंगतो हेमवद्देहशोभां न शक्नो
ति तत्संपदो वानुकर्तुम् ॥ ७ ॥ श
तंजीविनो रंध्रगे राजपुत्रे भवंती
ह देशांतरे विश्रुतास्ते ॥ निधानं नृ
पाद्विक्रयाद्वा लभंते युवत्युद्भवं क्री
डने प्रीतिमंतः ॥ ८ ॥ बुधे धर्मगे
धर्मशीलोतिधीमान्भवेद्दीक्षितः
स्वर्धुनीस्नातको वा ॥ कुलोद्योत
को भानुवद्भूमिपालात्प्रतापाधि
को बाधको दुर्मुखानाम् ॥ ९ ॥
धर्मगे नवमस्थे बुधे अतिश्रीमान् धर्मशीलो दी
क्षितः सोमयाजी ॥ स्वर्धुनीस्नातको गंगास्नानव्रती ॥
भानुवत्कुलोद्योतकः स्ववंशप्रकाशकः ॥ भूमिपा
द्वा नृपाद्विप्रतापेनाधिकः ॥ दुर्मुखानां मुखरा ॥
(दुर्जनानां बाधको हिंसको भवेत् ॥ ९ ॥ अथ दश
मभा० बुध० फलम् ॥ कर्मगे दशमस्थे बुधे पितुः सं
पदो विशेषात्प्रजनीयो लोकमान्यः नीतिं दंडादि

श्रीर्   लकोलाहलकुन्दहल २

अखण्डमण्डलाकारंव्याप्तंयेन चराचरम्
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः १
गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुस्साक्षान्महेश्वरः
गुरुरेव परब्रह्म तस्मै श्रीगुरवे नमः ॥ २ ॥

कारत् ॥ प्रसादादि वैकारिणी ग्रहानुग्रहवती ॥ सोरा
ज्येशुभराज्यत्वे वृत्तिर्व्यवहारशीलो यस्य सः ॥ मितं
संवदेत् न वाचालः स्यात् नो मितं अपरिमितं आथा
द्वियांवराश्वादि संलभेत् ॥१०॥ अथैकादशभा० बु०फ०॥
लाभभावे स्थितं भेशजातं तारापतिपुत्रं विना न लाभो द्रव्या
दि र्न लावण्यं ॥ मनोहारित्व मानृशंस्यमरणं राहित्यमस्ति ॥
कन्यकोद्वाहनो कन्याविवाहकरणसामर्थ्यादेयं दातुं ॥
योग्यं द्रव्यं कुतः कथं च भूसुराद्विजाहस्यक्तं तृष्णा दत्त
वहुद्रव्येण पूर्णमनोरथा भवंति ॥ अपित्वेकादशस्थे ॥
बुधे एवैतत्सर्वं लाभादिफलं स्यादित्यर्थः ॥ ११ ॥ शुभं ॥

॥ मितः संवदेन्नो मितं संलभेत प्रसादादि
वैकारि सोराजवृत्तिः ॥ बुधे कर्मगे वृज
नीयो विशेषात् पितुः संपदो नीतिदं डाधि
कारात् ॥ १० ॥ विना लाभभावे स्थितं भे
शजातं न लाभो न लावण्यमानृशंस्यम
स्ति ॥ कुतः कन्यको द्वाहदानं च देयं क
थं भूसुरा हस्यक्ता स्तस्मा भवंति ॥ ११ ॥ =
न चेद्द्वादशे यस्य शीतांशुजन्मा कथं त
द्गृहं भूमिदेवा भजंति ॥ रणे वैरिणो भी
तिमायांति कस्माद्धिरण्यादिकोशं शठः को
॥ न भूयात् ॥ १२ ॥
अथ द्वादशभा० बुधफलम् ॥ यस्य द्वादशे शीतांशुजन्मा बु
धो न चेत्तस्य स्वगृहं भूमिदेवा ब्राह्मणाः कथं भजंति आ
गच्छंति ॥ रणे संग्रामे वैरिणः कस्माद्भीतिमायांति ॥ कः
शठो हिरण्यादिकोशमनुभूयात् ॥ संचितद्रव्यस्य कुतो
व्ययं कुर्यात् ॥ अपि व्ययस्थेन फलमिदं स्यादित्यर्थः ॥ १२ ॥
॥ इति बुधलग्नादिद्वादशभावफलम् ॥

अथगुरोस्तन्वादिद्वादशभावफलान्याह ॥लग्नगे देवपूज्ये
गुरौ सुवेषि सुवस्त्रालंकारेण शोभाढ्यो दिव्यदेहः सुंदर
शरीरः ॥सुखी विषादरहितः ॥अल्पवीर्यो अल्पबलो
नरः ॥ तथा गुणैः पांडित्यलोकरंजनादिभिर्गुरुत्वं बहु
8 मान्यत्वम् ॥भाविनी पारलौकी गतिर्भविष्यति स्वर्ग
वासरूपा भवेदिति शेषः ॥ वस्तूनि धनानि संबलेन भो
गेन व्ययं व्रजंति ॥१॥ अथ द्वितीयभा०गुरुफलम् ॥
कुटुंबे गुरौ द्वितीये सति कवित्वे काव्यकरणे मतिः ॥दंडे
नेतृत्वशक्तिः नृपाधिकारकरणे सामर्थ्यं ॥ मुखे दोषध
कृ वाचालो वक्ररोगी ॥ वाशीघ्रो भोगांतः सुरतांतो यस्या
ल्पवीर्यत्वात् ॥ सकष्टतः प्रयासेन द्रव्यलब्धिः स्यादिति शेषः ॥

॥ गुरुत्वं गुणैर्लग्नगे देवपूज्ये सुवेषी
सुखी दिव्यदेहोल्पवीर्यः ॥ मतिर्भा
विनी पारलौकी विचिंत्या वस्तूनि व्य
यं संबलेन व्रजंति ॥१॥ कवित्वे म
तिर्दंडनेतृत्वशक्तिर्मुखे दोषधृक्
शीघ्र भोगांत एव ॥ कुटुंबे गुरौ कष्ट
तो द्रव्यलब्धिः सदा नो धनं विश्रमे
यत्नतोपि ॥२॥ भवेद्यस्य दुश्चिक्यगो
देवमंत्री लघूनां लघीयान्सुखं सोद
राणाम् ॥ कृतघ्नो भवेन्मित्रसार्थेन
मैत्री ललाटोदये व्यर्थलाभो न तद्वत् ॥३॥
गृहद्वारतः श्रूयते वाजिहेषा द्विजोच्चो
रितो वेदघोषोपि तद्वत् ॥ प्रतिस्पर्धि
नः कुर्वते पारिचर्यं चतुर्थे गुरौ तत्समं
॥ तर्गतं च ॥४॥
सदैव यत्नतोपि धनं नो विश्रमेत् स्थितिं न लभेत् ॥२॥
अथ तृतीयभा०गु०फ० ॥ यस्य दुश्चिक्यगः तृतीयस्थो देवमं
त्री गुरुः स नरो लघूनां कनिष्ठानां मध्ये लघीयान् अतितुच्छः ॥
सोदराणां भ्रातॄणां सुखं कल्याणकारी ॥ कृतघ्नः कृतघ्नो भ
वेत् ॥ तथा मित्रसार्थे हितवर्गे मैत्री न ललाटोदये भाग्येन जा
तेरा अत्र समागते पित तद्वदर्थलाभो न भवेदित्यन्वयः ॥३॥
अथ चतुर्थभा०गु०फ० ॥ चतुर्थे गुरौ सति द्विजोच्चारितोपि
अपठितो वेदघोषो वेदो क्तो आशीर्वादिमंत्रध्वनिः तद्वत् एव

गृहद्वारतो वाजिहेषाघोरुच्चारितशब्दः श्रूयते ॥ लिङ्थैल
ड् ॥ प्रतिस्पर्धिनः शत्रवोपि परिचर्यां सेवां कुर्वते ॥ तथाप्य
न्नर्गलमनस्तस्य सोद्वेगं स्यात् असंतोषादिति भावः ॥ ४ ॥
अथ पंचमभा० गुरुफ० ॥ बुद्धिगे पंचमस्थे देवपूज्ये सति वि
लासे भोगे मतिः ॥ जल्पको वक्ता ॥ कल्पकलार्कि को लेखकः सु
लिपिः ॥ फलस्य पक्वकाले फलोपद्रवकार्यविघ्नः ॥ सुते विद्यमाने ॥
सहाय भूतेपि निदाने परिणतस्यैव भूतिर्धनसमृद्धिर्भवेदिति विशे
षः ॥ ५ ॥ अथ षष्ठभावगतगुरुफलम् ॥ रिपौ षष्ठे वाक्पतौ जीवे रु
जार्त्तो रोगपीडितोपि शत्रुहंतृत्वं शत्रुहननसामर्थ्यमेति प्राप्नोति ॥
वलाद्धुद्धतो रणे तस्य कोजेता न कोपि पराजयकर्त्तेत्यर्थः ॥ महि
ष्यादिभिः सर्वभोगभाववेत्ता यस्य स तथा ॥ मातुलानां नतद्धर्म

॥ विलासे मतिर्बुद्धिगे देवपूज्ये भवेज्जल्प
कः कल्पको लेखवैदं ॥ ऊर्ध्वं ३ कृ ३ विद्यमाने
विभूतिः फलोपद्रवः पक्वकाले फलस्य ॥ ५ ॥
रुजार्त्तो जनन्या रुजः संभवेयुः रिपौ वाक्प
तौ शत्रुहंतृत्वमेति ॥ वलाद्धुद्धतः को रणे
तस्य जेता महिष्यादिशर्मा न तन्मातुला
नाम् ॥ ६ ॥ मतिस्तस्य वह्नी विभूतिश्च व
ह्नी रतिर्वै भवेद्भामिनीनामवह्नी ॥ गुरुर्ग
र्वरूपस्य यामित्रभावे सपिंडाधिकोखंड
कन्दर्परात्र ॥ ७ ॥ चिरन्नोवसेत्पेत्रकेचैव
गेहे चिरस्थायि नो तद्गृहं तस्य देहम् ॥ चिर
न्नो भवेत्तस्य नीरोगमंगं गुरुर्मृत्युगो यस्य वै
॥ कुण्ठगन्ता ॥ ८ ॥ ००:ःःःः ॥

जनन्या मातुः रुजो रोगाः संभवेयुः ॥ ६ ॥ अथ सप्त० भा० गु० फलम् ॥
जामित्रभावे सप्तमे यस्य गुरुः तस्य वह्नी मतिः ॥ विभूतिश्च धनादि
समृद्धिः वह्नी ॥ वहुलाभामिनीनां रतिः प्रीतिः स्मरतः ॥ अवक्रास्वस्था
गर्वकृद्दर्पमानवान् सपिंडाधिको गोत्रजैः सवल अर्थेषु सौंदर्या
दिगुणपूर्णः ॥ कन्दर्पः काम एव भवेदित्यस्य सर्वत्रान्वयः ॥ ७ ॥
अथाष्टमभावगतगुरुफलम् ॥ यस्य मृत्युगोष्टमस्थो गुरुः स नरः
पेत्रके गेहे चिरं चिरकालं नोवसेन्न तिष्ठेत् ॥ वैकुंठगंता देहांते वि
ष्णुलोकगामी ॥ वपुरेव कारोप्यर्थे तस्य देहे शरीरमपि नो ॥ तद्गृह
कृतमपि गृहं न चिरस्थायी वहुकालमेकत्रावासी चिरंजीवी वाने
त्यर्थः ॥ तथा तस्यांगं निरोगं रोगरहितं चिरं नो भवेत् ॥ ८ ॥ [illegible]
वमभावगतगुरुफलम् ॥ धर्मगे नवमस्थे गुरौ भूमिपतेर्वल्लभो ॥ मद
लस्य नो मदेना नववाधेनालस्येन च ॥ धर्मवैगुण्यकारी संध्याव
दनादि नित्यकर्मणो विलोपकर इति शेषः ॥ ९ ॥ अथ दशमभाव

गतगुरुफलम् ॥ ध्वजामंडपे ध्वजाशोभिते जनाद्ये सभास्थानं चि
त्रशालं नानाचित्रसहिता शाला क्रीडार्थं आगृहा यस्मिंस्तन्नमंदिरं =
भवनम् ॥ पूर्वजेभ्योपि पितुस्त्वेजोधिकत्वं प्रतापाधिकत्वं ॥ उभये
भ्योपि स्वस्वतेजस्वित्वं वा स्यादितिशेषः ॥ तथा पुत्रकानां शर्मणां
9 सुखेन तुष्टो न भवेत् सुतद्वेषी स्यादित्यर्थः ॥ प्रत्यहं प्रतिदिनं प्र
स्थं षोडशपलपरिमितं सामुद्रलवणं यस्मिन्नै वैनेत् ॥ प्रत्यहं
प्रतिदिनमन्नं तन्महानसे पचेत् बहून्भोजयेदितिशेषः ॥ इदं फ
लं दशमे गुरावितिप्रकरणात्तेयं ॥ अथवा ध्वजामंडप इत्य
त्र गुरौ कर्मगे इतिवा पाठः ॥१०॥ अथैकादशभा० गुरुफलम् ॥
लाभगे गुरुश्चेत्किमु कुप्यं स्वर्णरूप्यादि न लभ्यं अपितु सर्वं ल
भेत् ॥ अन्ये प्रसिद्धा अश्वमुनीन्द्रा इंद्राद यो वैयाकरणास्तेधी

॥ चतुर्भूमिकं तद्गृहं तस्य भूमीपतेर्वल्लभो
वल्लभाभूमिदेवाः ॥ गुरौ धर्मगे बांधवाः
स्सुविनीताः सदा तस्य तो धर्मवैगुण्यका
री ॥९॥ ध्वजामंडपे मंदिरं चित्रशालं पि
तुः पूर्वजेभ्योपि तेजोधिकत्वं [illegible] ॥ न तु
ष्टो भवेच्छर्मणा पुत्रकाणां पचेत्प्रत्यहं प्र
स्थसामुद्रमन्नम् ॥१०॥ अकुप्यं च लाभो
गुरौ किं न लभ्यं वदंत्यश्वधीमंतमन्येमु
नीन्द्राः ॥ पितुर्भारभृत्स्वांगजास्तस्य पंच
परार्थं न दर्थो न चैवं भवाय ॥११॥ य
शः कीदृशं सद्व्यये साभिमाने मतिः कीदृशी
वंचना चेत्परेषाम् ॥ विधिः कीदृशो धीस्य
नाशो हियेन त्रयस्ते भवेयुर्व्यये यस्य रोदः ॥१२॥

मंतमस्थावधानं वा वदंति ॥ पितुर्भारभृत्त्र पितुः पोषकः त
स्स्वांगजा औरसपुत्राः पंचस्युः ॥ तदर्थं लब्धं न परार्थः अन्य
भोगाय न वै भवाय दान धर्म भोगार्थं न भवेदित्यर्थः ॥ कार्पण्य
स्यादितिभावः ॥ पितुर्भारभृत्त्यस्वर्गीयसमितिपाठो वा ॥११॥
अथ द्वादशभावगतगुरुफलम् ॥ यस्य व्यये द्वादशे जीवश्चे
त्तस्य साभिमाने सवर्गे सद्व्ययेपि कीदृशं यशोपि त्यपशूण
वापरेषां वंचने या मतिः सा कीदृशी ॥ किंतु कुबेरएव ॥ ये
नार्थस्य परमार्थरूप परलोकस्य नाशो दृष्याद्भयानि वी
स्तकीदृशो विधिरविधिरेवेत्यर्थः ॥ ते त्रयः सवर्गे बंधुर्वि
विमयककव्ययः परवंचकता अविधिनाद्रव्यत्यागः एवं एते भ
वेयुः ॥१२॥ इति चमत्कारचिंतामणौ गुरोर्लग्नादिभावफ
॥ लम् ॥१२॥ शुभमस्तु ॥

अथ भृगोरुच्चादि द्वादशभावफलान्याह ॥ यस्य समीची
नस्थानादिषट्कलोद्भवः शुक्रो लग्नवर्ती तदांगसुंदरस
मीचीनं ॥ संगः सत्संगः समीचीनानाम् सौंदर्य चातुर्यादि
गुणयुतानाम् ॥ वक्रांगनानां कुलीनांभोगेन युक्तः ॥
समीचीनानि विपुलानि कर्माणि यज्ञदानादीनि यस्य समी
चीनानि इहपरत्र वा विषयभोगात्मक तत्कर्मफलानि
यस्य सम्भवेदिति शेषः ॥१॥ अथ द्वितीयभा० शु० फलम् ॥
यस्य कुटुंबस्थितो धनस्थः पूर्वदेवस्य पूज्यः तस्य सुखं
चारुभाषं सुवाणीकं ॥ मनीषापि चार्वी कुशाग्रा ॥ ध
र्मिष्ठः वा सुखं विषयजं चारु नानाप्रकारः ॥ वासांसि चा

॥ समीचीनमंगं समीचीनसंगः समीची
नवक्रांगनाभोगयुक्तः ॥ समीचीन
कर्मा समीचीनशर्मा समीचीन शुक्रो
यदा लग्नवर्ती ॥१॥ सुखं चारुभाषं
मनीषापि चार्वी सुखं चारु चारूणि
वासांसि तस्य ॥ कुटुंबस्थितः पूर्वदेव
स्य पूज्यः कुटुंबेन किं चारु चार्वंगि
कामः ॥२॥ रतिः स्त्रीजने तस्य नो वंधु
(√र्यस्य) नाशो गुरुर्दुश्चिक्य गोदानयानाम् ॥
न पूर्णो भवेत्पुत्रसौख्येपि सेनापतिः
कातरो दानसंग्रामकाले ॥३॥ महि
त्वेधिको यस्य तुर्ये सुरेज्यो जनैः किं
जितैश्चापरैः रूपतुष्टैः ॥ कयत्योष

रूणि विविधानि ॥ कुटुंबेन स्वजनेन किं चारुशोभानमपि
तु न [illegible] चित् ॥ चार्वंगीकामसु वनिताभिलाषः स्यात् सु
रितियथासंभवं शेषः ॥२॥ अथ तृ० भा० शु० फ० ॥ यस्य दुश्चि
क्यागतस्तृतीयस्थो दानयानां गुरुः शुक्रस्तस्य स्त्रीजने रतिः ॥
प्रीतिर्नो ॥ वंधुनाशः किमुत तत्सुखं ॥ तथा पुत्रसौख्ये पूर्णो
जातमनोरथो ना ॥ सेनापतिरपि दानसंग्रामकाले कात
रोप्यसौ भवेदिति सर्वत्र शेषः ॥३॥ अथ चतुर्थभावग
तशुक्रफलम् ॥ यस्य तुर्ये भावे चतुर्थे असुरेज्यो भ
गुः समहित्वे उत्सवित्वे पूज्यत्वे वाऽधिको भवेत् ॥ रू
पतुष्टैः अन्यैर्दयालुभिर्वा जितैः स्त्रीयैरपरैश्च जनैः

किंजनोधीनैः स्वाश्रितजनैरर्थिनोपायनैर्दत्तोपहारैरेवपू
र्णैः स्तः ॥ जन्मतः स्वजन्मारभ्य मातुः किं यदपरिमितं स
न्मुखं पोषयेदतिशयेन कुर्यात् ॥४॥ अथ पंचमभा॰ शु॰
10 फ॰ ॥ यस्य पुत्रे पंचमभावे शुक्रे न सपुत्रोपि किं पुत्रजन्मफ
लं नेत्यर्थः ॥ येन न संपादितोर्थः तेन प्रयासेन परिश्रमेण
पि किं व्युदर्कं विशिष्टोत्तरफलं ऐश्वर्यादिरूपं उदरतृप्तिम
नःसंतोषरूपं वा विना मंत्रमिश्रणाभ्यां मंत्रजपेन मिश्रा
हारेण वा ॥ यदध्ययनात्कवित्वे काव्यकरणे मतिः ॥ नचे
त्तेनाधीतेनापि किं अर्थात्पंचमे शुक्रे सफलं ॥ पुत्रजन्मा
र्जकप्रजन्यैश्वर्यकारको मंत्रजपलब्धिमन लोषका
रको त्तम भोजनसामग्री ॥ काव्यकरणसामर्थ्याध्ययनं

॥ येजन्मतः संजनन्त्या अधीनार्पितोपा
यनैरेव पूर्णः ॥४॥ सपुत्रेपि किं यस्य शु
क्रो न पुत्रे प्रयासेन किं यन्न संपादितार्थः ॥
व्युदर्कं विना मंत्रमिश्राशनाभ्यामधीते
न किं चेत्कवित्वे न शक्तिः ॥५॥ सदा दान
वेज्ये सुधासिक्तमत्रु व्ययः शत्रुगे चोत्त
मौ तौ भवेतां ॥ विपद्येत संपादितं चा
पि कृत्यं तपेन्मंत्रतः पूज्यतो स्वयं न धत्ते ॥६॥
कलत्रे कलत्रात्सुखं नो कलत्रात्कलत्रं
तु शुक्रे भवेद्रत्नगर्भं ॥ विलासाधिको
गण्यते च प्रवासी प्रयासोल्पकः केन सुखं तितस्मात् ॥७॥

च भवेदित्यर्थः ॥५॥ अथ षष्ठभा॰ शुक्रफ॰ ॥ दानवेज्ये शुक्रे
शत्रुगे षष्ठस्थे सुधासिक्तं अमृतसेवितं अमरवद्दृढः ॥ निवा
रणीय हृति यावत् ॥ व्ययो द्रव्यत्यागः सो चोत्तमौ भवेतां
स्वतो यातिगुणक्रियाभिः श्रेष्ठौ ॥ रिपुसन्मार्गद्रव्यश्रमभवेदि
त्यर्थः ॥ च पुनः संपादितकृतकृत्यं कार्यं विपद्येत नश्येत ॥ मं
त्रतः कुमंत्रान्जपेत् संतापमाप्नुयात् ॥ पूज्याद्गुरोः पूज्यादथवा
सौख्यं न धत्ते ॥६॥ अथ सप्तमभा॰ शु॰ फ॰ ॥ कलत्रे सप्तम
स्थे शुक्रे सति कलत्रात् वनितायाः सुखं कलत्रात् कोणीप्रदेशा
त्सुखं कटिव्यथा भवेदित्यर्थः ॥ कलत्रं श्रोणिभार्ययो रि
त्यमरकोशात् ॥ कलत्रं स्त्रीरत्नगर्भं सपुत्रगर्भा भवेत् ॥ विला
साधिकोति क्रीडः ॥ प्रवासी विदेशगमनशीलः ॥ प्रयासेल्प
कः स्वल्पोद्यमो गण्यते कथ्यते ॥ तथा केन गात तस्माद पुरुषा

न्नमुद्यंति तद्यातु यमो हितात्मुलत्सवे ॥७॥ अथ अष्टम० भा० फु० ॥
जनमुद्यंति तद्यातु यमोहितात्मुलत्सवे ॥ अष्टमे दैत्यपूज्यः शुक्रश्चेत्तु ष्यदां गोष्वादी
जनु खि जन्म सप्तमये अष्टमे दैत्यपूज्यः शुक्रः अनु ष्यदां गोष्वादी
नां मुखं भमेत् ॥ तथा चेत्कुवादी दुष्टवक्ता ॥ चिरं वहुकालं चारुसुखे
नैव जीवेत् ॥ जयो अर्थश्च कष्टसाध्यो यत्नेन साध्यः ॥ धनर्ण
उत्तमर्णत्वेनाधमर्णाय दीयमानं पुनर्वर्द्धते ॥८॥ अथ नव० भा०
उत्तमर्णत्वेनाधमर्णाय दीयमानं पुनर्वर्द्धते ॥ ८॥ अथ नव० भा० शु
शुक्र फलम् ॥ त्रिकोणे नवमे भृगौ तन्नगरे के पुरवासि
पौराः पुरवासिनः कुसीदेन वृद्धिजीविकया वृद्ध्यै न ददीरन् तेके
तस्य रे तदधमर्ण व्यतिरिक्तान संतीत्यर्थः ॥ तथा तस्य धर्म
ध्वजादेः दांभिकत्वाद्धेतोर्गृहं त्रायते प्रसिद्धेति शेषः ॥ सहो
ध्यादिभिर्भातृभृत्यैः सौख्यं शरीरसुखं च भवेदिति शेषः ॥ ध
र्मध्वजी लिंगवृत्तिरित्यमरः लिंगं तद्धर्मि वेषधारिणाम् ॥९॥

॥ जनः कुवादी चिरं चारु जीवेद्यत्नु ष्यात्सुखं
दैत्यपूज्यो ददाति ॥ जनुष्यष्टमे कष्टसा
ध्यो जयार्थः पुनर्वर्द्धते दीयमानं धनर्ण
म् ॥८॥ भृगौ त्रिकोणे पुरे केन पौ
राः कुसीदेन ये वृद्धिमस्मै ददीरन् ॥ गृ
हं त्रायते तस्य धर्मध्वजादेः सहोत्थादि
सौख्यं शरीरे सुखं च ॥९॥ भृगुः कर्म
गो गोत्र वीर्यं रुणद्धि त्वपार्थं भ्रमः कि
न्त्वात्मीय एव ॥ तुलामानतो हाट
कं विप्रवृत्त्या जनाडुंबरैः प्रत्यहं वावि
॥ वादात् ॥१०॥

अथ दशम० भा० शु० फलम् ॥ कर्मगो दशमस्थो भृगुर्गो
त्र वीर्यं वंशबीजं संतानवीजं किं ना न रुणद्धि ॥ आत्मीयः
स्वकीय एव भ्रमो नीतिविस्मरणरूप श्चित्तविक्षेप इत्यर्थः ॥
द्रव्यनाश न वा किं ॥ प्रत्यहं विप्रवृत्त्या ब्राह्मणजीविकया
शा८ जनाडुंबरैः प्रतिष्ठार्थं स्थापित पारिपार्श्वकैर्विवादाद्धा
टकं सुवर्णं तुलामानतः शतपलपरिमितं न वा किं
मपि तुल्यं फलं सर्वं स्यादेवा ॥ जानकीय प्रवृत्तिरिति पा
ठे तुलामानतः सवत्समानेन जानकीय पितृसंबंधि
नी प्रवृत्तिर्वृत्तिर्न किम् ॥१०॥ अथैकादशभा० शु० फलं ॥
यस्य लग्नात् लाभग एकादशस्थो लाभदो द्रव्यलाभ
कारी भृगुलन्नरं सुष्वीलं गुणाढ्यं गुणैर्युतं लसत्का

तिसत्याऽनुरागं कीर्तिसत्यावाक्परलोकरंजनादिभिः शो
भितं महाभाग्यं उत्तमं भाग्यवंतं ऐश्वर्ययुक्तं ॥ अभुक्त्वाहव
मेताहशूं सम्यक् महीपं राजानं कुर्यात् ॥ खलतास्तस्मात्
वधक एव गोव फलं स्यात् ॥११॥ अथ द्वादशभा० शु० फ०॥
द्वादशो सितः शुक्रो हो केलिसत्कर्मशर्मक्रीडासद्यज
नितं सौख्यं गुणानां कीर्तेश्च तथैं नाशं ॥ मित्रवैरं जनानां
विरोधं कलहं सदा करोति ॥ तथा कदापि वित्तमेति धनं
प्राप्नोति ॥ वित्तं विलीयेत् लीनं स्यात् ॥ कफादिकं स्यादि
त्यर्थः ॥ नित्यमिति कचित्पाठः ॥१२॥ अथ शनेर्लग्नादि
द्वादशभावफलान्याह ॥ तनुस्थे लग्नजेऽर्कजे [illegible]नोधनेना

॥ अगुर्लोभगो लाभदोयस्य लग्नात्सुरू
पं महीपं च कुर्याच्च सम्यक् ॥ लसत्की
र्तिसत्यानुरागं गुणाढ्यं महाभोगमैश्व
र्ययुक्तं सुशीलम् ॥११॥ कदाप्येति वि
त्तं विलीयेत वित्तं सितो द्वादशो केलि
सत्कर्मशर्म ॥ गुणानां च कीर्तिः तथैं
मित्रवैरं जनानां विरोधं सदासौ करो
ति ॥१२॥ धनेनातिपूर्णोऽतितृष्णा
विषादी तनुस्थेर्कजे स्थूलदृष्टिर्न
रः स्यात् ॥ विषं दृष्टिजं त्यादिकं व्या
धिबाधाः स्वयं पीडितो मत्सरावेश एव ॥१॥
सुखापेक्षया वर्जितो सौकुटुंबात्कुटुंबे
शनौ वल्गु किं किं न भुंक्ते ॥ समं वाक्के

तिपूर्णः अतितृष्णसंतोषहीनः विषादी अप्रसन्नः स्थूलद
ष्टिः सूक्ष्मविचारासमर्थः ॥ दृष्टिजं विषं दृष्टेरेव रिपुनाशु
कः ॥ आधिं मानसं दुःखं करोतीति दृग्व्याधिबाधा वा ॥
तदा पीडा मत्सरावेशः ॥ परोत्कर्षासहिष्णुः सन् स्वयमे
व पीडित उद्वेगवान् स्यात् ॥१॥ अथ द्वितीयभा० शु०
फलम् ॥ कुटुंबे द्वितीये शनौ सौ पुरुषः सुखापेक्षया सुखलो
भेच्छया कुटुंबात्स्वजनाद्वर्जितो वियुक्तः अन्यदेशप्राप्त इ
त्यर्थः ॥ किं किं वल्गु न भुंक्ते अपितु सर्वविषयभोगवा
न्स्यात् ॥ तथा असक्तिं परिचर्यां विना लोहकं घाटितं शु
स्त्रीपानादि भवधातु वा सुवर्णं वा हिरण्यं लोहमित्यादि

ने घं दृक्के कोलभेत किं सर्वथेत्यर्थः ॥ मित्राणि सत्यं सा॰ इति तिक्तं दुः
सहं वचो वाक्यं वक्ति वदति ॥२॥ अथ तृती॰ भा॰ श॰ फलम् ॥ तृ
तीये शनौ जनात्सहजादेऽथवा भ्रातुः पराक्रमाच्च चित्तं मनः शीतलं शां
तं नैव जायते ॥ भाग्यलाभाय दृष्टं अविघ्नं विघ्नरहितं कर्हिचित्
कदापि नैव भवेत् ॥ युक्तभाषी मितवक्ता ॥ दृढश्रो अचलत
मः अत एव सुधी सत्कृतोपि दुर्मुखो मुखरो भवेत् ॥३॥ अथ
चतुर्थ भा॰ श॰ फ॰ ॥ चतुर्थे शनौ पैतृकं पितृसंबंधि धनं मं
दिरं गृहं दूरं याति नाश्यत्यगृहस्थ[illegible]स्यात् ॥ बंधुवर्गापवादो
बंधुनिन्दा ॥ गृहे वाहने हानयो नाशा गृहहानि वाहनहानिश्च ॥
पितुः मातुश्चापि संतापकारी ॥ वातरोगी स्यादिति शेषः ॥४॥

॥ मित्रेण तिक्तं वचोपि प्रसक्तिं विना लोहकं
कोलभेत् ॥२॥ तृतीये शनौ शीतलं नैव
चित्तं जनादुद्यमाज्जायते युक्तभाषी ॥
अविघ्नं भवेत्कर्हिचिन्नैव भाग्यं दृढश्री
सुधीर्मुखः सत्कृतोपि ॥३॥ चतुर्थे
शनौ पैतृकं याति दूरं धनं मंदिरं बंधुव
र्गापवादः ॥ पितुश्चापि मातुश्च संतापका
री गृहे वाहने हानयो वातरोगी ॥४॥ शनौ
पंचमे च प्रजाहेतुदुःखी विभूतिश्च लाभ
स्य बुद्धिर्न शुद्धा ॥ रतिर्दैवते शास्त्रशास्त्रे
न तद्वत्कलिर्मित्रतो मंत्रतः क्रोडपीडा ॥५॥
अरेर्भूपतेश्चोरतो भीतयः किं यदीनस्य
पुत्रो भवेद्यस्य शत्रौ ॥ न युद्धे भवेत्सन्मुखं
तस्य योद्धा महिष्यादिकं मातुलानां विनाशः ॥६॥

अथ पंचम भा॰ शनि फलम् ॥ पंचमे शनौ प्रजाहेतु दुःखी संतान
निमित्तक्लेशभागी ॥ विभूति धनसमृद्धिश्च लाभस्थिरा बुद्धिर्न
शुद्धा कुटिलेत्यर्थः ॥ दैवतं देवविषये धर्मशास्त्रे धर्मप्रतिपाद
के वेदस्मृत्यादौ न रतिः प्रीतिर्विश्वास इति यावत् ॥ तद्वन्मंत्र
तो विचारविषये ॥ मित्रतो मित्रेण कलिः कलहः ॥ क्रोडपीडा
कुक्षिक्लेशः हास्यं स्यादिति शेषः ॥५॥ अथ षष्ठ भाव॰ श॰ फ॰ ॥
यस्य षष्ठे रिपुभवने इनस्य सूर्यस्य पुत्रो यदि भवेत् तस्यारेः श
त्रोर्भूपतेश्चोरतः सकाशाद्भीतयः किं अपितु न लेनेत्यर्थः ॥ यु
द्धे रणे वादे योद्धा प्रतिवादी सन्मुखं न भवेत् ॥ बलाद्भ्रितः को
रणे तस्य जेता इति वा पाठः सुगमार्थः ॥ महिष्यादिकं गोधाविभिः
प्रभृति चतुष्पात्सुखं ॥ मातुलानां विनाशश्च भवेत् ॥६॥ शुभम् ॥

अथ सप्तमभा० शनिफ० ॥ शनौ द्यूनगे सप्तमस्थे सुदाराः शोभन-
स्त्रियः चारुमित्रं सुहितकारी चारुवित्तं न्यायवर्जितं धनं चिरं व
हुकालं न सहेत् तत्सुखं न भवेदित्यर्थः ॥ दंपती स्त्रीपुरुषावपि रो
गयुक्तौ स्यातामिति शेषः ॥ तथा अनुत्साहता तत्र कृत्ये स्तरं अनु
त्साही हीनचेता हीनं चेतो मानसं यस्य सः ॥ विकलः आर्के चित्त
रः लोलुपः अतितृष्णः कुतो वीर्यवान् स्यादिति सर्वत्र संबंधः ॥ ७ ॥
अथाष्टमभा० श० फ० ॥ रंध्रगे अष्टमस्थे शनौ अनौपाधिकानां
उपाधिरहितानां जनानां वियोगः सत्संगाभाव इत्यर्थः ॥ धनानां
विनाशो यस्य तस्यासकृत् ॥ तथा व्याधितः क्षुद्रदर्शी परदोषावेक्षि
तदग्रे अन्यो जनः कैतवं धूर्ततां किं करोतु महाधूर्तोऽस्तीति धूर्तविस्ता
दिति भावः ॥ ८ ॥ अथ नवमभा० श० फ० ॥ शनि धर्मगे नवमस्थ

॥ सुदारा न मित्रं चिरं चारुवित्तं शनौ द्यूनगे दं
पती रोगयुक्तौ ॥ अनुत्साहता स्याद्विकलो
न चेताः कुतो वीर्यवान्विकलो लोलुपः
स्यात् ॥ ७ ॥ वियोगो जनानां स्वनौपाधि
कानां विनाशो धनानां सकौ यस्य न स्यात् ॥
शनौ रंध्रगे व्याधितं क्षुद्रदर्शी तदग्रे जनः
कैतवं किं करोतु ॥ ८ ॥ मतिः स्यात्तिता
नतिक्तं तु शीलं रतिर्योगशास्त्रे गुणो राज
सः स्यात् ॥ सुहृद्वर्गतो दुःखितो दीनबुद्ध्या
शनिर्धर्मगः कर्मकृत् संन्यसेद्वा ॥ ९ ॥ अजा
मां धिपत्यात् ॥ शनैरे धते कर्मगः शर्मसं
दो जयो विग्रहे जीविकानां तु यस्य ॥ १० ॥ ५

॥ वित्ताशांक क्षिप्रं प्रणश्यतु वंदृश्यते दैवतो वा ॥ ॥ १० ॥

५ शनौ व्योमगे निंदते किं च माता सुखं शोभवं
दृश्यते किं तु पित्रा ॥ निधिं स्याच्चितो वा

श्रेतस्य मतिः स्तिक्ता विषयविरक्ता शीलं तु नतिक्तं कटुकम् ॥
योगशास्त्रप्रतिपादकग्रंथे रतिरभ्यासो ॥ राजसो गुणो रजः प्र
कृतिः दीनबुद्ध्या एते दीना मित्रबंधुवर्गा इत्येवं रूपधाः सुहृ
द्वर्गतो दुःखितः कृपालुत्वात् ॥ खिन्नमना अतएव शर्म
कृतस सर्वेषां सुखकारी स्यात् ॥ संन्यसेद्वा पतिरेव स्यात् ॥ ९ ॥
अथ दशमस्थ शनिफ० ॥ यस्य कर्मगो दशमस्थो मंदस्तस्य मा
ता च ख्यागी मातुरभावे नत स्यादेव दुग्धपानं स्यात् ॥ वाकृरेव
स्वभुजैरेव धनोपार्जकत्वेन पिता वाल्पएव तत्पित्रोर्नीशो
भवेदिति भावः ॥ तथा आधिपत्याच्चो दृपालत्वाद्देहे तोर्वंपाति
कारणं सर्वतः सर्वलोकेषु दुष्ट कर्मता डनं दंडनौ शिक्षानैः
क्रमेण विग्रहे जयः ॥ सर्वमुपकण्ठु वर्धते ॥ जीविका जीव
नहत्तिस्तु स्वल्पचेतनात्वो हेतिभावः ॥ १० ॥ इति द० भा० श० फ० ॥

वो धाये दशमस्य शुभे नेमंतांतरमाह ॥ व्योमगे दशमस्थे शनौ
माता सुखं विंदते किं पित्रा जनकेन क्लेशं यं शिशोर्भावं बालक्रीड
नादि दृश्यते किन्तु नेत्यर्थः ॥ तथा तत्पित्रा स्यापि तो निषिद्धया
करः स्वयं यथा पिता सु बीजैः कृत्यादिता कृषिश्च दृश्यते ॥ दृश्यपनि
भित्ते नस्य चक्र परचक्रादिना देवतो जलाग्न्यादि भयेन वा ध्रुवं नि
श्चितं प्रणश्येत् ॥१०॥ अथैकादशभा० श्लो० फ० ॥ लाभगे भानु
पुत्रे वित्तं स्थिरं निश्चलम् ॥ आयुः स्थिरं मान संचः स्थिरं स स्यरो
गादयो नैव स्थिरा रोग्य स्यादित्यर्थः ॥ अपत्यानि संताना
नि न स्थिराणि संतान शोकः स्यादिति भावः ॥ शतात्र्चेत सं
ख्यमनुष्येभ्योपि प्रपंचाधिकः ॥ रागद्वेषोपाधेर्विशिष्ट एको
मुख्यः शूरः स्यात्स्फुरितिषथार्थ श्लोकः ॥११॥ अथ द्वादश

॥ स्थिरं वित्तमायुः स्थिरं मानसंचः स्थिरा
नैव रोगादयो न स्थिराणि ॥ अपत्या
नि शूरः शतादेक एव प्रपंचाधिके लाभ
गे भानुपुत्रे ॥११॥ व्ययस्थे यदा सूर्य
सूनौ नरः स्यादसूरोपवा निर्लज्जो मंद
नेत्रः ॥ प्रसन्नो बहिर्नो गृहे लग्नपश्च
व्ययस्थो रिपुध्वंसकृद्यज्ञभोक्ता ॥१२॥
स्ववाक्ये समर्थः परेषां प्रतापात्प्रभा
वात्समाह्लादये स्वान्परार्थान् ॥ तमो
यस्य लग्ने सभग्नारिवीर्यः कलत्रे ध
तिं भूरि दारो विधायात् ॥१॥ कुटुंबे
तमो नष्टमूलं कुटुंबं मृषाभाषितं निभ
यो वित्तपालः ॥ स्ववर्गप्रणाशो भयं श
लोलत्र्चे द वपूर्ष स्वलेभ्यो लभेत्यारवष्टं ॥२॥

॥ इति चमत्कारचिंतामणिमूलं ॥

॥ भाव: ॥८॥

भा० श्लो० फ० ॥ व्ययस्थे द्वादशे यदा सूर्यसूनौ शनौ असूरः
कातरो न निर्भयः ॥ निर्लज्जो निर्लज्जः ॥ मंदनेत्रो मंददृष्टिः ॥
बहिः परदेशे प्रसन्नो गृहे नो प्रसन्न इत्यर्थः ॥ च पुनर्लग्नपो
लग्ननाथो व्ययस्थो द्वादशस्थानगतं सन् ॥ रिपुध्वंसकृत्
शत्रुनाशकरः ॥ यज्ञभोक्ता यज्ञद्रव्येन वै भवसमृद्धिरि
तिश्लोकः ॥१२॥ इति चमत्कारचिं० टीका० शनेस्त० द्वादश० ॥
अथ राहोर्लग्नादि भा० फलान्याह ॥ यस्य लग्ने तमो राहुः
सन् सो भग्नारिवीर्यः पराजितशत्रुः ॥ स्ववाक्यपालने परे
षां प्रतापात्त्वत्तेजसा न समर्थः ॥ परेषां प्रभावात्स्वात्र स्वया
नीयान् परार्थान् परस्वामीय आह्लादयेत् आत्मसात्तं कुर्या
त् ॥ भूरिदारोबहुस्त्रीकोपि कलत्रे स्त्रीविषये अधृतिं असं

तोषं यायात् ॥ कामाधिकः स्यादिति भावः ॥१॥ अथ द्वितीयभाव
रा० फ० ॥ कुटुंबे द्वितीये तमो राहुश्चेत् कुटुंबं स्वबंधुजनं नमूतं अत
एव खलेभ्यो दुष्टजनेभ्यो हेतोरवश्यं पारवश्यं पराधीनत्वं कारागृहनि
वासित्वं वा शस्त्रतो भयं च लभेत् ॥ तथा मृषाभाषितं मिथ्याभाषितं ॥
निर्भयं भयरहितः ॥ वित्तपालोद्ध्यरक्षकः कृपण इतियावत् ॥ स्व
वर्गप्रणाशो बंधुनाशो भवेदिति शेषः ॥२॥ अथ तृ० भा० राहुफलम् ॥
दुह जन्मनि तृतीये सिंहीसुते राहौ भुजाविक्रमेण बाहुबलेन नागो
हली अथवा सिंहस्तत्समलं तुल्यं तं न प्रयाति ॥ जगद्वै लोकं सोद
रत्वं भ्रातृभावं समेति ॥ तथा भाग्यं प्रयातोपि प्राप्तभाग्योपि यत्नहे
तुः यत्नस्योद्यमहेतुः कारणं कुतः कथं स्याद् लाभो भवेदित्यर्थः ॥३॥

॥ न नागोथ सिंहो भुजो विक्रमेण प्रयाती हि
सिंहीसुते तत्समत्वम् ॥ तृतीये जगत्सोद
रत्वं समेति प्रयातोपि भाग्यं कुतो यत्नहेतुः ॥३॥
चतुर्थे कथं मातृतो राज्यदेहो हृदि ज्वालया
शीतलं किं बहिः स्यात् ॥ सचेदन्यथा मेष
गो कर्कगो वा बुधर्क्षे सुरो भूपतेर्बंधुरेव ॥४॥
सुते तत्सुतोत्पत्तिकाले सिंहिकायाः सुतो भा
मिनीचिंतया चित्ततापः ॥ सति क्रोडरोगे
किमाहारहेतुः प्रपंचेन किं प्रापकादृष्टवर्ज्यं ॥५॥

अथ चतुर्थभावगतराहोः फलम् ॥ चतुर्थे असुरो राहुश्चेन्मातृतोने
राज्यदेहो मातुर्देहारोग्यं कथं स्यान्नेत्यर्थः ॥ हृदि ज्वालया म
नः संतापेन बहिः शरीरमपि शीतलं किं स्यात् ॥ स्वयं चाव्याधि
युत इत्यर्थः ॥ अथ मेषगो कर्कगो मेषवृषकर्कराशिस्थो बुध
र्क्षे कन्यामिथुनयोर्वा स राहुश्चेदन्यथा तन्मफलः तद्वदेवाह ॥
भूपतेर्बंधुरेव अतिप्रियः स्यात् इति पूर्वेणान्वयः ॥४॥ =
अथ पं० भा० राहुफलम् ॥ सुते पंचमभावे सिंहिकायाः सुतो
राहुस्तत्सुतोत्पत्तिकाले ॥ भामिन्याः सक्रोधाया वनितायाश्चिंत
या चित्ततापः ॥ कोपना सैव भामिनीत्यमरः ॥ क्रोडरोगे कुक्षि
व्याधौ सति आहारस्य हेतुः कारणं औषधादिकं न किमपि ॥
अर्थात् कुक्षिरोगो अग्निमांद्यं च प्रापकादृष्टवर्ज्यं० लाभकारदैवं
विना प्रपंचेन यत्नविस्तरेण किं प्रयासो भयात्तत्र तस्य लाभश्च
भवेदिति सर्वत्रान्वयः ॥५॥ अथ षष्ठभावगतरा० फलम् ॥
येषां जनानां वैरिभावे षष्ठे स्थितो राहुस्तद्रिपूणां मदरूपमपि
देहे देवा शत्रुसंघातं नाशयेदित्यर्थः ॥ तथा बलं देहिकं बुद्धि
वीर्यं चातुर्यं तद्वशेन बलाद्या लेशपवशाद्गमनं धनार्जनं ॥

स्थिरं मानसं नो मातुः पितुर्वा श्चनो मनश्चंचलं मातृपित्रोः सुखं भा
वश्च स्यादिति सर्वत्र शेषः ॥६॥ अथ सप्तमभा॰ रा॰ फ॰ ॥ द्यूने सप्तमे
चंद्रमर्दी राहुश्चेत् कुटाहे स्यात्पित्नी इति शेषः ॥ जातवेदाः अग्निर्यथा
लोड्येत् संतापयेद्दैवं विधातुपाकादि रुजा रोगेन तद्युवत्या विनाशं ल
लोड्येत् संतापयेदेवं विधातुपाकादि ॥ वियोगाः बंधुविश्लेष दुःखानि ॥ अप
मेयुः तथा वियोगापवादः ॥ शामं शांतिं न प्रयाति ॥७॥ अथाष्टम भा॰ रा॰ फ॰ ॥
वादे लोकनिन्दा शामं शांतिं न प्रयाति ॥ राहुः अमर्षं पितृकृत् अमेणव बहुप्रयासेन
रंध्रगोऽष्टमस्थो वधूशत्रुः राहुः श्रममग्रं पितृकृत् श्रमेण बहुप्रयासेन
गंधि यातगोलकं कृरो नास्ति कृत् ॥ च पुनस्तं नरं जनास्त्यजंति ॥
यथा जनस्वेदं जातकं धनं पितृव्यं नृपैः राजभिः पंडितैश्च वंदितः पू
जितः ॥ स्वैर्जनैर्निंदितश्च ॥ भाग्यलाभः सकृदेकवारमेव भ्रंशः ॥

॥ बलं बुद्धिवीर्यं धनं तद्द्रुशोनाऽस्थितो वैरिभावे
विधेयं जनानाम् ॥ रिपुणामरण्ये दहेदेव
राहुः स्थिरं मानसं तुलानो पितृव्याः ॥६॥
मा^ विनाशं लभेद्युद्धुनो तद्युवत्यो रुजा धातुपा
कादिना चंद्रमर्दी ॥ कुटाहे यथा लोड्ये
जातवेदा वियोगापवादः शामं न प्रजाति ॥७॥
नृपैः पंडितैर्वंदितो निंदितः स्वैः सकृद्भा
ग्यलाभो सकृद्भ्रंश एव ॥ धनं जातकं
तं जनाश्च त्यजंति श्रमग्रंथिकृद्रंध्रगो
वधूशत्रुः ॥८॥ मनीषी कृतज्ञस्त्यजे
द्बंधुवर्गं सदा पालयेत्स जितः स्याद्गुणैः
स्वैः ॥ सभाद्योतको यस्य चेत् त्रिकोणे
तमः कौतुकी देवतीर्थे दयालुः ॥९॥

कार्यहानिः सकृन्मुहुर्भवेदिति शेषः ॥८॥ अथ नवमभा॰ रा॰ ॥
यत्र त्रित्रिकोणे नवमे राहुश्चेत्स नरो मनीषी बुद्धिमान् ॥ स्वै
र्गुणैः पूजितो दयालुर्दयावान् ॥ देवतीर्थे ॥ कौतुकी सभा
यां द्योतकः प्रकाशकः स्यात् स[illegible]पकारं न त्यजेत् सदा बं
धुवर्गं पालयेत् ॥९॥ अथ दशमभावगत रा॰ ॥ खगे दश
मस्थे अगौराहो सति असौ जनैर्मदे जनवधान समये अर्थ
व्ययी क्रूरकर्मा अत एव जनैर्व्याकुलः ॥ सुखैर्नाधिशांते श
यनं कुर्यात् ॥ सदा म्लेच्छसंसर्गतो अतीवगर्वउच्चैर्मानि
नी कामिनी भोगं मानवती स्त्री मातिमुक्तां लभेत् ॥१०॥
अथैकादशभा॰ राहुफलम् ॥ लाभगस्तमो राहुश्चेत्स तोस
जि सौख्यं ॥ सदा म्लेच्छतोर्थं द्रव्यं च लभेत् ॥ साभिमानः ॥
कं करेण सेवके न चरेत् मत्स्यैर्विना न कुत्रापि गच्छेदित्यर्थः

विदेशं किं व्रजेत् किमर्थं गच्छेत् गृहस्थितएव सर्वतो लभेत्
इतिभावः ॥ धूर्ता बांधवो मित्राणि यस्य सः धूर्तानां बंधुवर्गेण
एवानर्थार्थैश्वर्य्येन सर्वानर्थकारी ॥ परार्थान् हरेत् गृहीयात् ॥
तत्र पात्रसवैं ददातीत्याशायः ॥११॥ अथद्वादशभा० फलम् ॥
14 द्वादशे तमोदीनतां पार्श्वशूलं क्रोडे वातपीडा ॥ खले मित्रतां
साधुलोके सज्जने रिपुत्वं शत्रुत्वभावं प्रयत्ने कृते नर्थतां स्वेष्ट
कार्ये वैपरीत्यं ॥ परिणामे मनोवांछितार्थस्य सिद्धिमातनोती
त्यस्य सर्वत्रान्वयः ॥१२॥ इतिच०टी०रा० ल० फलम् ॥१२॥
॥ सदाम्लेच्छसंसर्गतोतीवगर्वं लभेन्मानिनी
नीकामिनीभोगमुच्चैः ॥ जनैर्व्याकुलोसौ
सुखेनाधिपेते मदार्थव्ययीक्रूरकर्मा स्व
गेगो ॥१०॥ सदाम्लेच्छतोर्थं लभेत्स्वामि
मानश्वरे किंकरे गाव्रजेत्किं विदेशम् ॥
परार्थाननर्थो हरेद्भूर्तवंधुः सुतोस्वाभि
सौख्यं तमोलाभगश्चेत् ॥११॥ तमो
द्वादशे दीनतां पार्श्वशूलं प्रयत्नेकृते
नर्थतामातनोति ॥ खले मित्रतां साधु
लोके रिपुत्वं विरामे मनोवांछितार्थस्य
सिद्धिम् ॥१२॥ तनुस्थः शिखीबांधवक्ले
शकर्त्ता तथादुर्जनेभ्योभयंव्याकुलत्वं ॥
कलत्रादिचिंतासदोद्वेगताच शरीरेव्य
थानैकधामारुतीस्यात् ॥१॥ धनेकेतु
रव्यग्रता किंनरेशाद्धनेधान्यनाशो मु
खेरोगकृच्चं ॥ कुटुंबाद्विरोधो वचःसत्कृ
तंबाभवेत्स्वगेहे सौम्यगेहे तिसौख्यम् ॥२॥
अथकेतोर्द्वादशभावफलान्याह ॥ तत्रादौ तनुभा० फलम् ॥
मस्य जन्मकाले शिखी केतुः तनुस्थो लग्नस्थः बांधवै भ्रात
भिः क्लेशकर्त्ता कलहकारकः ॥ दुर्जनेभ्यो दुष्टजनेभ्यो भयं व्या
कुलत्वं मनोव्यग्रता ॥ कलत्रादिचिंता ॥ सदोद्वेगता उद्वेग
शरीरे देहे मारुतीवायुसंबंधिनी पीडा अनेकप्रकारा स्यादिति
र्थः ॥१॥ अथद्वितीयभा० के० फलम् ॥ धने द्वितीये केतुर्यस्य त
दा धनेद्रव्यविषये नरेशाद्राज्ञः सकाशाद्व्यग्रता ॥ धान्य
स्य आश्रितस्यान्नस्य नाशः ॥ मुखे रोगकरः ॥ कुटुंबात् मि
त्रादिभिर्विरोधः ॥ किंसकृतं वचः शोभनवाक्यमपि न स्वेग
हे मेषगते सौम्यगेहे कन्यामिथुनयोरिति सौख्यं भवेदिति



॥ ओं श्रीगणेशाय नमः ॥ नतिं कृत्वा गणेशाय विघ्नविध्वंसकारिणे । नि
र्विघ्नकृतिसार्थाय कमलापतये नमः ॥ १ ॥ हरिवंशकविः स्वार्थपरार्थं चु
स्वरोदये ॥ व्याख्यानं मातृकादीनां स्वराणां नामजन्मनाम ॥ २ ॥ गुरुभ्यो
वकुधाश्रुत्वा यथाज्ञानं यथाधिया ॥ जयलक्ष्मीरिति मया टीकाराज्ञी वि
रच्यते ॥ ३ ॥ अथ कविरानंदस्वरूपं ब्रह्म नमस्करोति अव्यक्तमिति ॥
अव्यक्तं करचरणादिलिनक्ष्मादिरहितं शांतं निर्गुणं योगिनां सनकादीनां
नितांतं प्रियं ॥ सर्वानंदस्वरूपं एवं सर्वगं सर्वव्यापिनं यद्ब्रह्म तस्मै न
मः ॥ १ ॥ पुनः सरस्वतीं नमस्करोति विविधविबुधवंद्यामिति विवि
धा ये विबुधा देवास्तैर्वंद्यां भारतीं सरस्वतीं प्रचुरचतुरभावं जनेभ्यो दातु
कामां वंद्यमानां नरपतिरिति लोके ख्यातनामा कविर्नरपतिजयचर्याना
मकशास्त्रं करोतीति ॥ २ ॥ अथ नरपतिकविः स्वदेशकुलव्याख्यापनं क
रोतीति ॥ विद्यालये मालवसंदेशे धारापुरी रम्यनिवासवासी ॥ ॥

ओं श्रीगणेशाय नमः ॥ मोहांधकारमग्नानां जनानां ज्ञानरश्मिभिः ॥
कृतमुद्धरणं येन तन्नौमि शिवभास्करम् ॥ १ ॥ अव्यक्तमव्ययं शां
तं नितांतं योगिनां प्रियम् ॥ सर्वानंदस्वरूपं यत्तद्देवब्रह्म सर्वगम् ॥ २ ॥
विविधविबुधवंद्यां भारतीं वंदमानः प्रचुरचतुरभावं दातुकामो जने
भ्यः ॥ नरपतिरिति लोके ख्यातनामाभिधास्ये नरपतिजयचर्याना
मकं शास्त्रमेतत् ॥ ३ ॥ कृते जयार्णवं नाम त्रेतायां ब्रह्मयामलम् ॥
द्वापरे विजयाख्यातं कलौ चैव स्वरोदय ॥ ४ ॥ ब्रह्मयामलमाद्यं स्या
द्द्वितीयं विष्णुयामलं ॥ रुद्रयामलमाख्यातं चतुर्थं चादियामलम् ॥ ५ ॥

नानागमज्ञो नृपलोकपूज्यो बुधः प्रसिद्धो नरदेवनामा ॥ २ ॥ स्वरबल
फलवेत्ता देहतत्त्वैश्च भिज्ञो विदितशकुनशास्त्रो तंत्रमंत्रप्रवीणः ॥
कलितलगालितसारासारचूडामणिज्ञो नरपतिरिति नामा तस्य पुत्रो ब
भूव ॥ २ ॥ ज्ञाने यः सर्वज्ञो नृपगणपूज्यः सरस्वतीसिद्धिः ॥ तेन कृतं शा
स्त्रमिदं प्रचुरगुणं दोषरहितं च ॥ ३ ॥ यो वेत्ति शास्त्रमेतद्गुरुमुखकलि
तं सयुक्तिसिद्धं च ॥ धनतिहितसदा समग्राकमलेन स्याद्विजयश्रीः ॥ ४ ॥
जित्वारिपुं नृपलक्ष्मीर्ददाति निजभूपतेर्न संदेहः ॥ एतत्काले बुध
भ्युतविधे चैव संग्रामे ॥ ५ ॥ श्रीमत्या सौवर्णनगरे ख्यातो श्री अ
जयपालनृपराज्ये ॥ श्रीपति नरपति कविना रचितमिदं तत्र संस्थे
ने ॥ ६ ॥ गौरांगीं नवयौवनां शशिमुखीं तांबूलगर्भाननां मुक्तामं
डनमुक्तमाल्यवसनां श्रीखंडचर्चांकिताम् ॥ इष्टाकामपि कामि
नीं स्वयमिमां श्रीलीं पुरो भावये दंतच्छिन्नपतो जनेऽस्य मनसि त्रै
लोक्यमुन्मीलिनां ॥ ७ ॥ इति नरपतिजयचर्यास्वरोदये कविप्र
शंसा ॥ अस्यार्थः सुगम एव ॥ व्याख्यानं न कृतं प्रयोजनाभावात् ॥ ८ ॥

न० त्रि० अथ ग्रंथकृद्ग्रंथकरणे स्वसामर्थ्यं प्रकटनं ग्रंथाध्ययनमाह ॥ श्रुत्वाग
ज० टी० विति ॥ ७ ॥ स्पष्टार्थः ॥ अथ स्वरसामर्थ्यं प्रधानतामाह ॥ पत्स्येति ॥ ८ ॥ स्व
रोदयी स्वरशास्त्रं सम्यक् जानातीति स्वरोदयी स्वरज्ञो ज्योतिषिकस्तेन
हीनो रहितः पत्स्य गजभूपालस्य वाहिनी दिग्विजयशीला राजा तस्य
विभंगमायाति संग्रामात् पलायते किं पुनः स्वल्पसैनिकः ॥ २२ ॥ अथ
स्वरबलसहितस्य राज्ञः सामर्थ्यमाह ॥ तावत्तरंति ते वीरा इति ॥ ते वीरा
भटाः स्वरज्ञपुत्राः स्वरबलाढ्या आहवसागरं संग्रामसमुद्रं तावदेव
दोर्भ्यां तरंति संग्रामपारं गच्छंति यावत्कालं अविघ्नं जयप्राप्तकं स्व
रबलं तिष्ठति तावद्बाहुभ्यां ब्रह्माविष्णुः रुद्रः दुर्गा गणेशः निवृत्ति प्र
वृत्ति शक्ति शांति शत्रुपातीन इच्छा मोह द्रोह मद मात्सर्य शब्द रूप रस
स्पर्श गंधाद्यधिष्ठितत्वाद् देव एव शत्रून् जयति किं पुनः खड्गादिशस्त्रसह
तः तावदित्याकाशयान्यमाह ॥ यावदिति यावन्न पतन्ति स्वराणां मतं स्वरास्तेषां वडवान
लेचक्रे नो पतंति स्वरास्तस्य वडवानल वडवाग्निनीत
मुखे योऽनलो अग्निः स वडवानलस्तस्य चक्रे समूहे न पतंति स्वरान्

स्कंदं च यामलं चैव वद्धं कूर्मस्य यामलं ॥ सप्तमं यामलं देव्या
इति यामलसप्तकम् ॥ ६ ॥ श्रुत्वा ये यामलास्सप्त तथा युद्ध
जयार्णवं ॥ कौमारीकौशलं चैव योगिनीजालसंचरम् ॥ ७ ॥
रक्तौघं च त्रिमुंडं च स्वरसिंहं स्वरार्णवं ॥ धवलं भैरवं नामप
टलं स्वरभैरवम् ॥ ८ ॥ तंत्रे रणरूपं ख्यातं सिद्धांतं जयपद्ध
ति ॥ पुलकं दंडं च षट्कं श्री दृष्टीनं ज्योतिषं तथा ॥ ९ ॥ मंत्रपं
आरापनेकानि कूटप्रज्ञानियानि च ॥ तंत्रयुक्तिं च विज्ञाय
विज्ञानं वडवानले ॥ १० ॥ एतेषां सर्वशास्त्राणां दृष्ट्वा सारोद्
मात्मना सारोद्धारं भविष्यामि सर्वसत्वानुकंपया ॥ ११ ॥ पत्स्य
गजभूपालैः संपूर्णा यदि वाहिनी ॥ तथा विभंगमायाति न्यूनहीन
स्वरोदयी ॥ २२ ॥ तावत्तरंति ते धीरा दोर्भ्यामाहवसागरम् यावत्
तन्न पतंति नो चक्रे स्वरास्ते वडवानले ॥ २३ ॥ इसि स्वरेम ते स्वरे
तद्रूप वडवानले ॥ स्वनाममात्रोदयः मात्रावर्णोग्रहो जीवादयोऽ
शेषस्वराः आस्तमिताः सएव संग्राम सागर ललितसंग्राम सागरे वडवानला
लचक्रे वडवानलचक्र वलतमूमो नेपतंति तावदेव स्वरवलसहितं संग्रा
मपारं गच्छंति यत्पुनः संग्रामं कुर्वन्ति स स्वरसमयं प्राप्नोमतः संग्राम
सागरे विलयं यांति यथा स्वरबलेनाढ्याः पुरुषाः बाहुभ्यामेव समुद्रपारं
१ गंतुकामो लाघवमात्रे समुद्रं तरंति यावत्स्थाने समुद्रे वडवानलभूमि
विघ्ते तत्र चेत्पतंति तदा चेल लग्नेव विलयं यांति ग्रसिद्धिः राज्ञा वता
उदितस्वरा जयकारणमेवमुखं तेनावश्यमेव विजयार्थिभिः स्वरोदयशा
स्त्रवित् स्वरोदयज्ञानी पहितव्यमिति ॥ २३ ॥ अथ स्वरज्ञं विना यथा
जयो भवति तथाह ॥ केचिद्दिनिसुगमं ॥ १४ ॥ अन्यस्वरस्थानं न्यूनप्रमा
णायति ॥ यस्ये को पीति ॥ यस्यन्नपस्यरज्ञो स्वरज्ञो नास्ती ते स्वराज्यं रभाक

॥ अथ पुनः स्वरज्ञमेव प्रशंसति चरः सुगमं ॥ २६ ॥ अथ स्वरबल
प्रशंसामाह ॥ १ ॥

दलीसस्याः सारोपमं भाति मन्त्रज्ञो शत्रुभिः सुखेनाभिभूयते ॥ २५ ॥ दृशोकेनेति
एकोपी स्वरबली राजा दश राजबलानि लीलया ज्ञानाज्ञो सेन जयति दशभिः रा
जभिः स्वरबलिभिः शतं शत्रून् जयति एवं शतैः सहस्रं जयति एतानेतास्व
रबलमेव जयेत् प्रमाणं ॥ २७ ॥ अथ प्राग्रुक्तमेव स्वरबलं स्वरावलं च प्रमाणय
ति ॥ पुष्पैरपीति पुष्पैरपि कोर्थः पुष्पघातिभिः सदापि हीनः स्वरोदयेन भटेनेन
योद्धव्यं न युद्धं कुर्यात् किं पुनः शस्त्रघातिना सह एतावता यावत्कालं हीनः
स्वराणां समयाल्लिख्यति स्वरोदयबलेनाप्ते स्वनाममात्रादि स्वरबलं प्राप्य शस्त्रको
टिभिः शस्त्रधारिणां कोटिभिः सह योद्धव्यमिति ॥ २८ ॥ अधुना यावत्कर्तव्यो
देकमाह राज्ञा ... कर्तव्य इति तदाह ॥ स्वरस्त इति ॥ २९ ॥ स्वरचक्रा
राशीति २० ग्रामलेखिति २१ मात्रावलीति २२ द्वादशाब्दमिति २३ नक्षत्रमिति २४
पूर्वमुक्तमिति २५ एकाशीतीति ॥ २६ ॥ ॥
सुगमं ॥ इति स्वरोदये चक्रनामानि ॥

कथंचिद्विजयी युद्धे स्वरज्ञेन विना नृपः ॥ पुरुषार्थोपमं तत्तु यथा
धचटकग्रहः ॥ २४ ॥ यस्यैको पि गृहे नास्ति स्वरशास्त्रस्य पारगः ॥
रंभास्तंभोपमं राज्यं निश्चितं तस्य भूपतेः ॥ २५ ॥ स्वरशास्त्रे सदाभ्या
दी सी सत्यवाग्जितेंद्रियः ॥ देशदेशस्य यः कश्चिद्यत्र श्रीस्तत्र पभजे ॥ सहस्रं भूतसंरक्षया ॥ स्वरोदयव
त् ॥ २६ ॥ दशैकेन नृपानं तैः स्त्र ॥ पुष्पैरपि न योद्धव्यं यावद्बु
द्धेनैव देशस्थं हन्ति लीलया ॥ २७ ॥
नः स्वरोदये ॥ स्वरोदयबलेनाप्ते योद्धव्यं शस्त्रकोटिभिः ॥ २८ ॥ केरलीचिमपारसांकीर्ति
स्वरज्ञः शकुनज्ञश्च दैवज्ञो मन्त्रपारगः ॥
तं रत्नपंचकम् ॥ २९ ॥ स्वरचक्रादि चक्राणि भूबलानि बलानि च ॥
ज्योतिषं शाकुनं चैव षडंगानि यथाक्रमं ॥ २० ॥ ग्रामलेखं च सर्वेषु यान्तु
कानि स्वरोदये ॥ अधुनातानि वक्ष्येहं स्वरचक्राणि विंशतिः ॥ २१ ॥ मा
त्रावलीग्रहो जीवो राशिभं पिंडयोगकौ ॥ द्वादशाब्दोदयं चक्रं वर्षायन
तुं मासिकम् ॥ २२ ॥ पक्षाहर्नाडिकं चक्रं तिथिवारर्क्षयोगकं ॥ तत्कालयुप
लंकाख्यं स्वरं देहोद्भवं तथा ॥ २३ ॥ इति स्वरचक्राणि ॥ पूर्वमुक्तेषु ना
होषु मयास्ताननि यानि च ॥ चतुराशीति चक्राणि तेषां नामानि
वक्ष्यहं ॥ २४ ॥ एकाशीतिपदं चक्रं शतपदं नवांशकं ॥ कत्रंसिंहा
सनं चक्रं कूर्मपृच्छ विधं त्रिविधं ॥ २५ ॥ भूदेशं नगरं क्षेत्रं गहकूर्मचक्र
पंचमं ॥ पद्मचक्रं फणीशाख्यं राहुकालानलं मतं ॥ २६ ॥ सर्वतोभद्रका
लानलं चक्रं चंद्रकालानलं तथा ॥ घोरकालानलं चक्रं गूढकाला
नलं मतं ॥ २७ ॥ शशिसूर्यसमायोगे चक्रकालानलं मतं ॥ संघट्टं स
प्तमं सेयं सप्तकालानलानि च ॥ २८ ॥ तिथिवारं च नक्षत्रं त्रिधा चैव
कुलाकुलं ॥ कुम्भचक्रं द्विधा प्रोक्तं राशिनक्षत्रसंभवम् ॥ २९ ॥ प्रस्तारं च
क्रवेधं च त्रिधा तुंबुरु तत्समं ॥ भूचरं खेचरं यानानाडीचक्रं त्रिधा मतं ३० ॥
कालचक्रं फणिद्वंद्वं सपरिस्थं चंद्रजं तथा ॥ कविचक्रं द्विधा प्रोक्तं
स्थानस्वाम्यं सर्वं कं ॥ ३१ ॥ खलाकारस्थं द्विधा चैव कृतिकाख्यान
भादिकम् ॥ कोटचक्राख्यकं प्रोक्तं चतुरस्रादिभेदतः ॥ ३२ ॥ गजेम
ष्टं रथं च्युहं कुंतं खड्गं क्षुरिधनुं ॥ तोरि सेवानरं डिंभं पक्षिवर्गा पवर्ष
णं ॥ ३३ ॥ सप्तरेखोद्भवं चक्रं पंचरेखं शुभास्करं ॥ त्रिविधं मात्रिका
चक्रं विलेखं पंथेनतोरले ॥ ३४ ॥ अहिलांगलची जोषि द्वषारस्यं सत
नाडिकम् ॥ चक्रं सांवत्सरं स्थानचक्रं भंगोन्नति स्वपा ॥ ३५ ॥ एतानि

॥१२॥
न॰ ति॰
ज॰ टी॥
2

सर्वचक्राणि ज्ञात्वा युद्धं समाचरेत् ॥ जयेद्दिहनसंदेहो
शत्रुतुल्येपिवैरिणि ॥३६॥ इतिचक्रनामानि ॥ अथा
तःसंप्रवक्ष्यामि भूबलान्यभिधानतः ॥ कश्चिद्दुर्बलपादु
गे चातुरंगे महाहवे ॥३७॥ स्वरोदयैश्च चक्रैश्च श
र्बलस्य समोऽधिकः ॥ तत्र युद्धे बलं देयं भूबलैर्विज
यार्थिनाम् ॥३८॥ तेषां नामान्यहं वक्ष्ये ख्यातानां
ग्रहयामले ॥ चतुराशीतिसंख्यानां यद्बलेन जयी
रणे ॥३९॥ उड्डी जालंधरी पूर्णा कामा कौल्लेकवी
रिका ॥ शिलीध्री चमत्कामारी जैत्रपाली च वंशजा ॥४०॥
भद्रकाली नली काली कालरेखा निरामया ॥ जयल
क्ष्मीर्महालक्ष्मीर्जया विजयभैरवी ॥४१॥ बालयो
गेश्वरी चंडी माया मुक्तिकर्तरी ॥ शार्दूली सिंहलीन
न्वी महामाया महेश्वरी ॥४२॥ देवकोटिः शिवा शान्ति
धूम्रा माला वराटिका ॥ त्रिमुंडा वत्सरी धर्म्या मत्ता घण्टा
लयाऽलया ॥४३॥ दुर्मती तीव्रवरा गौरी काली नारहरी बला ॥
खेचरी भूचरी गुप्ता दादशी दृष्टिकेवला ॥४४॥

भूदेशेति ।२७। सर्वकालानलमिति ।२८। शशी सूर्येति ।२९। तिथिवारेचेति ।३०॥
प्रस्तारेति ।३१। कालचक्रमिति ॥३२। खलकाख्यमिति ।३२। गजमश्वरथेति ।३३॥
सप्तरेखो भ्रमिति ॥३४॥ अहिलांगलेति ।३५। राशीनिति ।३६॥ इतिचक्र
नामानि ॥ अथेति स्पष्टम् ।३७॥ अथ भूबलानां नामान्याह ।स्वरोदयेति ॥
नामजं मात्राद्यष्टभिः स्वरैर्वा दशाद्यादिकालजैः स्वस्वरैः शत्रुर्यदि समतु
ल्योधिको वा भवति तत्र जयार्थिनां राज्ञां भूबलैर्बलं देयं ॥ स्वरबलेन तु
ल्येन शत्रुणा सह जयपराजयौ तुल्यमेव स्यातां ॥ आत्मनः स्वरबलेऽधि
कौ यदि शत्रुस्तदा शत्रोरेव जयः ॥ अत्र युद्धे यस्य राज्ञोऽस्य जयार्थिता
भवति कथमसौ मया जेतव्य इति स्वरज्ञं पृच्छति तत्र स्वरतो भूबलानि
तस्मै दत्वा युद्धाय तं समज्ञां कुर्यात् ॥ जयं जयेति । तेषां भूबलानां नामा
न्याह ॥ स्वरोदयैश्चेति ।३८॥ तेषामिति ।३९॥ उड्डीति ॥४०॥ भद्रकाली
ति ।४१। बालायोगेश्वरीति ।४२। देवकोटिरिति ।४३। दुर्मतीति ।४४॥
त्रैलोक्येति ।४५। बहुलेति ।४६॥ रात्रुकालीति ।४७। चन्द्रः सप्तवि
धेति ॥४८॥ अत्र निभ्रबलानीति ॥४९॥ स्पष्टार्थाः ॥४९॥
शत्रोः समाधिवेति ।५०॥ अथमेति ।५१॥ यथा शत्रुः सुजयो भवति
तथा मंत्रयंत्रादिकैर्बलैर्जयोपायं वक्ष्ये ॥५२॥ तान्याह । मंत्रयंत्रा
दीनां नामानि । रणाभिषेचनमिति ॥५३॥ भैरवलेति ॥५४॥ योगप
ट्टेनेति ॥५५॥ त्रोसकमिति ॥५६॥ पताका इति ॥५७॥ बलान्येतानी
ति स्पष्टार्थाः ॥५८॥ इति मंत्रयंत्रबलानि ॥ ॥

त्रैलोक्यविजयासौरी करालीवडवा परा ॥ रौद्री च शिशुमातंगी
चामिंया दहनीजिता ॥ ४५ ॥ वकुलावर्गभूमी च कपाली चाग्नि
ज्वालानला ॥ चंद्रार्कबिंबभूमी च ग्रहराशि विलग्नका ॥ ४६ ॥
राहुकालानली भूमिः स्वरभूमिर्द्विधा मता ॥ ऊर्द्ध्वमासिकं ॥
क्षेत्रराहुश्चाष्टविध स्मृता ॥ ४७ ॥ चन्द्रः सप्तविधः सूर्यश्च ॥
तुर्धा योगिनी त्रिधा ॥ कालं बलं त्रिभेदं च तिथिनक्षत्रवासरजं ॥ ४८ ॥
अमूनि प्रबलान्यत्र ज्ञात्वा यः प्रविशेद्रणे ॥ अरयस्तस्य न ॥
श्यंति मेघा वातहता यथा ॥ ४९ ॥ इति मूलानि ॥ शत्रोः ॥
समाधिके नाम्नि स्वरे भ्रमे क्षेत्रे ग्रहबले ॥ स्थानसैन्याधि ॥
केशत्रोर्बलिवृत्तान संयुते ॥ अभंगे चाप्यभेदे च दुःसा ॥
ध्ये दुर्जये रिपौ ॥ जयोपायमहं वक्ष्ये मंत्रयंत्रादिकं बलं ॥ ५० ॥ ५१ ॥
रक्षाभिषेचनं दीक्षा रक्षाचारलेकं करं ॥ वीरपट्टं रणे पट्टं
जयपट्टस्य बंधनं ॥ ५३ ॥ मेखला कवचं न्यासं मुद्रा रक्षा च
कंचुकम् ॥ औषधं तिलकं तज्ज्ञा गुटिकाश्मकपर्दिका ॥ ५४ ॥
योगघटितशस्त्राणि शस्त्ररक्षाप्रमोचनं ॥ शस्त्रलेपाश्च वि
विधा वारणानां विच्छेदबंधनम् ॥ ५५ ॥ त्रासकं कोहलाद्यका
मुरजं भस्मसाधनं ॥ मारणं मोहनं स्तंभं विद्वेषोच्चाटनं वशं ॥ ५६ ॥
पताकापिच्छकं यंत्रं परविद्याविनाशनं ॥ शांतिकं निजसैन्यस्य
सर्वोपद्रवनाशनम् ॥ ५७ ॥ बलान्येतानि यो ज्ञात्वा संग्रामं कु
रुते नृपः ॥ असाध्यस्तस्य वै नास्ति शत्रुः कोपि महीतले ॥ ५८ ॥
इति मंत्रयंत्रौषधबलानि ॥ ५८ ॥ गणितं व्यवहारं च होराज्ञा
नं परिस्फुटं ॥ त्रिस्कंधं ज्योतिषं वक्ष्ये जयचर्यास्वरोदये ॥ ५९ ॥
खेचरानयनं स्पष्टं पंचांगतिथिसाधनं ॥ उदयास्तमनं चक्रं क्रां
तिविक्षेपयोः स्थितिः ॥ ६० ॥ नतोन्नतगमानं च भावसंधिप्रसा
धनं ॥ ग्रहाणां बहुलं वक्ष्ये राशिभफलान्वितं ॥ ६१ ॥ राशिसं
ज्ञाश्रभेदं च खेचराणां तथैव च ॥ नृणां जन्मफलं वक्ष्ये ऋक्षदं
राश्यंशलग्नजम् ॥ ६२ ॥ फलं चंद्रार्कयोगानां ग्रहाणां स्वोच्च
नीचकम् ॥ आयुर्दाये दशाश्चैव तासां कालप्रवेशजं ॥ ६३ ॥
तस्माल्लग्ने ग्रहास्पष्टान्दशांतर्दशायोफलं ॥ ग्रहवर्गाष्टकं स्प
ष्टं तस्मादिनफलं भवेत् ॥ ६४ ॥ ताजको जन्मलग्नस्य ता
धनं च परिस्फुटं ॥ वर्षमासदिवालग्नं तस्माद्दशा ततः फलं ॥ ६५ ॥

अथ द्वितीयस्कंधे ज्योतिषांगमाह ॥ गणितमिति ॥ ५९ ॥ खेचरानयन
मिति । ६० ॥ नतोन्नत इति ॥ ६१ ॥ राशिसंज्ञा इति । ६२ । फलं चंद्रार्कयोरिति । ६३ ॥
तस्माल्लग्नमिति । ६४ ॥ ताजिकोक्तेति । ६५ ॥ काप्योत्पत्तिमिति । ६६ ॥ सिद्ध
छायेति ६७ ॥ लग्नमानमिति । ६८ । त्रिपिडकेरणमिति ॥ ६९ ॥ चंद्रताराबलमिति
७० ॥ सिद्धसंवर्तकमिति ॥ ७१ ॥ यमघंटमिति ॥ ७२ ॥ वारप्रलमिति ॥ ७३ ॥

॥न॰ति॰॥
॥ज॰टी॥
॥३॥
3

फलंग्रहस्येति ॥ ७४ ॥ पीडास्थानेति ॥ ७५ ॥ शीघ्रवक्रमिति ॥ ७६ ॥
बालादीवेति ॥ ७७ ॥ तिथ्यादिपंचकेति ॥ ७८ ॥ अंगस्पंदमिति ॥ ७९ ॥
ज्योतिषांगमिति ॥ ८० ॥ पोतकीति ॥ ८१ ॥ स्पष्टार्थाः ८२ ॥ इति जय
लक्ष्म्यां शास्त्रसंग्रहाध्यायः प्रथमः ॥ १ ॥ अथात इति ॥ अथानंत
रं शास्त्रसंग्रहाध्यायानंतरं मात्रादिभेदभिन्नानां स्वराणामुदयान्
ब्रह्मयामले यान्प्रोक्तान् तानहं वक्ष्यामि प्रकर्षेण कथयामीति संबं
धः ॥ २ ॥ अथ स्वराणां षोडशोदयान्वक्तुं स्वरा नादावाह ॥ मातृकाया
मिति पुरा सृष्ट्यादौ मातृकायां मातृकाचक्रे ब्रह्मणा षोडशसंख्यया
स्वराः प्रोक्ताः ते स्वराः अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः एतेषां
मध्ये द्वावंतिमौ अं अः इति त्याज्यौ एषु चत्वार एषु चत्वारो नपुंसकाख्याः
षायोत्यज्ञि त्रिधावल्ये विषमध्ये दिनेष्ठगा ॥ दिनमानं दिनमु
ऋतुदये वा घटीषु च ॥ ६६ ॥ स्थित्यायात्रिषष्टिं च दुष्टभासत
विंशति ॥ लग्नोदयास्वदेशीयालेभ्यो लग्नस्य साधनं ॥ ६७ ॥
लग्नमानं ततो होरा द्रेष्काणं सप्तमांशकं ॥ नवांश द्वादश त्रिंशदु
द्वयास्तांशकानपि ॥ ६८ ॥ तिथिप्रकरणं वक्ष्ये वारनक्षत्रयोस्तथा ॥
योगाख्यं करणाख्यं च मुहूर्तसंक्रमौ ध्रुवम् ॥ ६९ ॥ चंद्रताराबलं
चैव पक्षभेदेन संयुतं ॥ शुभाशुभाख्ययोगांश्च तिथिवार्क्षयोगजा
नं ॥ ७० ॥ सिद्धसंवर्तकं चैव तथा वारस्य भाग्यमं ॥ अथवमं त्रिदिनं व
ल्ये ततो योगं त्रिपुष्करं ॥ ७१ ॥ यमघंटं यमदंष्ट्रां क्रकचार्गलपात
कान् ॥ कुमारं तरुणं वृद्धं स्थूलानि शूलयोगिनी ॥ ७२ ॥ वारशूलं त
थाकालं कालवेलां परिघस्फुटं ॥ कालहोरार्धयामं च कुलिकं कंटक
दयं ॥ ७३ ॥ फलं ग्रहाणां धिष्ण्यस्य स्वभवस्य भार्गवयोः फलं ॥ दशां चांतर्द
शां स्फुलो वक्रातिचारयोः फलम् ॥ ७४ ॥ पीडास्थानानि खेटानां
ग्रहावस्था लयेव च ॥ भावफलं संधिफलं रात्रौ वेधमुपग्रहान् ॥ ७५ ॥
शीघ्रवक्रग्रहोदयं गोचरं गोचरस्पष्टं ॥ विवाहं च प्रतिष्ठां च दीक्षाया
गृहप्रवेशनं ॥ ७६ ॥ बालरूपोच्चविन्यासं कालविंशोपकालथा ॥ जं
लयोगार्घकांडं च वर्षमासदिनार्घकेतु ॥ ७७ ॥ तिथ्यादिपंचकं न्यास्य
चंद्रेनात्कालसंभवम् ॥ अथवस्थानेषु पुष्टिं च लक्ष्मीं चंद्रादिदानस्य ॥ ७८ ॥
अंगस्पंदानि सर्वाणि कालच्छिद्राणि यानि च ॥ उष्ट्रशिक्षान्यहं वक्ष्ये
नपाशेषांच शांतिकं ॥ ७९ ॥ ज्योतिषांगमिदं सर्वं ये जानंति म
रणं विरणः ॥ दीपवज्ज्ञानि ज्ञानीयाज्ञोनांधकारनाशने ॥ ८० ॥
इति ज्योतिषं ॥ पोतकीपिंगलाकाकोपक्षः शिवाक्रमेण च ॥ पंचर
त्वेमिदं वक्ष्ये पक्षांगे शकुने मते ॥ ८१ ॥ इति शकुनं ८२ ॥ इति श्री नरपति
जपचर्यायां स्वरो० षडंगसम्राध्याये शास्त्रसंग्रहाध्यायः प्रथमः १ ॥
॥ १ ॥ प्रथमः ॥ १ ॥
॥ १ ॥ १ ॥ १ ॥

॥ ३ ॥

तेच ऋ ॠ ऌ ॡ इति शेषादश स्वरास्थिताः तेच अ आ इ ई उ ऊ ए ऐ ओ औ
एते ये शेषा दश स्वरा तेषु द्विद्विकेषु एकैकमेव ग्रहणीयात् तेच अ इ उ ए ओ
द्वितीयास्तत्फले नैव तुल्याः अथ तेषां दशानां द्विद्विस्थितानां द्वयोर्द्वयोर्
एव ग्रहीतानान्त्विमिति अत्रोच्यते अकारश्च यो वासुदेवः प्रधानत्वात्
अकार एव ग्रहीतः इकारस्तु श्रीः सा वासुदेवस्य प्रिया अत इकारो ग्रहीतः ॥

॥ अथातः संप्रवक्ष्यामि शोभायेत्र लयामले ॥ मात्रादिभेदभिन्नानां
स्वराणां षोडशोदयान् ॥ १ ॥ मातृकायां पुराप्रोक्ताः स्वराः षोड
शसंख्यया ॥ तेषां द्वावेति मौल्याज्ज्योमृत्वारश्च नपुंसकाः ॥ २ ॥
शेषा दश स्वरास्तेषु स्यादेकैको द्विके द्विके ॥ तेषामतः स्व
राख्यास्ते स्वराः पंच स्वरोदये ॥ ३ ॥ लाभालाभे सुखं दुःखं
जीवितं मरणं तथा ॥ जयः पराजयश्चेति सर्वं ज्ञेयं स्वरोदये ॥ ४ ॥
स्वरादिमातृकोच्चारो मातृव्याप्तं जगत्त्रयं ॥ तस्मात्स्वरोद्भवं
॥ सर्वं त्रैलोक्यं सचराचरम् ॥ ५ ॥

उकारस्तु रुद्रः एकारः सूर्यः ओकारश्चन्द्रः अतो आकारानुरोधात् पंच ह्रस्वा
एव ग्रहीताः यतस्ते एव शुभाशुभं प्रदीकुर्वंति अकारे लयत्फलं आकारेण
वितदेवफलं अलमेषां इकारश्चेत्पीडितः आकारस्यापि स एव देवः एव
मिकाराणावपि बोद्धव्यं ॥ २ ॥ तेषा अतः स्वरा इति ॥ ३ ॥ अथैषां ग्रहणं सि
द्धिं प्रकटयति ॥ लाभालाभसुखं दुःखमिति एषां स्वराणामुदये लाभप्रश्ने ला
भं विजानीयात् तथा अलाभमपि सुखप्रश्ने सुखं दुःखमपि रोगपीडानादि
नां जीवितमरणप्रश्ने जीवितं मरणं च विंद्यात् एवं सर्वत्र प्रश्ने स्वरा
एव फलप्रकाशकाः ॥ ४ ॥ स्वराणां सर्वत्र प्रधानतामाह ॥ स्वरादिमा
तृका इति ॥ सर्वेषां चराचराणां उच्चारेनामग्रहणं अकारादिमातृका
भिरेवेति न स्वकारादिमातृकां विना वर्णोच्चारयितुं शक्याः अ
तो मातृकाभिर्जगत्त्रयं व्याप्तं अत एव प्रश्ने स्वरा एव फलप्रकाशकाः ॥ ५ ॥
अथ पुनः स्वराणामेव प्रधानतां प्रकटयति ॥ अकाराद्या इति अ इ
उ ए ओ एते पंच स्वरा ब्रह्मादयो देवाः तत्र अकारो ब्रह्मा इकारो विष्णुः
उकारो रुद्रः एकारः सूर्यः ओकारश्चन्द्रमा भूमिः ॥ अन्योर्थः प्रयोजनकर्तुः
अकारस्वरोदये ब्रह्माणं ध्यात्वा कर्म कार्यं इकारोदये विष्णुं ध्यायेत्

॥ न॰ ति॥
उ॰ टी॥
॥४॥

५

उकारोदये रुद्रं ध्यायेत् एकारे सूर्यं ओकारोदये चंद्रम् ॥ एवं तत्र उद
ये निवृत्त्याद्याः पंचकलाः अकारोदये निवृत्तिर्नामकला इकारे प्रतिष्ठा
नामकला उकारे विद्या प्रतिष्ठिता शांतिरेकारे स्थिता ओकारे रतिशां
तिः निवृत्तिप्रभृतिः नपात्रा निवृत्तिः अकारोदये यदि प्रश्नः ग कारश्चेद्दुन
लमितः तल्लग्नानिवर्तनं वदेत् इकारोदये उदिते प्रतिष्ठा भवति उकारो
दये प्रश्ने उदिते रुद्रं ध्यात्वा विद्याव्याख्या एकारोदये सूर्यं ध्यात्वा शांतिप्र
श्ने शुभं वदेत् ओकारे चंद्रं ध्यात्वा शांतिशांतिर्व्याख्या गतिशांतिर्शुक्तिः प्र
श्ने मुक्तिर्व्याख्या इच्छाद्यं शक्तिपंचकं अकारादिपंचसु क्रमेण इच्छा
ज्ञानक्रिया॰ श्रद्धा॰ मेधा॰ इदं शक्तिपंचकं स्थितं तत्र उदये तद्वाक्रिन
स्योदयो ज्ञातव्यः ॥ ६ ॥ अथान्यत् । मायाद्याऽऽदिति । अकाराद्यांपंचस्वरा
मायाद्याश्च क्रमेण चतुरस्रंयच्च क्रं तन्मात्रपंचकम् भेदं तत्राकारोदयेयस्य चतु

अकाराद्याः स्वराः पंच ब्रह्माद्याः पंचदेवताः । निवृत्त्याद्याः
कलाः पंच इच्छाद्यं शक्तिपंचकम् ॥ ६ ॥ मायाद्याश्च क्रमेण
अधराद्यं भूतपंचकम् ॥ शब्दादिविषयास्ते च कामदा
ता इतीरिताः ॥ ७ ॥ पिंडं पदं तथा रूपं रूपातीतं निरंजनं ॥
स्वरभेदस्थितं ज्ञानं ज्ञायते गुरुतः सदा ॥ ८ ॥ अकारा
द्याः स्वराः पंच तेषां मध्ये भिदस्त्वमी ॥ मात्रावर्णो प्र
हो जीवो राशिर्भं पिंडयोगकौ ॥ ९ ॥ प्रसुप्तो भावते पे
न येनागच्छति शांदितः ॥ तस्य नामाद्यवर्णो या मात्रा
मात्रास्वरः स हि ॥ १० ॥ इति मात्रास्वरचक्रम् ॥ १ ॥

रस्रं चक्रं मात्स्यं पूजनीयं बालदाकारोदये चक्रं तत्र रजयेत् ॥ इकारे इंदु
चक्रं उकारे त्रिकोणं चक्रं एकारे षट्कोणं ओकारे वर्तुलं चक्रं
अकारादिषु धरादि भूतपंचकं पृथिव्यादिपंचकं अकारोदये पृथ
वीगतप्रश्नः इकारोदये जलगतप्रश्नः उकारोदये अनलगतप्रश्नः
एकारोदये वायुगतप्रश्नः ओकारोदये आकाशगतप्रश्नः उद्वेगतेज
श्नं वदेत् तेपि स्वरा गंधादिविषयाः तत्राकारो गंधविषयः इकारो रस
विषयः उकारो रूपविषयः एकारः स्पर्शविषयः ओकारः शब्दविषयः
एतावता अकारादिस्वरोदये तत्र उक्तप्रश्न विषयेषु शुभं वदेत् ॥
अयमर्थः गुरुरूपदेशादेव ज्ञायते अस्यार्थस्य योजनं किमतिविवेच्या
ख्याते अस्मादपि केन तरोर्थः सगुरुपासनया बुध्यते इष्टदेवताप्रसादात्
तथाच वक्ष्यति तथा च वक्ष्यति पिंडं पदमित्यादि अत्र याङ्मात्रं
प्रकटं ननु परमार्थतस्तु गुरवः ये पिंडं पदं तथा रूपमित्यादि श्लोक
त्यदर्शयति यथायं मोः अयमस्य इति एतेन किमुक्तं भवति स्वरा
सीसम्यग्भूयात् ॥ ७ ॥ ८ ॥ अथाकारादिस्वराणां मुख्य [illegible] प्रयोजन
मुपदिशति अकाराद्या इति अकारादिपंचस्वरा मात्रादयो भेदाः
पंचसु भवंति ॥ ९ ॥ तत्राद्यो भेदान वक्तुं मात्र मुपदिशति गमुप्तो मा
वनेति येन नाम्ना मनुष्यः प्रसुप्तो भाष्यते नाम्ना कृत आगच्छति तन्नाम्नि आद्यवर्णे
यामात्रा सा मात्रास्वरः यथा देवदत्तनाम्नि आद्यवर्णे दकारस्तत्र एकारमात्रा विद्यते अतो दे

यद्दत्तस्य मात्रास्वरो एकार एव पुनर्यथा यज्ञदत्तस्य नाम्नि यकार आद्यवर्णो
ऽन्तर्भूतो ऽकारो विद्यते ततो यज्ञदत्तस्य मात्रास्वरो ऽकारः एवं सर्वेषां नाम्नि
एवं कृष्णादिनाम्नां मनुजानां मात्रास्वरमाह एतत्रोच्चारितात् तथा वर्णा इ स्वरो ग्रा
ह्य इत्यर्थः एवं हृषीकेशादिनाम्नि अपि च मत्र भाष्ये ऋकारे इकारभोगः प्र(द)
र्शितः अतो ऋकारस्य मात्रास्वरो इकारः ॥ १० ॥ इदं मात्रास्वरचक्रम् ॥ २ ॥
अथ वर्णस्वरमाह कादिहान्ता इति स्वरादधः अ इ उ ए ओ स्वरसत्र मध्ये ह
कारान्तान् ककारारभ्य हकारपर्यन्तान् वर्णान् विलिखेत् किं विशिष्टान् का
दिवर्णान् ङञणवर्णवर्जितान् कवर्गचवर्गटवर्गाणां पंचमवर्णान् ङ
ञण त्यक्त्वा परित्यज्य उपलिखेत् तिर्यक्पंक्तिक्रमेण लिखेत् पंचत्रिंशत्कोष्ठके
कोष्ठके पंचाधिकत्रिंशत्कोष्ठके कृत्वा ॥ ३५ ॥ यथा चक्रम् ॥ ११ ॥ नरनामादि
दिमो वर्ण इति अत्रोदाहरणे देवदत्तस्य नाम्नि आद्यवर्णो दकारः स दका
र ओकारस्वराधो लिखितोऽस्ति अतो देवदत्तस्य वर्णस्वर ओकारः यज्ञ
दत्तस्य नाम्नि यद्वर्णो यो यकारः स तु उकारस्वराधो लिखितोऽस्ति एवं
यज्ञदत्तस्य वर्णस्वर उकारः ॥ १२ ॥ नञो ङाे इति चेद्भवन्ति यत्र कुत्रापि च

कादिहान्तान् लिखेद्वर्णान् स्वराधो ङञणोज्झितान् ॥ तिर्य
क्पंक्तिक्रमेणैव पंचत्रिंशत्कोष्ठके ॥ ११ ॥ नरनामादि
मो वर्णो यस्मात् स्वरादधः स्थितः ॥ स स्वरस्तस्य वर्णस्य
वर्णस्वर इहोच्यते ॥ १२ ॥ नञोङाः ङञणवर्णा नामादौ
सन्ति तेन हि ॥ चेद्भवन्ति तदा ज्ञेया गजडास्ते यथाक्रमम् ॥ १३ ॥
यदि नाम्नि भवेद्वर्णः संयुक्तो नरलक्षणः ॥ ग्राह्यस्तदा
दिमो वर्ण इत्युक्तं ब्रह्मयामले ॥ १४ ॥ (००:) ॥ ॥

देशविशेषे ङञणवर्णा भवन्ति तदा तत्फलपरिपाकः गजडानां फले
न समः ॥ १३ ॥ अथान्यविधमाह ॥ यदि नाम्नीति ॥ यदि यस्य कस्यचि
न्नाम्नि आदिमो वर्णः संयुक्तो भवति तदा तस्य को वर्णस्वरः को ग्राह्य इत्याका
ङ्क्षायामाह ॥ ग्राह्यस्तस्यादिमो वर्णः तद्वशाद्वर्णस्वरः यथा श्रीपतिरि
ति कस्यचिन्नाम तत्र शकाररेफरूपो वर्णः शकार इकारादधो लिखि
तोऽस्ति यथा श्रीपतेर्वर्णस्वर इकारः एवं सर्वत्र विचारः अथ यस्य क
स्यचिन्नामानि बहूनि सन्ति तत्र मात्रास्वरः कस्य नाम्नः ग्राह्य इत्याकाङ्क्षा
यां तां स्वरज्ञा एवं वदन्ति लंपटाचार्यभाषिते बहूनि यस्य नामानि
नरस्य स्युः कथंचन ततः प्रसिद्धनाम्ना हि स्वरविशारदैः सुगममन्य
स्य अथान्यवर्णस्वरं प्राह उच्यते शो षौ शसौ षखौ ङञौ तेषां विनिप
रस्परं उभौ तुल्यफलौ भिन्नस्वरस्याधः स्थितावपि तेन किं जयपरा
जयौ भवतः ॥ अथ गृह्यवर्णस्वरनिर्णये लंपटाचार्यः ॥ यदा स्वरादि
कं नाम तदा ग्राह्यं प्रसेनजितं ॥ देशग्रामपुरे हम्र्ये नरे नामादिवर्णतः ॥
वर्णस्वरो भवेत्तेषां फलं सम्यक् प्रतिष्ठितम् ॥ स्वरस्य मात्रासंज्ञो ज्ञान
वर्णं त्वेतु यामले ॥ ॥ १४ ॥ ॥ ९९ ॥ ९९ ॥

: दिविषये जयपराजयौ तत्तौ ५४ ॥

स्व॰ ति॰ ॥
ज॰ टी॰ ॥
॥ ५ ॥

5

मृत स्वरा द्वलीवालेति ॥२५॥ द्वादशवार्षिकादिमात्रांतानां अंतर्भोग पलान्याह शाक्रपुष्येति ॥२६॥ सार्धपूर्णेति ॥२७॥ गजाधू नागेति ॥२८॥ अत्तवह्नीति ॥ द्वादशवार्षिकोत्तरोदयप्रमाणं पलानि १४१३८९८ वार्षिकोत्तरोदयप्रमाणं पलानि ११७८१९८ अयनांतरोदयप्रमाणं पलानि ५०५८९०५ ऋत्वंतरोदयप्र॰ प॰ २३५६३ मासांतरोदयप्र॰ पलानि ९८१८ पक्षांतरोदयप्र॰ प॰ ४९०९ दिनान्तरोदयप्र॰ प॰ ३२७ घटंप तरोदयप्रमाणं पलानि ३० इति २९ अथातो ग्रहस्वरमाचक्षे ॥ अस्वरो मेषेति ॥२०॥ उ स्वरे इति ॥२१॥ स्वराधः स्यात्पये दिति २१ ॥ अस्वरो मेषसिंहालीकोर्थः मेषसिंहालीरूपश्च मेषसिंह वृश्चिकराशीनां रूपधरः एवमिकारादयोऽपि स्वराशिरूपधराः तत्र यो स्वरो यत्राशिरूपधरः एवमिकारादयोऽपि पतिः स स्वरस्याधिपतिः यथा अः स्वरो मेषस्य तस्य राशेर्योऽधिपतिः स स्वरस्याधिपतिः यथा अः स्वरो मेषसिंहालिरूपः तत्र मेषवृश्चिकयो भौमः स्वामी सिंहस्य सूर्यः भौ

मृतस्वराद्वलीवालोबालाद्ध्रस्वरो बली ॥ वृद्धात्कुमारो ब लवान्कुमारात्तरुणो बली ॥२५॥ शाक्रपुष्यौ तथा हलश्चि त्राया द्वादशाब्दिकः ॥ इंद्रमं च गजाः सप्त रुद्रा वर्षे च मानकं ॥२६॥ सार्धपूर्णं तथा श्रेष्ठा गजवानायने पलाः ॥ वह्निवस्वारुण वह्नि अनेत्रे ऋतु पलानि च ॥२७॥ गजारुपंग जाधमे मासे मानं प्रकीर्तितम् ॥ नवपूर्णं नववेदाः पक्षे भागप्रमाणकं ॥२८॥ अत्तवह्निमवेमानं दिनमानं क्रमेण च ॥ चवह्नी घटिका मानेत्वंतरोदयगे स्वरे ॥२९॥ अथ ग्रहस्वरमाह । अस्वरो मेषसिं हालीः कन्या युग्मकर्कटः ॥ उस्वरे तु धनुर्मीन एस्वरे तु तुलावृ षौ ॥२०॥ भौमश्शुक्रश्च चंद्रार्के बुधश्शुक्रो रमंत्रिणः सौरिसौरी तथा जीवो मेषादीनामधीश्वराः ॥२२॥ इति ग्रहस्वरचक्रम् ॥

मः सूर्यो अस्वरस्वामिनो एवं कन्यामिथुनयोः स्वामी बुधः कर्कस्य चंद्रः तेन बुधचंद्रौ इकारस्वामिनौ धनुर्मीनस्वामी गुरुः तेन गुरु उकाराधिपतिः वृषतुलाधिपतिः शुक्रः स एकारस्वामी मकरकुंभयोरधिपः शनिः शनि रोकारस्वरस्वामी ॥ अथोदाहरणम् ॥ देवी चाची चतुष्टयं रेवती नक्षत्र स्य चरणाः देकारचूर्णे चरेवतीनक्षत्रं रेवतीनक्षत्रेण मीनराशिः उकारः मीनराशिप्रतिमः मीनस्वामी गुरुः गुरु उकारस्वामी अतो देव दत्तस्य ग्रहस्वर उकारः तथा यज्ञदत्तस्य नो यथियु वर्णचतुष्टयं ज्येष्ठा नक्षत्रस्य चरणाः तत्र यकारेण यज्ञदत्तस्य ज्येष्ठानक्षत्रं ज्येष्ठानक्षत्रेण वृ श्चिकराशिः अस्वरो वा वृश्चिकरूपः वृश्चिकस्वामी भौमः तेन यज्ञदत्तस्य ग्रहस्वरो अकारः ॥ इति ग्रहस्वरचक्रम् ॥

॥ मात्रास्वरचक्रम् ॥

ओ						
ए						
उ						
इ						
अ						

॥ ग्रहराशिचक्रम् ॥

अ	इ	उ	ए	ओ
मे	३मि	क	वृ६	म३
वृ	क	तु	ध	कुं
सि६	सिं	६·२	म६	मी·

॥ वर्णस्वरचक्रम् ॥

अ	इ	उ	ए	ओ
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ढ	त	थ	द
ध	न	प	फ	ब
भ	म	य	र	ल
व	श	ष	स	ह

॥ ग्रहस्वरचक्रम् ॥

अ	इ	उ	ए	ओ
मे	क	ध	तु	म
सिं	मि	मी	वृ	कुं
वृ	क	०	०	०
र·	चं·	गु·	शु·	श·
मं·	बु·	००	००	००

॥ जीवस्वरचक्रम् ॥

अ	इ	उ	ए	ओ
अ	व	क	वे	ट
२	६	५	५	५
त	प	य	श	ळ
५	५	४	४	[illegible]

षोडशाक्षर इति ॥१॥ अवर्गाद्यष्टवर्गाणां इति देवदत्तनामतः उदाहरणं दकारस्य त्रिसंख्या दकारोपरि एकारस्यैकादश वकारांतर्भूतोऽकारस्यैकसंख्या वकारस्य चतुर्थसंख्या दकारांतर्भूताऽकारस्यैकसंख्या दकारस्य त्रिसंख्या संयोगी तकारद्वयस्य द्विसंख्या अकारस्यापि एकसंख्या एवं षड्विंशतिः २६ पंचभक्ते शेषमेकं १ तेन देवदत्तस्य जीवस्वरो अकारः ॥२॥ इति जीवस्वरचक्रं ॥ अथ राशिचक्रं । मेष

षोडशाक्षरवर्गः स्यात्कादिवर्णेषु पंचकाः ॥ चतुर्वर्णेर्यवो वर्गो संख्यावर्गेषु कीर्तिताः ॥ अवर्गाद्यष्टवर्गाणां वर्णसंख्या तु नामतः ॥१॥ नाम्नि वर्णस्वराग्रा स्याद्वर्णानां वर्णसंख्यया ॥ खंडिताः पंचभिर्भक्ताः शेषे जीवस्वरं विदुः ॥२॥ इति जीवस्वरच० ॥ मेषवृषयावकारे च मिथुनाद्याः षडंशकाः ॥ मिथुनांशत्रयं चैव मिकारे सिंहकर्कटौ ॥२॥ कन्या तुला उकारे च वृश्चिकाद्याः त्रयोंशकाः ॥ एकारे वृश्चिकोत्थांशाश्चापः षट् च मृगादिमाः ॥२॥ अंशास्त्रयो मृगस्यांत्याः कुंभमीनौ तयोः स्वरे ॥ एवं राशिस्वरः प्रोक्तो नवांशकक्रमोदयः ॥३॥ इति राशिस्वरचक्रम् ॥

वृषो इति मेषनवांशाः ९ वृषनवांशाः ९ मिथुन ६ एवं २४ मिथुनांशत्रयमिति मिथुनांशत्रयं ३ कर्क ९ सिंह ९ एवं २१ कन्यातुलेति कन्याया ९ तुलाया ९ वृश्चिकस्यांशाः ३ एवं २१ एकारे इति एकारे वृश्चिकस्यांशाः षट् धनस्य नव ९ मकरादिमाः षट् ६ एवं २१ अंशास्त्रय इति मृगस्य त्रयोंशाः ३ कुंभमीनयोरष्टादश १८ एवं २१ अथ नक्षत्रचरणेनोदाहरणं अश्विन्यादीनि चरणहस्तपादानाम स्वरः स्वामी पुनर्वस्वादिपंचनक्षत्रे कालगुनीकचरणसहित चरणनाम्नि स्वरः स्वामी उत्तराफाल्गुनी चरणत्रयसहित हस्तादिनक्षत्रचतुष्टय अनुराधाचरणद्वयसहितपादनामस्वरः स्वामी ॥ अनुराधाचरणद्वय ज्येष्ठादिनक्षत्रचतुष्टयश्रवणत्रयसहितैकविंशति चरणनाम्नि एकारस्वरः स्वामी ॥ श्रवणचरणैकधनिष्ठादिरेवत्यंत चरणैकविंशति चरणनाम्नि स्वरः स्वामी ॥ अथोदाहरणं देवदत्तस्य रेवतीचरणेन अकारो राशिस्वरः ॥३॥ इति राशिचक्रम् ॥

॥न·ति॥
॥ज·ही॥
॥६॥
6

॥ नक्षत्रस्वरचक्रम् ॥

॥अ	इ	उ	ए	ओ॥
रे	पु	उफा	अनु	श्र
अ	पु	ह	ज्ये	ध
भ	श्ले	चि	मू	श
कृ	म	स्वा	पूषा	पूभा
रो	पूफा	वि	उषा	उभा
मृ	००	००	००	००
आ	००	००	००	००

॥ पिंडस्वरचक्रम् ॥

॥अ	इ	उ	ए	ओ॥
क	ख	ग	घ	च
छ	ढ	ञ	ट	ठ
ड	न	त	थ	द
ध	म	प	फ	ब
भ	श	य	र	ल
व	ष	ष	स	ह

अकारे सप्तऋक्षाणीति रेवती·अश्वि·भर·कृत्ति·रोहि·मृग·आर्द्रा नाम्नां सप्तानामकारः स्वामी पुनर्वस्वादि पुष्य·श्ले·म·पूर्वफा·पंच नक्षत्राणामिकारः स्वामी उत्तराफा·ह·चि·स्वा·वि·पंचनक्षत्राणां मेषामुकारः स्वामी अनुराधादि ज्येष्ठा·मू·पूर्वाषा·उत्तराषा·पंचनक्षत्राणामेकारः स्वामी श्रवणादि उत्तराभाद्रपदान्तानां पंचानामोकारः स्वामी ॥ अत्रोदाहरणम् ॥ देवदत्तस्य रेवतीनक्षत्रेण नक्षत्रस्वरो

अकारे सप्तऋक्षाणि रेवत्यादिक्रमेण च ॥ पंच पंच इकारादिषु वक्षे नक्षत्रस्वरोदयः ॥ १ ॥ इति नक्षत्रस्वरचक्रम् ॥

नाम्नि वर्णस्वरात् संख्या संख्या मात्रास्वरात्तथा ॥ पिंडेषु हृते शेषे पिंडस्वर इहोच्यते ॥ १ ॥ इति पिंडस्वरचक्रम् ॥

मात्रादिस्वरभेदेन स्वरानुत्पाद्य नामतः ॥ योगे भूरहृते शेषे योगस्वर इहोच्यते ॥ १ ॥ इति योगस्वरचक्रम् ॥ ॥

अकारस्वरः इति नक्षत्रस्वरचक्रं ॥ नाम्नि वर्णा इति अत्रोदाहरणम् देवदत्तस्य नाम्नि दकारस्य वर्णस्वरः ओकारस्तस्य संख्या ५ वर्णस्वरोऽकारस्तस्य सं· १ द्वितीयवर्णः पंच ५ तकारस्य वर्णस्वर उकारस्तस्य संख्या ३ त्रीणि ३ द्वितीयतकारस्य ३ मात्रास्वर एकारस्तस्य ४ देवदत्ते अकारस्य पुनः संख्या ५ शेषे सति शेषं चत्वारि ४ तेनात्र पिंडस्वर एकारः इति पिंडस्वरचक्रम् ॥ मात्रादिस्वरभेदेति अत्रोदाहरणम् देवदत्ते स्वना मजामात्रादयः स्वराः मात्रास्वरः मात्रास्वरं एकारः तस्य संख्या ४ वर्णस्वरो ओकारस्तस्य ५ ग्रहस्वर उकारस्तस्य ३ जीवस्वर अकारस्तस्य एक १ राशिस्वरः ओकारस्तस्य ५ भस्वरो अकारस्तस्य एक १ पिंडस्वर एकारस्तस्य चतुष्टयं ४ एवं देव· नामजामात्रादिपिंडांते स्वराणां संख्यायोगे जाता २३ त्रयस्त्रिंशत् योगस्वर उकारो संपन्नः इत्येवं नामतो नैसर्गिकान्यपि मात्रादिस्वर चक्रादि समाप्तानि अतो देवदत्तस्य जन्मचर्यास्वरोदये जयतो

इति श्री हरिवंशमहादेवविरचितायां नरपति जयचर्यास्वरोदये दीपिकायां मात्रादिस्वरचक्राध्यायो द्वितीयः २ ॥

॥ द्वादशवार्षिकचक्रम् ॥				
१२	१२	१२	१२	१२
अ	इ	उ	ए	ओ
१ २ २	१ १ २	१ १ २	१ १ २	१ १ २
४३	४३	४३	४३	४३
३८	३८	३८	३८	३८

॥ अयनस्वरचक्रम् ॥				
अ	इ	उ	ए	ओ
दे	व	द	त	०
भा	व	ग	भो	रा
४	५	३	३	५
न २	धिं ४	यो ३	०	०

वार्षिकस्वरचक्रम् ॥				
अ	इ	उ	ए	ओ
६६	३६	०	०	०
२६	२६	२६	२६	३६
२१	२१	२१	२१	२१
४५	४५	४५	४५	४५

॥ अथ एभिर्नामजस्वरै देवदत्तस्य द्वादशवार्षिकसमयपादारभ्य नाडयंत
समयावधौ दिनकुचर्यामाह॥ओकारान्ते सर्गिकेति नामजाः स्वराः मा
त्रायाञ्चैते सर्गिकाः ओकाः अन्तो नाम तु उत्पद्यन्ते अन्तोन्ते सर्गिकाः १॥
अत एव सर्वेषां १५ क १५ कयोजनं द्वादशाब्दादिसमयेषु द्वाद
शवर्षे० वर्ष० अयन० ऋतु० मास पक्ष दिन नाड्यन्तेषु अष्टधाकालेषु
लक्षणमाह प्रभवादिरिति प्रभवादिक्रमेण प्रभवविभवाद्येषु
द्वादिवाह स्वस्थानांच स्वदानां द्वादशाब्दशाद्यकैः अस्मेकं अकाराद
यः पंचस्वरा उदयंति एतदुक्तं भवति प्रभवादिद्वादशवर्षेष्वकारः स्वामी॥

ओकारान्ते सर्गिकास्त्वष्टौ मात्राद्या नामजाः स्वराः। एतेषामु
दयाञ्च द्वे द्वादशाब्दादिकालजान्॥१॥प्रभवादिक्रमेणैते
वा स्वरा एणमस्वरादिकः॥उदयो द्वादशाब्दानामत्येकं द्वाद
शाब्दिकः॥२॥मासांतरोदयो वर्षे एको मासो दिनद्वयम्॥॥
लोकाब्धि नाडिकाश्चोक्ता अष्टत्रिंशत्पलानि च ३॥ इति

॥ द्वादशवार्षिकचक्रम् ॥

असावेव उदयः ततः प्रमाथि नामा संवत्सरस्तदारभ्य द्वादशसंवत्सरैः
इकार उदयति तेन किं तावदिकारस्वरोधिपतिः स्वरनंदादिद्वादश
संवत्सरे उकारस्वर उदयति तावदुकारो राजा ततः शोभनसंवत्स
र प्रभृति द्वादशसंवत्सरे एकारस्वर उदयति तेन किं तावदेकारस्व
रो राजा अथ राक्षससंवत्सरादि द्वादशसंवत्सरै रोकारस्वर उद
यति तेन किं तावदोकार एव राजा॥अथोदाहरणम्॥संवत् १५७२
समये शाके १४३७ एतावद्ये प्रभवादयो गताब्दाः ते षामानयनं र
त्नमालासंहितामुक्तं तथा च शाके इकालः ४५ गाकृतिः १२२ युः
शाधाके नन्दाब्धियुगैः ४२५१ समेतः॥ शाकादिवसौ इ १८७५ हतः
सन्तव्यः षष्ट्यावशेषे प्रभवादयोब्दाः अनेन गणितविधिना प्रभवा
दयः आगताः वर्ष ३५ मास १ दिन २५ घटी ५ पल ३० एतावत्संवत्स
राः शाके १४३७ समये चैत्रशुक्ल प्रतिपदि गताः एषां द्वादशवर्ष ३६
१।१२।२३।४५।३६ पर्यंत मकारो धिपतिरासीत् सांप्रतं प्रमाथि नाम
संवत्सरमारभ्य द्वादशसंवत्सरानपि इकारस्वर इष्यते वर्तते एतेन
किं देवदत्तनामोदाहरणे० नामतः विंड स्वरो स्य उकार उदितो लि
न्तदुदयबलात् विंड स्वरोदयोक्तकर्मसिद्धिं यास्यति अथ वर्षमा

॥न॰ति॰॥
॥ज॰टी॥
॥७॥

तत्रमाथिनामादिद्वादशवर्षदशासु इकारादयस्तिष्ठंति तेषु दशास्वरा
णांभुक्तिभोग्यस्वरो तद्दशाकालप्रमाणमाह अस्यांतरोदयेति
वर्ष २ मास १ दिन २ घटी ४३ पल ३८ एतैर्वर्षादिभिः द्वादशासु
उदयस्वरात् अंतर्दशास्वरा वार्षिकेचक्रम् २॥ अथ प्रभवादीनांसं
वत्सरादीनां प्रत्येकमेतद्दशासुभोगः तावदीश्वरः अंतर्दशावि
भागकरणं दिनचर्यापालेखं २॥३॥ इति द्वादशवार्षिकचक्रम् ॥
अथ प्रभवादीनां संवत्सराणां प्रत्येकमस्वराधिपतीनाह ॥ प्रभवो
ब्दमेकैकेति अकारादिकाः पंच स्वराः प्रभवाद्यब्दमेकैकं प्राप्ति उ
दयो भवति कोऽर्थः प्रभवादीनां प्रत्येकं अ स्वरादिकः स्वामी भवति
तथा उदाहरणं प्रभवे वर्तमाने अकारस्य उदयः विभवे वर्तमाने
इकारस्योदयः शुक्लनाम्नि वर्तमाने उकारस्योदयः प्रमोदनाम्नि
वर्तमाने एकारस्योदयः प्रजापतिनाम्नि वर्तमाने ओकारस्वरो
दय एवं षष्ट्याब्देषु प्रवर्तमानेषु अकारादयः पंच स्वरा द्वादश

प्रभवाद्यब्दमेकैकमुदयस्वस्वरादिकः ॥ द्वादशाब्दस्य
वर्षोनाल्लभुक्तिर्वार्षिके स्वरे ॥ २ ॥ इति वार्षिकस्वर ॥
चक्रम् ॥ अस्वरोदितिरेते स्वामी इस्वरस्तोत्तरायणे ॥
वर्षभुक्त्यर्द्धमानेन भोगः षाण्मासिकः स्वरे ॥ २ ॥
॥ इति अयनस्वरचक्रम् ॥ ॥ ॥ ॥

धाउदयंति तत्र अकाराद्येकस्वरोदये एकादशस्वराणामुदयः
स्यात् एतदुक्तं भवति प्रभवाद्येकैकवर्षदशासु प्रभवादिपतिः
स्वरांते एकादशस्वराणामंतर्दशास्यात् प्रभवादिपतिः
ष्ठोदयकालमाह द्वादशाब्दस्येति द्वादशाब्दस्य एवोदयः अर्थात्तद्द
र्षमेकं मासमेकं इत्यादि तत्रवर्षोनाभुक्तिः द्वादशाब्ददशास्वराणांभुक्तिः व
लोकाब्धिनाडिका अष्टत्रिंशत्पलानि चेति मास १।२।४३।३८
एषां प्रभवाद्यंतर्दशास्वराणांभुक्तिः तत्र यदा प्रभवः प्रवर्तते व
र्षवर्षे तत्र स्वरस्य दशा तत्रांतर्दशा आदौ अस्वरस्यैवांतर्दशाभु
क्तिः इकारोपरि उकारस्यांतर्दशावर्तिः तस्यापीयमेव भु
सेमेकादिभुक्तिः तदुपरि इकारोंतर्दशावतिः तस्यापीयमेवभु
रि एकारस्योदयः स्वाकारस्यैवोदयो भवति तद्भुक्तिरमालेन ॥ उकारादुप
तद्दशासु उदयंति एतेनकिं द्वादशाब्दादिनाड्यंतर्दशाकालं ए
कादशाधाविभजेत् ॥ षष्ठ्योक्तांतर्दशाकालो लभ्यते इदमग्रे
वक्ष्यति च ॥ अथायनस्वरोदयमाह ॥ अर्थांतर्दशाभुक्तिः दिन
१६॥२१॥४५॥१ ॥ इत्ययनस्वरचक्रम् ॥ अथ नावर्त
नादि अतेषु अस्वरादीनामुदयमाह अकारादिति मगादिरा
शिद्वयमानुभोगात्षड्भेतेव स्युः शिशिरोवसंत इति संहितो

कन्यात् श्रोषादिना त्रिषु रविभोगाद्दसंतादयः षड्ऋतवो भवंति मासद्वयात्मको ऋतुः यावन्मेषवृषस्थो रविः मिथुनराशिद्वादशांशस्थो रविः एवं द्विसप्तत्यंशाः ७२ तावद्द्विसप्ततिदिनानि तेऽद्विसप्ततिदिनोदये रकारस्योदयः एवं मिथुनांशा द्वादश १८ कर्कस्य त्रिंशदंशाः सिंहस्य चतुर्विंशतिः एवं द्विसप्ततिदिनानि ७२ तेरिकारस्योदयः ॥ सिंहस्य षडंशाः द्वशाः एवं द्विसप्ततिदिनानि ७२ ते इकारस्योदयः ॥ सिंहस्य षडंशाः ६ कन्यातुलयोः पञ्चांशाः ६ वृश्चिकस्य च षडंशाः एवं कन्यादि सप्ततिदिनानि भवंति तेरुकारस्वरस्योदयः ॥ वृश्चिकस्य चतुर्विंशति अंशाः २४ धनुः संपूर्णः मकरस्याष्टादशांशाः १८ एवं द्विसप्तत्यंशाः ७२ एभिरेकारस्वरस्योदयो भवति मकरस्य शेषद्वादशांशाः १२ कुंभमीनयोरंशाः एवं द्विसप्ततिदिने ओकारस्वरस्योदयः अनेन क्रमेण अकारादिस्वराः पंचवसंतादि ऋतूदये उदयं लभंते इत्युक्तं ॥१॥ अथात्र ऋतुषु प्रत्येकस्वरदशासु अंतर्दशास्वरास्त्वेकस्मिन्नाह षड्दिनानीति सुगमम् ॥

अकारादिस्वराः पंच वसंतादिक्रमोदयाः ॥ एकैकस्मिन्नु स्वरेऽप्यादिसप्ततिदिनोदयः ॥१॥ षड्दिनानि रसा नाड्योऽवन्हिवेदपलानि च ॥ अंतरोदयमानं स्यादृतुनाम्नि स्वरोदये ॥२॥ इति यामले ऋतुस्वरचक्रम् ॥ नमस्ये मार्गवैशाखे अस्वरस्योदयो भवेत् आश्विने श्रावणे ज्येष्ठे इकारो नायकः स्मृतः ॥२॥ उकारश्चैत्रपौषस्यादेकारो ज्येष्ठकार्त्तिके ॥ ओकार उदयं याति माघफाल्गुनमासयोः ॥२॥ द्वे दिने च व्ययो नाड्यश्चाष्टत्रिंशत्पलानि च ॥ अंतरोदयप्रोक्तः सावत्रवै मासिकस्वरे ॥३॥ इति यामले मासस्वरचक्रम् ॥ ॥ अस्वरः शुक्लपक्षेशः कृष्णपक्षेष्टाऽस्वरः ॥१॥ जातिकांतरे भुक्तिः मासभुक्त्यर्धमानतः ॥२॥ इति पक्षस्वरचक्रम् ॥ अकारादिक्रमान्नस्य नंदादितिथिपंचकम् ॥ दिनस्वरोदयो नित्यं स्वस्वतिथ्यादिजायते ॥२॥ अस्यांतरोदयः पंचघट्यस्तारापलानि च ॥ तिथ्यादौ घटिका पंच पलानि सप्तविंशतिः ॥ अंतरोदयप्रोक्तो मा दिनस्वरस्य सूरिभिः ॥२॥ इति यामले दिनस्वरचक्रम् ॥ घटीस्वरो घटीः पंच पलानि सप्तविंशतिः ॥ अस्यांतरोदयः ओको घटिकाधर्ममानतः ॥२॥ इति यामले घटीस्वरचक्रम् ॥ ॥ ॥ छ ॥ ॥

॥ अथ मासस्वरोदयानाह ॥ नभस्ये मार्गवैशाखेति ॥१॥ उकारश्चेति ॥२॥ द्वे दिनेति सुगमं ॥३॥ इति मा॰ स्व॰ चक्रम् ॥ अथ पक्षस्वरमाह ॥ अः स्वरः शुक्लपक्षेति ॥ ॥ तथा च दिन २ दंड २१ पल ४५ इति पक्षस्वरच॰ ॥ अथ दिनस्व॰ अकारादावितिसार्द्धश्लोकः ॥ इति दि॰ स्व॰ चक्रम् ॥ अथ घटीस्व॰ तिथ्यादाविति १ इति घटीस्वरचक्रम् ॥

॥ ऋतुस्वरचक्रम् ॥

अ	इ	उ	ए	ओ
७२	७२	७२	७२	७२
६	६	६	६	६
३१	३२	३२	३२	३२
४३	४३	४३	४३	४३

पक्षस्वरचक्रम्

अ	इ	उ	ए	ओ
कृ॰	शु॰	०	०	०
१५	१५	१५	१५	१५
२१	२१	२१	२१	२१
४५	४५	४५	४५	४५

॥ मासस्वरचक्रम् ॥

॥ अ	इ	उ	ए	ओ ॥
मा	आ	चै	ज्ये	मा
भा	श्रा	पौ	का	फा
वै	ज्ये	०	०	०
२	२	२	२	२
४३	४३	४३	४३	४३
३८	३८	३८	३८	३८

॥न ति॥
॥ज री॥
॥८॥

8

॥दिनस्वरचक्रम्॥

अ	इ	उ	ए	ओ
[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
५	५	५	५	५
२७	२७	२७	२७	२६
२६	२६	२६	२६	२६
३०	३०	३०	३०	३०

श्रीः

॥घटिस्वरचक्रम्॥

अ	इ	उ	ए	ओ॥
१	२	३	४	५
६	७	८	९	१०
११	१२	१३	१४	१५
५	५	५	५	५
२७	२७	२७	२७	२७

अथ द्वादशाब्दादिनाड्यंतेषु अंतरोदयमाह ॥ द्वादशाब्दाडी
ति अत्रांतरोदयेकालमानं पंचधा उक्तं वर्षमासइति यत्न:
एतैरेव पंचधाकालमानैः कृतं परिणमति ॥ कुग्रोक्तमाह वर्ष
मेकं मासमेकमित्यादि कस्य परिपाकवर्षं ९।२।४३।३८ कस्यापि
मासादिभिः कस्यापि द्वे दिने गयो नाड्यादिभिः॥ तावद्वर्षादि रूपं मा
नं॥१॥ अथ भुक्तभोग्यो तरोदयस्वरात्कुतुंगलितमाह॥ द्वादशाब्द
इति॥ अथोदाहरणम्॥ अधुना प्रभवादि द्वादशसंवत्सरे इकारस्व
रो भुक्तः वर्तमानकाले प्रमाथि संवत्सरादारभ्य द्वादशाब्दपर्यंत
मिकारस्वरस्योदयो वर्तते शाके १४३७ समये चैत्रशुक्ल प्रतिप
दि तस्य भुक्तवर्षाणि चत्वारि ४।१।२५ पंच पंचाशद्दिनानि
वर्षाणि षष्ट्यधिकशतत्रय ३६० गुणितानि दिनसहितानि
१४९५ शरगोब्धिसुधांशव: षष्ट्या गुणिते जातं ८९७०० एता
नि भुक्तदंडानि षष्ट्या गुणिते पलानि ५३८२००० अथ द्वादशा
ब्दांतरोदयपलानि २४१३७८० व्योमकुंजरश्रोलाग्निसुधाकर
युगेंदव:॥ द्वादशाब्दांतरोदये हार: अनेन हारेण इकारस्वरभुक्ता
दपलेभ्यो लब्धा भुक्तस्वरा स्त्रय: ॥इकारादारभ्य इउए स्वरा भुक्ता
ओकारो तदशाधिपत्वेन वर्तते॥ तस्यापि भुक्तभोग्यादिनानि ३१६
।५२। भोग्यदिनानि ७५।५२ एतावता उकारस्य उदय: चैत्रशु
क्ल प्रतिपदारभ्य आषाढकृष्णेति पर्यंतं विद्यते ॥ तदुपरि
आकारस्यांतरोदयो भविष्यति॥ अथ वार्षिकस्वरोदयांतरोद
योदाहरणम्॥ अधुना षोडश: संवत्सरश्चित्रभानु: शकाब्दो
गत: शकाब्दास्तु भुक्ताश्च भवंति भोग्यवर्षस्य परिचायका:
यथा आदौ कल्पारंभे चैत्र प्रतिपदि भुक्ताव एव न: ततो वर्षे
प्रमाणदिनेषु व्यतीतेषु पुनश्चैत्रशुक्ल प्रतिपदि एकं वर्षं गतं
लिख्यते॥ तद्वर्षभोग्यस्य द्वितीयस्य परिचायकं ॥ तथा शका

दा एवैकेषु व्यतीतेषु वर्षेषु शकाब्द समूहा जाताः ॥ तत्रवार्हस्पत्यवर्षाणि प्रभ
वंति तस्योपपत्तिः सिद्धांतादिषु वराहसंहितासु रविभगणप्रमाणं
रविवर्षाः गुरुभगणेन वराहमिहिरोक्ताः जिनयमवेदभुजाग्निहव्य
भुजः ॥ एकैकस्मिन्वर्षे किंचित्कालाधिकं गुरोराशिभोगः तत्प्रमा
णेन वराहमिहिरेण जिनयमत्तुहव्यभुजो भगणाः कल्पिताः गुरु
भगणेन द्वादशघ्ना गुरुवर्षाः स्युः ततो रविवर्षभगणेभ्यो गुरुवर्षा
धिकाः द्वयोरंतरे गुरुवर्षाधिका ततो ३६४२२४ गुरुभगणाः भगण
द्वाः ४३७०६८८ सौराब्दाः ४३२०००० अंतरं ५०६८८ अपवर्तांकः २३०४
शकादौ गुरुः २।८।३९।२२ गुरुवर्षशेषं रविवर्षाणि च केनापपव
र्त्यै गुरुभगणेन प्राग्गुणकाराः ॥ २२ द्वाविंशतिः हारजाताः शराद्रि
वह्निदवः ३८७५ गुणभागहाराभ्यामेकवर्षेनि गुरोर्मध्यमगत्या रवि
वर्षाभ्यंतरे भोगोलभ्यते राश्यादिः १।०।२१।७ सम्यवादे भोगो गुरुराशि
रेव तदुपरि आग्रिमवर्षस्य आंतिमकलाः विकलाभोगः एकरेवाग
कृति पंचकलाभोगः गत्यहं गुरोः आतस्तेन भोगेन कलाविकलाभ्यां
प्राप्तदिनानि चत्वारि दंडाश्चयोः दंडाश्चयोदशाधा आग्रिमवर्षं
चैत्रशुक्लप्रतिपदः प्राद्देवत्रयोदशदंडसहितं चतुर्भिर्दिनैः प्रवृत्ताः
एवं तृग्रिमवर्षस्य प्रवृत्तिः रष्टभिर्दिनैः षड्विंशति दंडैः प्राद्देवप्रवृ
त्तिर्भवति एवं सर्वेषां प्रवृत्तिर्ज्ञातव्या अतएवास्माभिर्व्याख्यानं टीका
यांकृतं ॥ शकाब्दाभुक्तसंवत्सराप्रवर्तंते शेषादिनानि भोग्यस्य वर्षस्य
गतान्येवतेनाग्रिमवर्षे स्पष्टप्रवृत्तिर्वक्तव्या अस्माकं मतमेतत् ॥ ॥
गणितद्वारेण दर्शितं अग्रेपि उदाहरिष्यंति ॥ ननु तानि दिनानि प्र
तवर्षस्य भुक्तानि भुक्तवर्षेभ्यो भुक्तफलानि न प्राप्यंते यथा गुरोरेव
भगणादयः अथोदाहरणम् शके १४३७ गतशकाब्दात् प्राप्त
वर्षभुक्तवर्षाणि षोडशसप्तदशमध्यसुभानोः षट्पंचाशद्दि
नानि ५६ भुक्तान्यागतानि तेन चैत्रशुक्लप्रतिपदे १ शका
के १४३६ समयेमाघशुक्लचतुर्थी सप्तदशमः सुभानुः प्रवृ
त्तः तस्मात्तु भुक्तदिनानि पंचपंचाशत् ५५।४५ पंचचत्वारिंशद्दं
डाः सुभानोरधिपतिरिकारस्वरः तस्य भुक्तफलानि सप्तशताधि
कं लक्षद्वयं २००७०० अपवार्षिकस्वरांतर्दशाभोगफलानि
११७८२२ सुधांशुधरस्मिनागपर्वतेंदुः सुधांशवः अयं हारेरा
शि रंतरोदयस्वरभुक्तफलेभ्यो हारजाप्तः वार्षिकस्वरात् अंतर्द
शास्वरः इकारस्वरात् द्वितीय उकारस्वरस्तैर्त्यां प्रवर्तंते त
स्य भोग्यदिनानि नव ९ द्विचत्वारिंशद्दंडाः ४२ तेन किंजा
तं चैत्रशुक्लदशम्यां द्विचत्वारिंशद्दंडोपरि एकारस्यांतरोदय
स्य प्रवृत्तिर्भविष्यति वैशाखशुक्लद्वादश्यां दंडे पंचविंशति २५।४०
चत्वारिंशत्पलपर्यंतम् ॥ अधुना चैत्रशुक्लप्रतिपदिकस्योपन

॥न॰ ति॰॥
॥ज॰ टी॥
॥ ६ ॥

स्वरस्य उदयोंतरोदयश्च विद्यते तदुदाहरणम् अस्य सोदाहृति ए
स्वामी इस्वरस्योत्तरायण इति वचनात् चैत्रप्रतिपदि उत्तरायणे
इकारोदयः प्रवर्तते तथाचायननिर्णये वराहः दक्षिणमयनं
सवितुः कर्कटाद्यं मृगादितस्त्वन्यदिति वचनात् ॥ शाके १४३६
समये पौषशुद्ध १२ द्वादश्यां संमकरेऽर्कः ततआरभ्य चैत्रशुक्ल
त्रयोदश्यां तमेषेऽर्कः ॥ उदगयनं तेन चैत्रशुक्लप्रतिपदि इकार
स्वरस्यैव उदयो विद्यते ॥ अथांतरोदयानामुदाहरणम् मृगादिषु
अंशाः ७८ एषां पलानि २८०८०० अष्टशताधिकाष्टाविंश
तिसहस्राणि ॥ अयनस्वरांतरोदयपलानि ५८९०९ असावंकरा
शिरयनस्वरांतरोदयभोगः अयमेव हारः अनेनायनभुक्तपलेभ्यः
प्राप्ताश्चांतरोदयस्वरास्त्रयः ३।४९।५ एकोनपंचाशद्दंडाः चैत्रशु
क्लप्रतिपदि एकोनपंचाशद्दंडोपरि उकारस्वरोदयः ॥ वैशाखव
दितृतीयायां दंड ३३ पर्यंतं ॥ अथ ऋतुस्वरोदयांतरोदयोदा
हरणम् अथऋतूनां प्रवृत्तिः सूर्यसंक्रमतः तथाच संहिताकारः
मृगादिराशिद्वयभानुभोगात् षड्ऋतव इति वचनात् मकरसंक्र
मणमारभ्य चैत्रशुक्लप्रतिपदि अष्टादशदिनानि मीनसंक्रमण
तञ्जातानि मीनादारभ्य वसंतऋतुः एतेन अकारः स्वरोदयो वि
द्यते ॥ अथांतरोदयः अथांतर्दशाकालः षड्दिनानि ६।३६।४३
एषां पलानि २२५६३ रामांगेषुगुणाश्विनः असावंतरोदयहा
रः अथोदयस्वरः अथोदयस्वरस्य भुक्तपलानि ६४८०० स्वरव
नागाब्धिरसाः असौ भाज्यराशिः एभ्यो हारप्राप्ता अंतरोदयस्व
रोदयः २।१।५३।३८ पलानि ९ ते वर्तन्ते अस्यांतरोदये अ
कार इकारो भुक्तस्वरो उकारस्वरस्य अंतरोदयो वर्तते तस्या
भोग्य चैत्रशुक्लप्रतिपद्दिनमेकं अष्टत्रिंशद्दंडाः नवपलानि चै
त्रशुक्लतृतीयायां अष्टत्रिंशद्दंडपर्यंतम् ॥ अथ मासस्वरो
दयोतरोदाहरणम् चैत्रशुक्लप्रतिपदारभ्य चैत्रशुक्लप्रति
पत्पर्यंतं षोडशदिनानि तत्र मासांतरोदयस्वरस्य विभागः द्वे
दिने अष्टयो नाड्यः ४३ अष्टाविंशत्पलानि च ॥ एषां पला
नि भागहारः ९८६२८ नागेन्दुगजरविचराः उदितस्वरस्योकार
स्य भुक्तपलानि ५७६००३ असौ भाज्यराशिः भाज्यभक्तः पंच
मोंशो नवाविंशतिदंडाः तदुपरि एकारस्वरस्यांतरोदयः चैत्र
शुक्लचतुर्थ्यां दंड ५ पर्यंतं ॥ अथ पक्षस्वरस्योदाहरणम् ॥
अथ स्वरः शुक्लपक्षे शुः शुक्लपक्षे इस्वरः चैत्रप्रतिपदारभ्य
इस्वरस्य उदयो विद्यते चैत्रशुक्लप्रतिपदि उदयोंतरोदयो
पि इकारस्यैव ॥ अथ दिनस्वरोदयोपि इकारस्यैव ॥ अथदि
नस्वरोदाहरणम् ॥ चैत्रशुक्लप्रतिपदि अकारस्य उदयः आदौ

पंचदंडसमन्विंशति पलानि पर्यंतमं नरोदयोऽपि प्रकारस्यैव १॥२
इति पठी स्वरचक्रम् ॥ द्वादशाब्दानिनाड्यंता इति ॥१॥ वर्षमासा
दिति ॥२॥ द्वादशाब्दस्वरा इति ॥३॥ लभ्येति ॥४॥ अथानन्तरं द्वादशाब्दादी
नां उदितानां नरोदयस्वराणां पंचबालादिकावस्थेति नामस्वरवशे
न द्वादशाब्दस्वरादीनां पंचबालादिकावस्था भवंति अवस्थाकल्प्यं
ते तेषामवस्थाभेदएव नास्ति ते तु सर्वेषां साधारणाः अतः स
र्वेषां स्वनामस्वरवशेन तेषां पृथगवस्थाः परिकल्पनोदितस्य द्वा
दशाब्दादिस्वरस्य कस्यचिन्नामवशेन बालसंज्ञा भवति कस्यचि
न्नामस्वरवशेन कुमारसंज्ञा भवति कस्यचिद्युवेत्यादि संज्ञा परिकल्प्य
ते ॥५॥ ताः पंचसंज्ञा आह ॥ आद्यो बालः कुमार इति । आत उक्तं नाम

द्वादशाब्दादिनाड्यंताः स्वस्यानाम्नश्चकालतः ॥ उदयांते
पुनस्तत्रां नरे रेकादशोदये ॥१॥ वर्षमासदिवानाडीपला
नि चक्रमादिदम् ॥ कालमानं मयाप्रोक्तं पंचधात्र स्वरोदये ॥२॥
द्वादशाब्दस्वरादीनां युक्तं पलमयं तु तत् ॥ तद्भुक्तं स्वस्वमानेन
लभ्यं शेषं द्विकं भवेत् ॥३॥ लब्धे युक्ते स्वराज्ञेयाः शेषे चै
वोदिताः स्वराः ॥ अस्मिन्नवस्थादिभक्ते तु युक्तः स्यादुदितः स्व
रः ॥४॥ उदितस्य स्वरस्य स्युर्नामस्वरवशेन ताः ॥ पंचबालादि
कावस्थाः स्वस्वकालप्रमाणतः ॥५॥ आद्यो बालः कुमारश्च युवा
वृद्धो मृतस्तथा ॥ निजावस्थास्वरूपेण फलदा नात्र संशयः ॥६॥
किंचिल्लाभकरो बालः कुमारस्त्वर्धलाभदः ॥ सर्वसिद्धिप्रदो युवा
वृद्धो हानिर्मृते क्षयः ॥७॥ यात्रायुद्धविवादे च नष्टे दृष्टे
रुजान्विते ॥ बालस्वरो भवेच्छ्रेष्ठो विवाहादिशुभेऽशुभः ॥८॥

स्वरवशेन संज्ञा भवति तर्हि नामस्वरवशेनैव केन प्रकारेण तथा व्याख्या
यते य एव नामस्वरः स एव द्वादशाब्दादिस्वरं नरोदयस्तदा स बालसंज्ञः ना
मस्वराद्द्वितीयः स्वरः कालजस्तदा कुमारस्वरसंज्ञो भवति नाम जातृती
यो युवासंज्ञः चतुर्थो वृद्धसंज्ञः पंचमो मृतसंज्ञ इति अनेन प्रकारेण ना
मस्वरवशेन संज्ञाः कल्प्यंते ताः संज्ञानिजावस्थास्वरूपेण फलदाः यस्य
यः संज्ञास्वरः स संज्ञास्वरूपफलदः ॥६॥ किंचिल्लाभकृदिति ॥७॥ कुत्रेदं फ
लं परिणमति तद्व्याकोशमाह यात्रायुद्धेति ॥८॥ सर्वेति ॥९॥ शुभा

सर्वे शुभकार्येषु यात्राकाले तथैव च ॥ कुमारः कुरुते सि
द्धिं संग्रामे सतु तो जयः ॥९॥ शुभाशुभेषु सर्वेषु मंत्रयंत्रा
दिसाधने ॥ सर्वसिद्धिप्रदो ज्ञेयो यात्रायुद्धे विशेषतः ॥१०॥
ध्याने देवार्चने दीक्षायां मंत्रप्रकल्पने ॥ वृद्धस्वरो भवेच्छ्रे
ष्ठो रणे भंगोपयंगमे ॥११॥ विवाहादिशुभं सर्वं संग्रामा
द्यशुभं तथा ॥ न कर्तव्यं शुभं किंचिज्ज्ञानेन मृतस्वरोदये ॥१२॥

शुभेष्विति ॥१०॥ ध्याने देवार्चने इति ॥११॥ विवाहादीति ॥१२॥ ॥ ५५

अथ पंचबालादिकावस्थानां यथोत्तरं बलमाह ॥ मृतो बाल इति सु
गमं ॥ २२ ॥ यस्मा यस्य तृतीयो युवा स तस्मात्स जयं लभते यस्मा
यस्य च तुर्यः तस्मात्तु वृद्धो रणे भंगं प्राप्नोति यस्य यस्माद्द्वितीयः
तस्माद्द्वितीयात् सर्वतो जयं लभते यो यस्येति योधयोर्द्वयोर्यस्मा
द्वृत्स्वरा यः पंचमः स मृत्युदायकः यतः पंचमस्य मृत्यु संज्ञा
कथितास्तेभ्यो सह युद्धं न कुर्यात् स्वबलं स्वरात् वृद्ध मृत इति
मृतबालयोः स्वरयोः स्वरयो बील स्वरो बली बालवृद्धयोर्वृद्धः
वृद्धकुमारयोः कुमारो बली कुमारयुवयोर्युवा बली अयोत्र
तबालयोरधिको बालो वृद्धः बालवृद्धयोर्वृद्धोतिबलः एवमुत्त
रोत्तराधिके तथाधिकं बलकल्पना ॥ २४ ॥ अथ विशेषात् द्व
दिचातुरंग युद्ध सम बलफलमाह ॥ मृत्युर्हीनेति ॥ उभयोर्भटयो

मृतो बालस्तथा वृद्धः कुमारस्तरुणः स्वराः ॥ यथोत्तरब
ला सर्वे ज्ञातव्याः स्वरवेदिभिः ॥ २३ ॥ यो यस्य पंचम
स्थाने स स्वरो मृत्युदायकः ॥ तृतीये तु भवेत्सिद्धिः शे
षा मध्यफलप्रदाः ॥ २४ ॥ मृत्युर्हीनस्वरे नाम्नि जयो
नाम्नि स्वराधिके ॥ समनाम्नि भवेत्साम्यं संधिर्जयपरा
जयो ॥ २५ ॥ एकस्वरे भवेत्साम्यं द्वितीयोर्द्धफलप्र
दः ॥ तृतीये तु फलं पूर्णं तुर्ये बंधः पराजयः ॥ २६ ॥

वृद्धे हीनः स्वरे सति मृत्युः यो हीनः स्वरः सोधिकस्वरान्मृत्युमभ्येति
वृद्धस्वरान्मृतिं प्राप्नोति वृद्धो कुमारतः मृतस्वरो बालस्वरात् मृतिं
प्राप्नोति बालस्वरः कुमारस्वरात् मृतिं प्राप्नोति कुमारो युवस्वरा
त् यत उक्तं मृतो बालस्तथा वृद्ध इति अकारादाकारोधिकमात्रकः
आकारादिकारः इकारादीकारः ईकारादुकारः उकारादूकारोधि
कस्वरः एकारादैकारः एवमग्रेपि अथायमर्थः कथं स्या
त्यालः कविशेषो न भवति तत्रोच्यते मृतो बालस्तथा वृद्ध इत्यत्र
यथोत्तरबलाः कथिताः ते नार्थे नैव कविना कथं नोक्तं अत्र नाम्नो
ति हीनस्वरता उक्ता न तु नाम्नि बालादिकावस्था हीनाधिकानोक्ता
स्वराधिके नाम्नि जयः उभयोर्भटयोर्यस्य नाम्नि हीनः स्वरो भवति सो
धिकः स्वरान्मृत्युमेति उभयोस्तु सममेव फलं ॥ अत्रोदाहरणम् = ॥
एकस्य एक एव नाम्न आद्यवर्णे अपरस्य द्विस्वरः अधिकस्वरात्
हीनस्वरो म्रियते स्वराधिके ऽयमेव जयः तथा एको द्विस्वरः अ
न्यस्त्रिस्वरः तथापि अधिकस्य जयः तथा व्यंजनानि स्वराः आकारा
दयो यथोत्तराधिकाः अयमर्थः कैश्चिल्लक्षणं ज्ञानंति समनाम्नि
भवेत्साम्यं समस्वरे नाम्नि द्वयोर्भटयोस्तुल्यमेव फलम् तत्तुल्यता
तामाह संधिर्जयपराजयौ एकद्वित्रिचतुःपंचमात्रिके यदि नाम्नां तुल्य
तायदि तदा सममभवतीम त्री अथवा संग्रामे जयः संग्रामादुभयोरपि

यथो त्रस्वलाद्युर्दु ज्ञातव्याः स्वर
प्रारम्भे ॥ तत्रैव ॥ एकमात्रक द्विमात्रका
दिलक्षणं ॥ एकमात्राकवर्णे त्रिवर्णे
अर्धमात्रि
कः ॥ ४ ॥

॥ १५-१२

॥ ५५ ॥

पराभवः पलायनमेवपराभवः इयमेवसमता तथाचसमरसारे हानिर्मृतिर्विजय
मात्रतयाधिकोमात्रतुल्याजयंचसमस्वादिर्वविनिर्दिशेत् ॥ तुल्यमात्रेस्वयर्थः ॥ तथाच
मात्रकायां एकमात्रोद्विमात्रश्चत्रिचतुःपंचमात्रकः कुलिकद्रुपकःकेतुकोद
णःपंचमात्रकः ॥ अन्यच्च स्वरयोर्जन्ययोःसंख्यानामंशाः २५ हीनाधिके जयो
हीनेमृत्युः साम्येसंधिर्वासमरागमः ॥ २५ ॥ एकस्वरेति एकस्वरेद्वयोर्बालस्वर
ल समभेवतकस्यापिजयोनपराजयः बालकुमारयोःसंग्रामेद्वंद्वफलंकुमारस्य
किंचिज्जयः वाक्षनोः फलंपूर्णं युनःसर्वेपदेजयः बालवृद्धयोर्बालस्यवधः
बालेतरयोर्मृत्युमात्रं २६ अथजयाभिलाषीशत्रुंयथाजयतितज्जयसम
यमाह ॥ शत्रोर्मृत्युःस्वरेति यस्मिन्कालेशत्रोर्मृत्युःस्वरोभवति एवंशत्रोर्मृ
त्युस्वरे स्वस्यस्वनिस्वरेप्राप्ते तत्कालेयुद्धंआरभेत विजयोभवतिनान्यथा
किंतुसत्यमेव सर्वजयहेतोमुख्यःपंथोयम् ॥ २७ ॥ इदंतात्कालयुवास्य
रप्राप्तेविलक्षणंसमाचष्टे तत्कालेमात्रकेति ॥ २८ ॥ अतोविति त
त्कालेवियावादादिचतुर्विधयुद्धकालेनामजोमात्रकःस्वरःस्वस्यपंच
मस्वरगास्यः मात्रास्वरवशेनयुद्धकालेनाडीस्वरस्योदयःस्वस्यपुत्रस्वरा

शत्रोर्मृत्युस्वरेप्राप्ते निप्राप्ते स्वकीयके ॥ तत्कालेआरभे
युद्धं विजयोभवतिध्रुवम् ॥ २७ ॥ तत्कालेमात्रकोग्रा
ह्योदिनवर्णस्वरस्तथा ॥ पंचैव ग्रहस्वरो ज्ञेयोग्रामेजीवस्व
रोदयः ॥ २८ ॥ अतोराशेर्यथाकोग्राह्यः प्रश्नासेधिस्यसं
भवः ॥ अर्धेपिंडस्वरोज्ञेयो योगोद्वादशनाडिके ॥ २९ ॥
सर्वकालंबलीवर्णःसर्वव्यापीनसंशयः ॥ तस्मात्सर्व
प्रयत्नेनवर्णैर्नीत्यंबलाबलम् ॥ ३० ॥ ॥ ॥

ख्योभवति शत्रोर्मृताख्यः एवंसतियुद्धंकुर्यात् जयएवस्यात् अत्रोदा
हरणम् देवदत्तविराजयोर्युद्धे तत्कालेनाडीस्वरे आकारेप्राप्ते इकारोमा
त्रास्वरयोर्बलेन देवदत्तस्याकारोयुवा विराजस्याकारोमृत्युस्वरः एवंल
क्षणे तत्कालेआरभेयुद्धमितिसर्वथा देवदत्तस्यजयः अथानयोर्जयका
लेदिनस्वरोययुकारोदयः इकारवकारयोर्वर्णस्वरयोरोकारः आकारस्य
द्वयोर्वृद्धकुमाराख्ये तद्वशाज्जयोविराजोदेवदत्तंजयति ॥ अथदेवदत्त
स्यग्रहस्वरएकारः तद्बलात्प्रथमपक्षे आकारस्योदयः सवृद्धः शुक्ले इकारस्यो
दयः सेमृतस्वरः मृताद्वृद्धोजयप्रदः ॥ देवदत्तस्यजीवस्वरओकारः तद्बला
त् वैशाखभाद्रपदमार्गेषु आकारस्यउदयः तेसमाः कुमाराख्याः युद्धबलं
देवदत्तस्य ॥ आषाढश्रावणाश्विनमासेषु इकारउदयति जीवस्वरबला
त् युवाख्यामासाः युद्धेदेवदत्तस्यजयप्रदाः चैत्रपौषयोरुकारोदयः
तोजयस्वरबलाद्वृद्धो देवदत्तस्ययुद्धभंगप्रदौ ॥ ज्येष्ठकार्तिकमासे
एकारस्योदयः जीवस्वरबलान्मृत्युमासौ देवदत्तस्ययुद्धेमृत्युदौ इति
मासिबलाबलं ॥ देवदत्तस्यरेवती प्रथमपादेजन्मसमभत्वात् मीनरा
श्यधिष्ठितत्वात् राशिस्वरओकारएवतद्बलात् ॥ अतुस्वरेइकारोदये
कुमारोदयः तत्रमध्यतोजयः ॥ अतुस्वरे इकारेयुवाख्ये अत्यंतोजयः
उकारेऽत्रतुस्वरोदयेवृद्धाख्ये युद्धेदेवदत्तस्यपराजयः ॥ एकारेऽतु

॥न॰ज॰॥ स्वरे श्रायेराशिस्वरबलान्मृत्युः॥ देवदत्तस्य नक्षत्रस्वरो ऽकारः आ
॥ज॰दी॥ कारस्वरबलात् आस्वरोदक्षिणे स्वामीति न्यायात् अयनस्वरो
बालः दक्षिण स्वरः कुमारः बालायनस्वरे युद्धे भंगः कुमारस्वरे
॥११॥ सङ्गतो जयः॥ अथ पिंडस्वराज्ञेया इति न्यायात् देवदत्तस्य पिंड
स्वर इकारः तद्वला द्वार्षिकाकार स्वरोदये मृत्युस्वरोदये तद्युर्वे
॥ युद्धे मृत्युः॥ एवमिकारस्योदये बाले पराभवः॥ उकारे वार्षिके
स्वरोदये कुमाराख्ये सङ्गतो जयः एकारे वार्षिक स्वरोदये सर्व
जयः॥ ओकारे वार्षिके स्वरे वृद्धाख्ये युद्धे पराजयः॥ अपि देव
दत्तस्य योगस्वर उकारः तद्वशाद्द्वादशवार्षिके स्वरे बालसंज्ञके यु
द्धे पराजयः॥ अकारे द्वादशवार्षिके पिंडस्वराकुमाराख्ये सङ्गतो
जयः॥ इकारे द्वादशवार्षिके स्वरे योगस्वराद्युवाख्ये युद्धे सर्व जयः॥
उकारो द्वादशवार्षिकोदये योगस्वरबलाद्वृद्धाख्ये सङ्गतः पराभ
वः॥ एकार द्वादशवार्षिकः स्वरोदये मृताख्ये सङ्गतो मृत्युः॥ ए
वं बलानि युद्धे दयानि॥ १९॥ अथ सर्वस्वरबलान्ययमन्याह इ
दमेव सर्वकाले सर्वस्माद्बलवत्तरं बलमाचक्षे॥ सर्वकालेव

यथापादो हस्तिपदे प्रविष्टाय थाहि नद्यः खलु सा
गरेषु॥ यथाहरे देहगताश्च देवा स्तथा स्वरा वर्ण
कुलोद्भवाः॥ २१॥ साधनं मंत्रयंत्रस्य तंत्र योगं
च सर्वदा॥ अधोमुखानि कार्याणि मात्रा स्वरबले
कुरु॥ २२॥ वर्णस्वरबले सर्वं कर्तव्यं च शुभाशु
भम्॥ सिद्धिदं सर्वकार्येषु युद्धकाले विशेषतः॥ २३॥
मारणं मोहनं स्तंभं विद्वेषोच्चाटनं वशम्॥ विवादं
विग्रहं घातं कुर्यात्कूर स्वरोदये॥ २४॥ अन्नपाना
दिकं सर्वं वस्त्रालंकारभूषणं॥ विवाहं विवाहं
च कुर्याज्जीवस्वरोदये॥ २५॥ आसादाराम हर्म्या

लीवर्ण इति एतावता वर्णस्वरादेव सर्वकालेषु द्वादशवार्षिक
अयनर्तुमासपक्षदिननाडीषु सर्वं वादजयबलाबलं कुर्यात् २०
पुनरेवतद्बलं समर्थयन्नाह यथापदेति स्वरावर्णबलेनव
लिनः अबलेना बलाः २१ कथं तेषां कथनेन किं प्रयोजनमि
त्याह साधनं मंत्रयंत्रेति २२ वर्णः स्वरेति २३ मारणं मोह
नमिति २४ खानपानादिकं सर्वमिति २५ आसादारामेति २६

ति देवतास्थापनं तथा॥ राज्याभिषेचनं दीक्षाकर्मस्यराशि
कु स्वरे ॥ २६॥ शांतिकं पौष्टिकं यात्रा प्रवेशं बीजवापनं॥ स्त्री
विवाहं तथा सेवा कर्तव्या मस्वरोदये॥ २७॥ शत्रूणां देशभंगं
च कोष्ठ युद्धं च वेष्टनम्॥ सेनाध्यक्षस्य यात्रा कर्तव्यः पिं
ङ्गोदये ॥ २८॥ योगेन साधयेद्घोरं दैत्यं सानसंभवम्॥
आर्णवं शाम्भवं चैव शाक्तं पंचतत्त्वीयकम्॥ २९॥ शांतिक
शांतिकं पौष्टिकमिति २७ शत्रूणां देशभंगमिति २८ योगेनेति २९
इति षोडशस्वरविवरणम्॥ तिथिवारं च नक्षत्रमिति तिथिस्वरोदयः वार
स्वरोदयः अहस्वरोदयः नक्षत्रस्वरोदयः एकांउदयाः एषकं एषकं ऊ आयत्र
वर्णस्वरवशात् तिथिवारनक्षत्राणां त्रयाणां उवाच भवते पात्रानुपूर्व्यादि
च विशेषतः १ अथ षोडं पंच षिलनेन तत्तत्स्वरं भवेत्तद्दिनवर्ज्यं पिस्याह पु
स्यनादिमं वर्णमिति २ अनेनेति यद्दिने तिथिवारर्क्षजे म नामिति सम्पते
शत्रौ नौ म वशेन तद्दिने मे अभिचारेण धातुं साधयेदित्यर्थः ३ इति तिथिवारनक्ष
त्रस्वरबलम्॥ अथ बालकुमारादीनां संख्याऽमाणमाह॥ बालस्वरादि

दये षोडशस्वरविवरणं॥ तिथिवारं च नक्षत्रं एषकं एषकं समा
श्रितं यत्तदेकत्रसंमीस्य कुर्याद्वर्णस्वरोदयं॥ १॥ यस्य नामा
दिमं वर्णं तिथिवारर्क्षजं स्मृतं॥ तद्दिनं वर्जयेत्तस्य हानिः स्यात्तु
करं यतः॥ २॥ अनेन स्वरयोगेन शत्रूणां मारणादिकम्॥ मं
त्रयंत्रक्रियाहोमं साधयेत्तद्दिने बुधः॥ ३॥ इति तिथिवारन
क्षत्रस्वरचक्रम्॥ बालस्वरादिकावस्था भानुसंख्याभवे
तिता:॥ उदयं ते क्रमेणैव स्वस्वचक्रप्रमाणतः॥ १॥ घटिका॥
स्वे दिने पते मासे अत्वयनेन तथा॥ वर्षे द्वादशवर्षे च अवस्था
जायते स्वरे॥ २॥ अष्टलानिघटी पंच सार्द्धाहो अहर्दिनद्वयं॥ युष
कं पक्षमासौ दं मवेस्य प्रभिति: क्रमात्॥ ३॥ भुक्तस्वरप्रमाणं

कावस्थेति १ द्वादशावस्थाकुत्र भवंत्याकांक्षयाह घटिकास्वेति २ घटि
कादिकाले अवस्थानां स्थितिप्रमाणमाह अष्टेति ३ भुक्तस्वरेति अथवा
लादीनां प्रत्येकं द्वादशावस्थोदरहरणम् चैत्रशुक्लप्रतिपदा भुक्तघटिका ३३
दिनावस्थाहारप्रमाणं पंच घटयः पंचेहारेण आप्ताः ६ अवस्था भुक्ता दृशेयं
घटी सप्तमावस्थाविधेये तेषु स्यप्रतिपद्बालसंज्ञा कुमार युवा वृद्धा मृता चेत

त्र बाला सप्तमी रोजदा
कुमारस्था शांतिकरी ७
सकामनेष्टिपुंवारस्था
वृद्धावस्था रात्रिनिद्रा॥ मृ
तावस्था वह्निदाहा॥ एता
बालाद्यावस्था पंचघटी
प्रमाणेन तत्र यथितिथि शात्
घटिकाप्रमितिर्णीता:॥
तत्रदेवदत्तस्य दिनच
र्यायां वर्णस्वर उकार
वशेन देवदत्तस्य प्रति

०	०	॥तिथिवारनक्ष			त्रस्वरचक्रम्॥				
अ	इ	उ	ए	ओ	मं	कु	ह	बु	श
क	ख	ग	घ	च	र	चं	०	००	००
छ	ज	झ	ट	ठ	रे	पुं	उ	अ	अ
ड	ढ	त	थ	द	अ	ति	[illegible]	भ्ये	ध
ध	न	प	फ	ब	भ	कृ	वि	म	श
भ	म	य	र	ल	कृ	म	स्वा	पू	पूभा
व	श	ष	स	ह	रो	पू	चि	उ	उभा
१	२	३	४	५	मृआ	००	००	०	०
६	७	८	९	१०	००				
११	१२	१३	१४	१५	००				

॥ न॰ प्र॰ जा॥
॥ जं॰ टी॥
॥ ९२॥

12

पत्कुमाराख्या॰ तद्दलासु देवदत्तस्य शांतिकरी अवस्था भविष्यति अने
नोदाहरणेन सर्वेषामवस्था फलं निर्णेतव्यम् एतानि पंच वस्था फला
नि द्वादश षोडश संख्यानि स्वस्वभुक्तिप्रमाणेन घटिकाख्यदिने दद्वे मासे
स्त्वयने लघेत्यादि समये बुधज्ञ्येस्वर्थः ४ अथावस्थानि खने मा
स्त्वयने लघेत्यादि समये बुधवज्ज्ञेयस्वर्थः ४ अथावस्थानि खनेमा
ह मृत्वाचवालाचेति ५ स्वस्थेति ६ उत्साहेति ७ वैकल्यशोकेति ८
छिन्नाचेति ९ अलंकितेति १० एवमिति ११ इति वालस्व
रादीनां षष्ठिरवस्था ॥

तु स्वस्वभोगेन तद्भवेत् ॥ गतावस्था गतांके न शेषं तत्काल
गामता ॥ ४ ॥ मृताच १ वाला २ शिशु ३ लासिकाच ४ कुमा
रिका ५ यौवन ६ राज्यगाच ७ क्लेशाच ८ निंद्या ९ ज्वरिता १०
प्रवासा ११ मृताच १२ वाला स्वरजा अवस्था ॥ ५ ॥ स्वस्था शुभा मोद
निहर्ष वृद्धिर्महोदया शांतिकरी सदर्पा ॥ मंदा शुभा शांतरसा विनोद
याच मांगल्यदा द्वादशधा कुमारे ॥ ६ ॥ उत्साहधैर्यौ गतु जयौ वला
च संकल्प योगाच सकामतुष्टिः ॥ सुखाचेति वाच धने श्वराच
शांताभिधा १२ द्वादशधा युवाख्ये ॥ ७ ॥ वैकल्य १ शोकाच २
तथाच मोघा ३ च्युतेंद्रिया ४ दुःखित ५ रात्रि निंद्य ६ ॥ अभिः प्र
भंगाच ८ तपाच ९ क्लिष्टा १० जरा ११ मृता १२ द्वादशधा च वृद्धे ॥ ८ ॥
छिन्नाच १ वंधा २ रिपुघातकारी ३ शोषा ४ मला ५ ज्वालन ६ के
शदाच ७ अलंकिता ८ मेदकरी च ९ दाहा १० मृत्युः ११ तथा १२
द्वादश मृत्युजा इमा ॥ ९ ॥ एवं षष्ठिरवस्था स्युरवस्था
पंचके सदा ॥ सर्वासु तासु विज्ञेयं स्वनाम सदृशं फलम् ॥ १० ॥
इति वालस्वरादीनां षष्ठी स्वरावस्था ॥ पूर्वस्मिन्नस्वर
स्वामी इस्वरो दक्षिणे तथा ॥ उकारः पश्चिमे ज्ञेय एसौम्ये म
ध्य ओस्वरः ॥ १ ॥ यस्यां दिशि उदयं याति स्वरस्तस्यां च पंचमी दिशाम् ॥
वर्जयेत्सर्वकार्येषु यात्राकाले विशेषतः ॥ २ ॥ पृष्ठे तु पृष्ठेक
स्थास्तु स्वरस्या लमितां दिशाम् ॥ हानिर्मृत्युभयं भंगो जाय
ते नात्र संशयः ॥ इति दिशाभोगचक्रम् ॥ ॥ ॥

पूर्वादिषु स्वरस्य वलमाह पूर्वस्मिन्स्वरेति ॥ २ ॥ यस्यां दिशीति पंचमी
दिशां वर्जयेदित्यत्र मात्रा येषां स्वराः तेषां कुस्य वलेन दिशं पंचमी
मतीं वर्जयेत् किमपि नोक्तं अत एव ज्ञायते केवेरं भिप्रायः वर्णस्व
रादेव यो वर्णस्वरो यस्य तस्य सादिके तत्पंचमी वर्जयेत् यथा देव
दत्तस्य वर्णस्वरओकारः ओकारस्य मध्ये स्थितिः मध्यात् आदक्षिणे
न देवदत्तस्य पंचमी दिक् उत्तरा देवदत्त उत्तरां यात्रां युद्धे विवादे च
सर्वदा वर्जयेत् संग्रामे सेनाम ध्येतो दिशां न समाश्रयेत् ॥ २ ॥ अ
थ दिके स्वरोलमिते ऽशुभफलमाह ॥ पृष्ठे पृष्ठेक इति ३ ॥ इति

॥ दिशास्वरचक्रम् ॥ ॥

स्वरावस्थाभोगचक्रम् ॥ दिशास्वरचक्रम् ॥

घ	दि	प	मा	अ	श्र	वर्ष	द्वाव
दि	०	१	२	६	१५	३०	३६०
घ	५	१५	३०	०	०	०	०
पल २०	०	०	०	०	पक्ष	मास	अब्द १

०	पू. नंदात्र	०
उ ए रिक्ता	ओं म पूर्णा	द. इ भद्रा
०	प उ जया	०

तिथ्यादाविति तिथ्यादौ तिथिआरंभसमये तत्प्रादितो यो तिथिः स्वरः त
स्मात्स्वरात्सार्द्ध ५॥२० पंचघटीस्वरउदयति चेत्तत्र यं स्वबालकुमा
रादिलत्तो घटी स्वरो भवति तस्य प्रश्नः फलं ब्रवीमि ॥२॥ तत्करण
माह तिथिमुक्तघटीति उदाहरणम् चेत्प्रश्नकाले प्रतिपदि गस्वरस्योदयः
तिथिभुक्तसंख्याघट्यः पंचदश १५ तस्य पलानि नवशतानि ९०० अ
ष्टवह्नि हृतानि २२० लब्धं स्वर २ इ यं शेषं २६ शेषे आकारात्तृतीयस्व
रः उदितः यदि देवदत्तेन प्रश्नफलेन कृतं समीपात् प्राक् दक्षिणपश्चिम
उत्तरेषु स्थितेन प्रश्नः कृतः सर्वतो भद्रचक्रोक्तलक्षणेनाभिमतादि

तिथ्यादावुदयं याति तिथिस्वराद्घटिकास्वरः ॥ बालस्व
रादिकः प्रश्ने फलं तस्य वदाम्यहं ॥१॥ तिथिभुक्तघटीसं
ख्यां कृत्वा पलमयीं ततः ॥ अष्टवह्नि ३२० हृते शेषे स्वर
स्तत्कालसंभवः ॥२॥ यदुद्दिश्य कृतः प्रश्नः फलं तस्य
प्रजायते ॥ यत्रोद्दिश्य ते किंचित्तत्र गच्छ शुभाशुभम् ॥३॥
बालोदये यदा पृच्छा लाभार्थे स्वल्पलाभदा ॥ रोजार्ते चि
ररोगे च गमे हानिः स्तपंरले ॥४॥ कुमारोदयवेलायां
लाभो भवति पुष्कलः ॥ रोजोनाशं जयं युद्धे यात्रा
सर्वत्र सिद्धिदा ॥५॥ युवोदये भवेद्राज्यं लक्ष्मीशत्रौ दं चत
त्त्वरणं ॥ संग्रामे शत्रुहंता च यात्रा च सफला भवेत् ॥६॥
वृद्धोदये न लाभः स्यात्क्लेशी नाशे शत्रुवर्द्धनम् ॥ संग्रा
मे भंगमायाति यात्रायां न निवर्तते ॥७॥ मृतोदये य

त्कार्यमुपलक्ष्य प्रश्नलग्ने तत्कार्यहानिर्वक्तव्या संग्रामादिसाह
सकर्मणि भयं भंगः पृच्छकस्य रोगे प्रश्ने मृत्युः इत्यादीनि वदेत् २
अथ बालादिकवालायाः तदर्थमाह यदुद्दिश्य इति यदि देवदत्तेना
न्यमुद्दिश्य प्रश्नः कृतः यज्ञदत्तस्येदं कार्यं भविष्यति तदा यज्ञदत्त
वर्णस्वरवशेन बालाद्यादि दिशमवधार्य फलं ब्रूयात् यदि लाभादि
कं नोक्तं कस्याप्यभिधानमविन्न तदा देवदत्तस्यैव नामस्वरवशे

न अस्तमिते वालादिदिशं ज्ञात्वा फलं ब्रुयात् ३ अथ वालादिस्व
रवलमाह। वालोदयेति॥ ४ ॥कुमारेति॥ ५ ॥युवोदयेति॥ ६ ॥ वृद्धोद
येति॥ ७ ॥मृतोदयेति॥ ८ ॥ अथ स्वराणां संज्ञां तत्समाम्नाय प्रश्नफ
लमाह॥ ओजःस्वरा इति ओजःस्वराः अ उ ओ एते त्रयो विषमाः पुमां
सः पुरुषाः समस्वराः इ ए अन्ये पि समस्वराः योषित्स्त्री संज्ञकाः
स्वस्वरोदये विषमाख्यः पुरुषः स्वरोदये पुंसां बलं भवति समाख्य
समस्वरोदये स्त्रीणां स्त्रीजातीनां बलं भवति एतावत् स्वस्व
रोदये तत्तत्प्रश्नः कार्याणि सिद्धिं यान्ति॥ ९ ॥ तद्बलान्प्रश्नकेत्र
प्रश्नमाह गर्भार्थे इति यदा पृच्छति अस्मिन्गर्भे पुत्रः पुत्री वा भवि
ष्यति तस्मिन्सति तत्काले अकारस्य उकारस्य ओकारस्योदयो
भवति तदा पुत्रो भविष्यतीति वाच्यं ॥ तत्काले इ ए अनयोरुद

याच्चेत्पृच्छति स्वंप्रयोजनं॥ तत्सर्वं मत्स्यदं रोयं पृच्छेत्
स्युः समंगकं॥ ८ ॥ ओजस्वराः पुमांसः स्युः स्त्रियो युग्मे
स्वरान्विदुः॥ स्वस्वस्वरोदये जाते पुंसां स्त्रीणां च तं बलं
भवेत्॥ ९ ॥ गर्भार्थे पुंस्वरे पुत्रः कन्या कन्यास्वरोदये॥॥
युग्मे युग्मं त्रयं नष्टे मातुर्मृत्युश्च संक्रमे॥ १० ॥ युना
डीस्वरयोः पुंसोः पुंयुग्मं स्त्रीयुगं स्त्रियोः॥ तयोस्तु पुं
स्त्रियोः पुंस्त्री युग्मं गर्भे विनिर्दिशेत्॥ ११ ॥ इति या
मले तात्कालिके स्वरचक्रे प्रश्नभेदाः॥॥ छ॥

यत्तदा गर्भप्रश्ने कन्या वाच्या युग्मे युग्ममिति पुंस्त्र्याख्यस्वरोदये
युग्मं वदेत्। नष्टे स्वरोदये अस्तमिते पापविद्धे गर्भस्य नष्टता
वाच्या संक्रमे पुंस्त्र्याख्यस्वरोदये समाप्तौ मातुर्मृत्युर्वाच्यः १०
अथ युग्मस्वरोदये प्रकारमाह युनाडीति युस्वरस्त्रियिस्वरः नाडी
स्वरस्तत्काले पंचघटिकात्मकां तरोदयस्वरः तौ यदि विषमौ पुंसं
ज्ञकौ भवतः तदा पुत्रद्वयं वदेत् एवं स्त्र्याख्यौ दिनस्वरनाडीस्वरौ
द्वयं तदा कन्यां वदेत् तौ यदि पुंस्त्रियौ तयोरेकः पुमान् एका स्त्री तदा
पुत्रकन्ये भवतः इति वदेत् अनयोरेकस्मिन्नष्टे तस्य नष्टता स्वरस्य
नष्टता अस्तमिते तत्कालेन ग्रहवेधेन वा ११ इति नाडीस्व
॥ ॥
॥ रप्रश्नभेदाः ॥

अथ जन्मनक्षत्रचरणवर्णवशात् फलमाह ॥ जन्मर्क्षे जन्मपादेति
यस्य जन्मनक्षत्रस्य चरणे जन्म तच्चरणस्य यो वर्णः अइउएओ चू
लिके इत्यादि चरणवर्णः तद्वर्णीयः स्वरो भवति तत्स्वरवशात् जन्मकाले
यो नाडीस्वरः तस्मिन्काले कुमारादिसंज्ञा स्थापनीया ॥ यथा देवदत्तस्य
जन्म रेवत्याः प्रथमचरणे तत्र एकारस्वरो विद्यते जन्मनि नाडीस्वर उका
र आसीत् एकारवशतो नाडीस्वरस्तेन संज्ञो जातः तत्स्वभावेन जन्मफ
लम् ॥१॥ बालकुमारादि नाडीसंज्ञकस्वरे जन्मफलमाह चपलः
कातर इति ॥२॥ व्यवसायीति ॥३॥ सर्वलक्षणसंपूर्ण इति ॥४॥ लोभी जित
इति ॥५॥ क्लेशी समत्सर इति ॥६॥ इति तात्कालिकस्वरचक्रे जातस्य
शुभाशुभनिर्णयः ॥ अथ भट्योर्द्वंद्वयुद्धे विशेषमाह ककारादीति
शेषाः आ ई ऊ ऐ औ अं अः इत्यादयः सप्त दीर्घाः धनफबभमयरलव
शषसह इत्यादयो वर्णाः कृष्णपक्षे बलिनः स्वस्मिन्स्वामि शुक्लपक्षे स्वस्व

पक्षे जन्मपादे यस्तद्वर्णीयोऽक्षरः तेन नाडीस्वरेण ज्ञेयः
स्वभावः प्राणिनामिह ॥१॥ चपलः कातरो मूर्खः कृपणः
पराजितेन्द्रियः ॥ असत्यो बहुभाषी च जातो बालः स्वरोदये ॥२॥
व्यवसायी कलाभिज्ञः स्त्रीरतः सुभगः सदा । दीर्घायुर्विग्रही
शूरः कुमारोदयसंभवः ॥३॥ सर्वलक्षणसंपूर्णो राजा भव
ति धार्मिकः ॥ सार्वकालं जयी युद्धे जातो युवोदये शिशुः ॥४॥
लोभी जितो धार्मिकः कामी विवेकी स्थिरसाहसः ॥ सत्यवादी
सदाचारः पुमान्वृद्धोदयोद्भवः ॥५॥ क्लेशी समत्सरः क्रूरो
निष्कामो विकलेन्द्रियः ॥ सर्वकार्यालसो दुष्टो जन्म मृत्यु स्व
रोदये ॥६॥ इति यामले तात्कालिके स्वरचक्रे जातस्य
शुभाशुभनिर्णयः समाप्तः ॥ ककारादिहकारान्ताः पंच
स्वस्वरास्तथा ॥ बलिनः स्युः सिते पक्षे शेषाः सर्वेऽसिते तरे ॥१॥
एकस्वरः पृथग्वर्णः पक्षयोरुभयोर्यदि ॥ तत्र पक्षबलं त्याज्यं
शुक्लकृष्णविभेदतः ॥२॥ एकपक्षान्तरे चैकः स्वरश्चेद्योध

जयः येषां योधानां ककारादिहकारान्ता वर्णा अइउए स्वराश्च तास्तेषा
दो भवंति तेषां बलं सितपक्षे भवंति एवं शेषैरपि कृष्णपक्षे बलं ज्ञेयम् ॥१॥
अथ योधयोः स्वरवर्णे यो पक्षबलं सममेव तत्र योधस्य जयो विवेलेद्
यमित्याह एकः स्वरः पृथग्वर्ण इति योधयोः सितपक्षस्वरः एकवर्णो
यदि तदा पक्षबलं शुक्लपक्षे गौरवर्णस्य बलं अथ कृष्णपक्षे च स्वरवर्णे
योर्यदि तदा यः कृष्णवर्णः स जयी कृष्णपक्षे शुक्लकृष्णे गौरवर्णः कृ
ष्णपक्षे वर्णयो भवति कृष्णस्य शुक्लपक्षे वर्णः स्वरा यस्तदा पक्षे जय
पराजयौ तुल्यौ ॥२॥ अथ भेदान्तरमाह एकपक्षान्तर इति
शुक्लपक्षे वर्णो यदि कृष्णपक्षे स्वरः योधयोः कृष्णपक्षे वर्णः शुक्ल
पक्षे स्वरः एवं योधयोर्यदि तदा शुक्ले गौरो जयी भवति कृष्णपक्षे कृष्णो

॥न॰॥ज॰॥
ज॰॥टी॰॥
॥२४॥
14

भवति ह्रस्वो द्वावपि द्वावपि दीर्घौ यत्र
ककार स्वरनिकटे । अथवा द्वावपि दीर्घौ
तदा खकार वर्णमध्ये जयी २७

जयी भवति अत्र वर्णेनामेव प्राधान्यं न स्वराणां यतः शुक्ले कृष्णे पक्षे
रपि बलाधिक्यं ३ अथ यत्र स्वरवर्णयोरेकत्वे कृष्णे भेदे तुल्ये सति जयप्र
कारमाह यत्र वर्णः स्वरे इति स्वरवर्णयोः कृष्णगौरैकत्वे सति यः स्वरा
सन्न वर्णो ह्रस्व गौरो वा कृष्णो वा स जयी भवति । दीर्घो योधयो द्वयोः
उच्च स्वरा द्वरवर्ण स्य एवं द्वयोर्यः स जयी भवति ॥ अथोदाहरणं योध
योरेक स्वनो मवर्णः ककारः ह्रस्वः अन्यस्य खकारो द्वावपि तुल्य प्रमा
णे ह्रस्वो द्वावपि दीर्घौ तदा कवर्णो भटो जयी अथवा खकारगकार व
र्णभ्यां भटयोर्नाम तदा स्वरासन्नः ह्रस्वयोर्मध्ये खकार वर्ण भटः गव
र्णभटं जयति दीर्घौ नो तदा गकार भटः खकार भटं जयति एवं वर्ण
धयोर्द्वयोः ॥ शुक्ले गौरो यरे कृष्णो शुक्ले जयति निश्चितम् ॥३॥
यत्र वर्ण स्वरैकत्वे कृष्णो गौरो भटो यदि ॥ स्वरासन्नान्तरो
ह्रस्वो दीर्घो द्वरान्तरो जयी ॥४॥ समाने नाम वर्णैकं
युद्धकारकयोर्यदि ॥ तत्र युद्धे बलं देयं यायी स्थायी
विभेदतः ॥५॥ योधयोः सर्व भेदैक्ये स्वरे पूर्निकुमा
रके ॥ यायी जयी तथा स्थायी बालवृद्धान्तिमस्वराः ॥६॥

स्वर चक्रे ह्रस्वदीर्घ योः स्वरासन्न द्वरवर्णैर्जयं बलं दद्यात् ४॥
अथ शुक्ल कृष्णयत्नादि बलमारभ्य दीर्घ द्वरान्तरे जयी सन्नायें
तयोः सर्व भेद तुल्यतायां जयोपायमाह समाने नाम वर्णेति
सर्व भेद तुल्यतायां स्थायी यायी भेद एव जयोपायः अथ सर्व भेद तु
ल्ये यस्याधिको न जय भेद लाभो भवति तथाचार्य द्वयं युद्धकारये
तु स्वस्य योधस्य बहु भेदफलानि देयानि पश्चात्स्थायि जायि भे
देनाधिकं कुर्यात् ५॥ अथ स्थायि यायि बलमानमाह योध
योः सर्व भेदेति द्वयोर्योधयोः एवाग्रे सर्व जय भेदैक्ये तु स्ते
सति यायी जयी भवति कुत्र जयी भवतीत्याकांक्षायां पूर्निकुमार
के स्वरे सति तत्काले नाडी स्वरे पूर्निकुमारे वा प्राप्ते यायी बलमा
श्रयेत् बालवृद्धान्तिमे बालवृद्ध मृत स्वरे युद्धकाले स्थायी ज
यति स्थायी बलं समाश्रयेदित्यर्थः पुनः स्थायी यायी बलं पुन
रन्या प्रकारयति कुमार युव योर्यायी जयी भवति नान्यरः बा
लवृद्धान्तिमे स्थायी जायीनो जयिनो जयः ६॥ अथ सर्व
काले सर्व कार्येति विविक्तो यमाह आद्येति प्राविति पश्चा
त्ति विप्रधान स्वरो नीकः अधुना उच्यते अकारे नंदा नाव
तत्राकारादिको क्षे सप्त वर्णाः अकचटतपयशाः तत्र प्रतिपदो

॥ स्वरप्रकरणे विशेषः ॥

॥ अ ॥	॥ इ ॥	॥ उ ॥	॥ ए ॥	॥ ओ ॥
क १ छ ६ ठ ११	ख २ ज ७ ड १२	ग ३ झ ८ ढ १३	घ ४ ञ ९ ण १४	च ५ ट १० त १५
अ	इ	उ	ए	ओ
थ द ध	न म श	प य ष	फ र स	ब ल ह १५

अकचादिवर्णस्तथा षष्ठ्यां षोडशो वर्णो एकादश्यां पञ्चमो वर्णो इति विभागः एवमिकारादिषु तिथीनां विभागः ॥७॥ अथास्मिन् चक्रे को विचार इत्याह वर्णतिथ्यादि इति तिथिवर्णद्वौ स्वरचक्रे तिथ्याख्याः तिथीनां तिसृणां नाख्या नाम भवति किं तन्नामेत्याह जन्म

आये तिथौ त्रयो वर्णा द्वौ द्वौ वै शेषयोर्यदि ॥
एवं तिथित्रये ज्ञेया वर्णसंख्या तिथिस्वरे ॥७॥
वर्णतिथ्यादितिथ्याख्या जन्महानिमृतिस्तथा ॥
भीर्जन्मनि रुजा हानौ मृतौ मृत्युर्न संशयः ॥८॥
॥ इति यामले स्वरप्रकरणे विशेषनिर्णयः ॥

हानिमृतिस्तथा आद्यतिथिरेव जन्मनाम भवति द्वितीयस्य हानिसंज्ञा तृतीयस्य मृति नाम एतदुक्तं भवति अकचादयस्य नामवर्णः तस्य प्रतिपज्जन्मसंज्ञा षष्ठी तस्य हानिसंज्ञा एकादशी मृतिः यस्य षोडशो वर्णः तस्य षष्ठी जन्मसंज्ञा एकादशी हानिः प्रतिपन्मृतिः यस्य पञ्चमो वर्णः तस्यैकादशी जन्मसंज्ञा प्रतिपद्धानिसंज्ञा षष्ठी मृतिः एवमिकारादिषु वर्णतिथिसंज्ञा कल्प्या। अथ गणनाफलमाह भीर्जन्मनि जन्मसंज्ञे तिथौ भीर्भवति संग्रामादिषु भेकर्मणि हानौ तिथौ रुजो भवति। मृतौ तिथौ मृत्संज्ञे तिथौ मृत्युर्भवति अथ सर्वासां तिथीनाम निष्फलत्वं वदन्तु किमपि कर्म न कर्तव्यमिति कालत एव नास्ति तत्राति विनश्यतीति विचार्य कवेरभिप्रायं व्याख्यास्यामीति आये तिथौ त्रयो वर्णा तिथिचक्रं नाम वर्णवशात् मृतसंज्ञे तु तिथिषु जन्महानिमृतिसंज्ञा तान् दृष्ट्वा रुग्नशत्रुसमागमादिषु मृत्युतिथिफलं सिद्धं बोद्धव्यामिति ॥८॥ एतावत् स्वरचक्राणि समाप्तानि ॥

न॥ज॥
ज॰ टी॥
॥१२॥
15

अथनामजकालजस्वरमुत्थाय तैःषोडशस्वरैर्दिनफलं वक्तुं दि
नचर्याप्रकारमाह ॥ यदुक्तमिति ।१। योगपिंडद्वौ इति २॥ तस्याध
स्यालिखेदिति ॥ आदौ योगस्वरं स्थापयेत् । ततोऽपिंडद्वौ राश्याख्या
न्स्थापयेत् ॥ तेषामधो द्वादशाब्दादि कालजान् स्थापयेत् ॥ तत्रयोग
स्वरकोष्ठकाधः द्वादशाब्दकालजं स्वरं स्थापयेत् ॥ पिंडस्वरादधो वा
र्षिकस्वरं स्थापयेत् ॥ नक्षत्रस्वराधोऽयनस्वरं स्थापयेत् ॥ राशि
स्वराधस्त्वृतुस्वरं स्थापयेत् ॥ जीवस्वरादधो मासस्वरं स्थापयेत् ॥ ग्रह
स्वरादधः पक्षस्वरं स्थापयेत् ॥ वर्णस्वरादधः तिथिस्वरं स्थापयेत् ॥
मात्रास्वराधो नाडीस्वरं स्थापयेत् ॥ तदधः किं स्थापयेदित्याह स्वस्व
भोगेन संयुक्तानिति द्वादशवार्षिकादि स्वराधः एकादशांशिकान्त
रोदय स्वरभोगात् वर्षमेकं मासमेकं दिनद्वयं लोकाब्धिनाडिका अ
ष्टत्रिंशत्पलानि सोढीन् स्वस्वभोगात् स्वस्वाधः स्थापयेदित्यर्थः ॥ ३॥

यदुक्तं यामले तन्त्रे ज्ञानं गुरुप्रसादतः ॥ स्वरादिनफलं
वक्ष्ये संक्षेपकाशकं ॥ १॥ योगपिंडद्वौ राश्या
ख्यजीवखेटान्तरस्वरान् ॥ उत्थाय नामतस्त्वाद्यो मा
त्रान्तं स्थापयेत्क्रमात् ॥ २॥ तस्याधः स्वालिखेच्चा
ष्टौ द्वादशाब्दादिकान्स्वरान् ॥ स्वस्वभोगेन संयुक्ता
न्भोगस्यैकादशांशकः ॥ ३॥ यथोत्तरबला योगादि
काः कालस्वरास्तथा ॥ कालोदयस्वराश्चापि ज्ञात
व्याः स्वरवेदिभिः ॥ ४॥ अकारादिस्वराधस्थाः सं
ख्या वेद ४ प्रमाणकाः ॥ विन्यस्यैकैकमयोगेन तेच
विंशोपकाः स्मृताः ॥ ५॥ योगात्द्वादशो
वर्षे स्वस्वस्थापिंडतोऽब्दकैः ॥ भस्वरादयनेज्ञेयो रा
शिस्वराद्तुस्वरे ॥ ६॥ जीवान्मासस्वरे वस्यान्ग्रहात्

अथ निर्णीतफलकथनाय नामजानां कालजानां स्वराणां यथो
त्तरबलमाह यथोत्तरबला योगादिति ॥ ४॥ अकाराद्याः स्वराधस्था
इति अ ४ इ ४ उ ४ ए ४ ओ ४ ॥ एवं योगेन विंशतिः २० ॥ ५ ॥
योगात्द्वादशो वर्षेति ॥ ६ ॥ जीवान्मासस्वरेति ॥ ७ ॥ द्वादशाब्दादि
कः कल इति ॥ ८ ॥ स्वरोदयान्तिकाविति ॥ ९ ॥ द्वादशेति ॥ १० ॥ शु
भाशुभेति ॥ ११ ॥ पिंडस्येति ॥ अथोदाहरणद्वारेण फलितार्थं
यथाज्ञानं तत्कारणं दर्शयामि ॥ लिखेच्चकोष्ठगा रेखा चतस्र
स्तिर्यग्गास्थिताः ॥ नामजान्कालजांश्चाष्टौ तत्रोक्तविधिना लि
खेत् ॥ तत्रदेवदत्तस्य दिनचर्या ॥ अत्र शुभाशुभराशिद्वये विचारः ॥
अथ शुभपक्षे ॥ योगस्वरादुकारात द्वादशवार्षिकां तत उदय ओकारे

ध्रुवा तस्य संख्या ४ तज्जाग्रस्वरो ऽकार आयनस्वर इकारः कुमारस्तस्य सं
ख्या ४ राशिस्वर ओकारस्तद्दशायामृतुस्वरः अकारः कुमारः तस्य संख्या
४ जीवस्वरो ओकारस्तद्दशायां मासस्वरो ध्रुवा तस्य संख्या ४ तदंतर्दशापि ध्रु
वा ४ वर्णस्वर उकार तद्दशायां दिनस्वरः कुमारः तस्य संख्या ४ अत्र स्वरोदयो
पि ध्रुवा तस्य संख्या ४ मात्रास्वर एकारः तद्दशायां नाडीस्वरो ध्रुवा तस्य सं
ख्या ४ अंतरोदयोपि ध्रुवा ४ एवं शुभसंख्या ३६ ॥ अथाऽशुभपृच्छे यो
गस्वर उकारस्तद्दशायां द्वादशवार्षिकस्वर इकारो मृतः तस्य संख्या ४ पिंड
स्वर एकारस्तद्दशायां वार्षिकस्वर इकारो वृद्धस्तस्य संख्या ४ अंतरोदय उका
रः स तु मृतस्तस्य संख्या ४ ऋतुस्वरो ऽकारः अंतरस्वरोदय उकारो मृतः
तस्य संख्या ४ राशिस्वर उकारस्तद्दशायामृत्वंतरोदये वृद्धस्तस्य संख्या ४
ग्रहस्वर उकारः तद्दशायां पक्षस्वरोदयांतरोदयौ मृतौ तत्संख्या अष्टौ
८ एवमशुभसंख्या अष्टाविंशतिः २८ शुभसंख्या ३६ शुभाशुभयोः
॥ पक्षस्वरे तथा ॥ वर्णे दिनस्वरे चैव यामा मात्रास्वरादयोः स्वरे ॥७॥
द्वादशाब्दादिकः कालो यात्राकारादिकस्वरे ॥ स्थितस्तस्
त्र शुभो न स्यात्तच्चाव स्याः शुभोपि च ॥८॥ स्वरो वृद्धोति
मो दुष्टो बालः पूर्वं दलं तथा ॥ शेषं सार्धद्वयं मध्यमिति ज्ञे
याः शुभाशुभः ॥९॥ द्वादशवार्षिकाद्याये स्वांतरोदयसं
स्थिताः ॥ ते शुभा एकतः स्थाप्या अशुभास्त्वन्यतः पृथक् ॥१०॥
शुभाशुभस्वरूपस्य राशिद्वयस्य मध्यतः ॥ एकस्मात्याति
ते शेषे शेषं तद्धि नजं फलम् ॥११॥ विंशत्याताडिते
शेषे चतुःषष्ट्या विभाजिते ॥ लब्धा विंशोपकास्तु
त्र शुभाशुभप्रकाशकाः ॥१२॥
तरे शुभफलस्य शेषं शुभसंख्या ८ विंशत्याताडिते शेषे चतुःषष्ट्या वि ६४
भाजिते अनयाष्टकविंशत्या गुणिते जातं १६० चतुःषष्ट्या ६४ लब्धं
२॥३२ पादार्धं शुभं फलं ॥ किंतु शुभफलं तद्विचार्य लिख्यते ॥ कविना
नोक्तं । शुभपक्षे ध्रुवा द्वादशांतरोदयः ॥ मासस्वरो ध्रुवा ॥ अंतर्दशा ध्रुवा
दिनांतरोदय नाडीस्वर ध्रुवा नाड्युदयोपि ध्रुवा ॥ अंतरोदयोपि शुभ
पक्षे यतः स्वराः पंच प्रश्नो ये निसर्गबलिनस्ते ग्राह्याः तत्र योगस्व
रात् पंचोत्तरबलिनो नाडीस्वरो नाडीस्वरस्यापि पातिमात्रास्वरः
मात्रायां स्त्री जनात्फलं वदेदिति ग्रंथकारः ॥ देवदत्तस्य चैत्रशु
क्लप्रतिपदि आरंभसमये सार्धपंचघटी शुभफलं भविष्यतीति पा
दार्धं किंचिच्छुभफलं आकांक्षा अपरैर्न बाधिता ॥ अथास्य शास्त्र
स्य परमप्रयोजनं दिग्विजयिनां राज्ञां विजयः येषैर्भूबलादिभिर्वि
जयो भवति चातुरंगसंग्रामं जयति ॥ यानि भूबलान्यावश्यके नरस्या
ऽपि तान्यस्मिन्नेव स्वरोदये अंतरांतरो ज्ञानि एकत्रस्थत्वाऽनुभूतानि
लिख्यंते प्रथमतो नामवर्णबलात् यद्यपि मात्रादयः स्वरा उक्तास्तथा
ऽपि तेषां वर्णस्वरा एव प्रधानः मात्रादयो राज्ञां द्वादशवर्षाभ्यंतरे दिनफ
लकल्पनार्थं कथिताः ॥ तथा च स्वरोदयकारैरेवोक्तं वर्णस्वरसाम्यं

सर्वकालं वलीवर्णे इति द्वंद्वयुद्धार्थे चापि वर्णस्य मामार्थ्यमु क्तं
तथाच ककारादिइति इत्यादिना द्वंद्वयुद्धे वर्णस्वर वलादेव ज
य उक्तः अथादौ पंच स्वराणां दिग्वलंग्रास्य पूर्वस्मिन स्वरः
स्वामीइति यस्यादिकीति विशेषत इत्यंतं ॥ अथान्य स्वराणां
वलं मृतो वाल स्तथा वृद्धइति योयस्येति मृत्युहीनेति एकमा
त्रेति पारमेरित्यंतं ॥ अथान्य युद्धे वलावलं ॥ शत्रोर्मृत्युस्वरे
ति नान्यथेत्यंतं ॥ अथद्वंद्वयुद्धे वालादि पंच स्वराणां वलाव
लं मृतोवालस्तथेति एकत्र तिथिवार्द्धैः कुमारस्तरुणस्वरैः
यद्दिने जयदा स्याज्ज्या वालवृद्धांतिमस्वराः ॥ अन्य द्वलावलं ॥
प्रमाणनाम वर्णैक्य मिति ॥ कुमारयुवयोर्यायीति ॥ आकृष्टेत्र
गोभवेद्यायी पक्षाक्रामीस्थिरःस्मृतः ॥ आकृष्टातीचापि यायी
स्यात्पक्षाघातीपरस्मृतः ॥ यायीकाले जयंयायी लभते नात्र
संशयः ॥ स्थायी स्थिरेन्यथाहानिं स्वकालादिनरेतरे ॥ पूर्वादि
दिकस्वरगतः सुखं यनि जयोभवेत् ॥ जयः सघातःस्यादायोःशे
षयोरजयोभवेत् ॥ अथान्यद्वलं ॥ पृष्ठे वैपुरतश्छाया दक्षिणे
के पवामगा ॥ जयी जायी वहस्त्येकै अपी स्थायीविधुःस्वरे ॥
वामाग्रगाशशिच्छायायातु पृष्ठे दवहेमति ॥ जयः सूर्यवहे स्यात्तु
तयोवामेशुभः शशी ॥ अथान्यद्वलम् ॥ समरसारे ॥ प्राचीमु
दीचींवा चंद्रेति ॥ आकोप्यवह्निराक्षसयमपश्चिममरुच्छिवां
नेच ॥ तिथिवत्रिविपदमस्माद्ग्रहेराहुरा हुयोगिनी जयदा ॥
पृष्ठेदत्ते योगिनी राहु युक्तेति ॥ अथान्यो योगिनीराहुः ॥ रमगुवु
पुशाचवाराः पूर्वतोस्मादिग्गीशाक्रमति युगयुगा४ शामुख्ये दंडे
नभुक्ते ॥ अहनिनिशि चेवामेसुक्षोयामेन क्रमेरिपुवलशान
हेलापृष्ठगम्याप्रहर्ता ॥ नागा८ग्नि३ रस६ रूपाब्धि४ नगाख्य
ग्रहराधकैः ॥ कालासूर्यादिवारेषु वर्ष्यंनीयाः कवौरणे ॥ समुद्रा
४ द्य ७ द्रि२ पंचाहि८ गुण३ र्तु ६ ग्रहराधकैः ॥ सूर्यारेज्य वुधाः
शनीयमनिशानोथा कृथाः पूर्वतः सव्यस्यानयते भ्रमस्यगुरुसौ
मुक्केचतुर्थेदिशि ॥ यामार्द्धं न चरंत्यपंनिशिदिने गत्वापुनर्वामया
यत्ते चासितेसंत्रके हिजयदोदले चपृष्ठेतमः ॥ भानुवारक्रमादे
ते वर्जनीया जयार्थिभिः ॥ समरसारे ॥ वारेवामेद्याविनिवेश्ये
ति ॥ वारप्रवृत्ते घटिकादिनिपेति ॥ स्वराष्ट्राधिपरवेदस्य वौरि
होरोदयेरमि ॥ वर्जयेत्सुभनवक्ष्यं द्वंद्वेकौ लेकवौसदा ॥ भुक्तारभु
निस पाणभीशानादि वराशयः ॥ अस्यवायोग्रतीचींदोने अंत्यो
दगुरोर्दहम ॥ द्वितीय यामार्द्धत एवसूर्यः प्रत्यक्रमाद्धंति ततस्त
तीयां ॥ यामेचयामे च पुनस्ततीयां प्रागंत्यखंडे नयमोत्तरांते ॥
ईशादिकोणरविवद्विहरंति प्रदक्षिणंशीतमयूखमाली ॥ यामे

॥ अथ दिनफलस्य चक्रम् ॥

योग	पिंड	नक्षत्र	राशी	जीव	ग्रह	वर्ण	अंश
द्वादशाब्द १२	वर्ष १	अयन ६	ऋतु ७२	मास ३०	पक्ष ३५	तिथि ६	घटी ५॥२६
१	०	०	०	०	०	०	०
१	१	०	०	०	०	०	०
२	२	३६	६	२	१	०	०
४३	४३	२२	३२	४३	२२	५	०
३८	३८	४९	४३	३८	४९	२७	३०
०	३४	५४	३४	९४	३४	०	०

तृतीयां च ततस्तृतीयां द्वितीययामे विनिहन्ति याम्यां ॥ सूर्यारम्य ग्रहराये
न हन्ति चन्द्रो न्दि दिक् क्रमात् ॥ हिता याम्यामिमुखस्ये न हित्वा पश्चिम संगरः ॥
नागादी शारविसितन कुजराहुयमेंदु सौम्य वाक्पतयः ॥ पस्यां वासरनाथः
तद्दिग्म्योधो रिपुं हन्ति ॥ हन्ति सूर्यः शनिं शुक्रो बुधं हन्ति कुजो गुरुम् ॥ तमो
र्कमर्कजो भौमं शशी शुक्रं विधुं गुरुः ॥ यादिक सादिक ग्रहर्तभ्यादिकनाथहत
दिग्गजाः ॥ दिकनाथ काल होरायां वासरे च विशेषितेः ॥ विरुद्ध ग्रहसार्द्ध
राहुशशिसूर्यगृह रव्यापां रविबलचंद्रबल होरादीनामशा न बलस्य घात
माह समरसांगेपे यामां से विरुद्ध यामदले जेति अथयस्ययोधस्य ज
न्मराशेर्जन्मोदयाद्वाय त्तं रम्ये स्थाने ग्रहाभवंति न दशान्ते तृदंगे घातमा
ह लग्नाद्राशेश्च बुंसः शशी १ रवि १२ जीव ११ दिक् १० व्योमगो ९ द्वीपि ८
वेद ४ स्थाने षर्ष ५ ऋतु ६ संस्थो रवि शशी कुजवित्सूज्य भृगवादिखेटः ॥
घातं कुर्युर्यथोक्ताः शिरसि च वदने हस्त देशे समर्द्धि यतस्तत् रूपदेशे तु द
इति न दनुगे पिंडोर्गं दुमा गे ॥ शनि चंद्रो गुरुस्तु यानि तो कुजबुधौ तथ
जेत् नागादि पुनि विद्वा यामेश्च लं विशेषतः यद्वपृष्ठ मातृकायां
द्वादशोर्द्ध लिखेद् रेखा षट्रेखा तिर्यगाश्रिताः नपुंसकोत्य रहिता स्वरान्
वर्णान्वा लिखेद्बुधः कचवर्गान्तरहितानंकाश्चाधो लिखेत्क्रमात् वारण
५॥५ वर्गी ३॥३ ऋतू ६॥६ नाग ८॥८॥८॥९ नंकानंते ९ न्यहं लिखेत्
योधयो वर्णमात्रां सं रम्यां कुर्यात्पृथक् पृथक् द्विशेषके १ जयी अ
न्ये शेषयोधः परा जेयी ॥ ग्रहभिर्भाजिते श्रेष्ठे योधयोर्यदि शेषके
शून्यं ० वेदा ४ रामा ६ बाण ५ शैला ७ रामा ३ भुवो १ भुजो २ मातृका
यां क्रमाज्जेता पश्चाद्गायगोमटः ॥ यस्य वेदा ४ जयी योधः शेषयोः
अन्यवेदयोः वेदत्वौ ४॥६ जयिनः षट्स्थ वाण जेता रसार्थयोः ६॥
५॥ शैलार्थयो जेयी शैलः ५॥७ शैलाग्न्यो ३॥७ विजयी श्रुचिः ॥

17

जयभाग्य रश्मिनेषासं ग्रामेगुरुरुपयोः ३।१॥ सर्वस्मा जयिनो बाहु
किंप्रनर्वीहुरुपयोः १२ ग्रावत्स्वे ५ मि ३ भुजरवे ६ ४ मतंगज ८
तु ६ खेन ९ धि ४ वसि ३ गगनं ० जिन योनिषत्कोः वर्ल्ल दधोन
रमिलीरहितोद्विरुपेः १२ जेतासरवबलपोऽश्ररुनेपिकोपः॥ ग्रा
पचक्रहृपम् सेनापतिः कार्योद्वितीये शत्रुपलायनं ग्रथबलानां
नियममोह स्वरछाया निलार्केन्दु योगिनी राहुभूबलं ॥ ग्रापयुक्
पतिश्रुतनोन्यथा बलवत्तरम् ॥ स्वरांके ग्रकाराद्याः स्वराः पंचपूर्वा
शादिषु संस्थिता इति ग्रथछायेति पृष्ठेर्कें ऽग्रतः छाया दक्षिणे
केपवामगेति सर्वचंद्रयोगे ७ छाया पृष्ठस्थो वायुः सूचयेज
समानुदिति भानुबलम् ग्राकलोमाग्नीत्यादि योगिनी राहुः भूबलं
किं नेत्रपालीप्रधानानकं जयपराजयचक्रं द्वंद्वेहिबलं ग्रथस्व
रोदयाद्व्याद्बलानिलिखंते ग्रइउएकन्निका यं होडाचक्रं प्रतिष्ठि
तं द्वंद्वयुद्धे महाहवे कवीकोटे च विद्वद्भिः भक्रमेन द्विचार्यते ॥ ग्रा
दित्यमुजमानक्षे योधयोजदि जन्मभं ॥ तद्दिनक्षे यदा युद्धं जाय
मानक्षेत्रे न जन्मचरस्योदये ॥ ग्रर्कीक्रांते यदा युद्धं जायते मृत्य
वे हितत्र ॥ ग्रन्येषु त्रिषु पादेषु युद्धं घातायकेवलं ॥ घातः शिरसि
वदने घातः स्याद्धृदयोदरे ॥ यस्मिन्नाशोरविस्तस्मात्सप्तमो यदि
वधे देवं चातुरंगैकवा वपि ॥ वस्य कस्यापि योधस्य मृत्युपातं वदे
त्सुधीः ॥ योधयोः सप्तमे राशौ सूर्याक्रांतमतो यदि ॥ प्रकोष्ठे दक्षिणे स्कं
धे घातः शिरसि जायते ॥ मुखान्मदक्षिणांगे तु दुर्गभंगः प्रजायते ॥
कोनधिपो वा म्रियते राजा वा युधि नश्यति ॥ ५ ॥ ततस्मात्सप्तमं यो
धो वर्जयेद्दर्कतः स्वयं ॥ ग्रथान्यत्संप्रवक्ष्यामि होडाज्ञानेन सूर्यभाद्
दशमे योद्धमे युद्धं तज्जन्मचरस्योदये ॥ मृत्युः स्यात्तस्य पातेन दक्षह
स्तो दराद्भवः ॥ द्वादशक्षे यदा युद्धं भास्करान्मप्यते मृत ॥ जालेन ह
स्तो भज्यते परं जीवति युद्धकृत् ॥ रविभाद्योधभे युद्धं जायतेऽष्ट
चतुर्दशे ॥ जन्मपादोदयो घातात्कुपाताद्विनश्यति ॥ तपापचद
शे युद्धं सूर्यभाद्योधभं यदि ॥ जन्मपादोदये वा हिः पतनान्म्रियते
तेमरः ॥ एकोनविंशमेष्वेवं संग्रामे म्रियते मरः ॥ एकविंशति
मे युद्धं दलेपादादिनश्यति ॥ पष्ठे वा जायते पात स्वगेत्रेत्रेम
तेमरः ॥ चतुर्विंशति नक्षत्रे यो धभं भानुभाद्यदि ॥ जन्मपादेदि
कं संख्ये तु लाइषधयो वृत्तिः ॥ द्वादशो काद्के २२॥११ मृत्युर्मुह
ते मगमीनयोः ॥ मुहूर्तं वर्जयेद्दक्षां रश्मिद्वंद्वे विशेषतः ॥ सूर्यभा
द्दशमेऽत्रहे द्वादशेष चतुर्दशे ॥ तिष्यकविंश चतुर्विंशो सूर्यभाद

जये द्वादशम् २०।२२।२४।२५।२९।२८ चतुर्भिर्घटिकाभिः स्यादुदयाद्यो
गिनी भ्रमः प्राच्यां १ धनदे २ वह्नौ ३ नैरृत्ये ४ दक्षिणे ५ ज
ले ६ पवने ७ गिरिशे ८ त्वेषां भ्रमस्तु पुनः पुनः ॥ पृष्ठदक्षिणगां जा
नाति चातुरंगे जयी भवेत् ॥ योगिनी जयदा पृष्ठे दक्षिणे च स
दा भवेत् ॥ अथ तात्कालवारोदयः यस्मिन्नहनि यो वारस्तस्य
भुक्तिरुदाहृता ॥ चतस्रो घटिका ४ तस्मात्षष्ठः पुनरुदेति च ॥ घटिका
भिश्चतसृभिर्ज्ञेयस्तात्कालवासरः ॥ यथा सोमात् शनिः षष्ठः शनेर्गुरु
रु यथा ॥ यस्य योधस्य यो राशिस्तस्य योऽधिपतिः स्मृतः ॥ तस्य वारे तदुद
ये वक्षे निःफलतां व्रजेत् ॥ तत्कालदिननाथाभ्यां वैरिलग्ने चापि निःफलम् ॥
द्वंद्वयुद्धे रणे वापि विद्यते युद्धे पराजयं ॥ यथा यस्य जयो भंगो ज्ञायते च परिस्फु
टम् ॥ मेषादीनां चराशीनां ध्रुवकं कथयाम्यहम् ॥ रामाज्ञा ५३ रामविशिखा ५३
वसुरामा ३६ जलधीशरः ५४ त्रिपयः १५ खाब्धयो ४० वाब्धि ४२ पंचा
लाः ५५ पंचभ्रमयः २५ वह्निराम ३६ षट्सरित्नाथाः ४६ षडलाः ५६ ध्रुवका
ग्मी ॥ मेषादीनां क्रमात्तेषां योधयोर्ध्रुवयोर्युतिः ॥ कार्या वह्नि ३ हृताशेषा
त्वेकं त्वाभि संगरे ॥ आक्रमहारी जयी द्वंद्वे शेषे २ लभते जयं ॥ एकशेषेऽप
वामन्ये पश्चात्घाती जयं लभेत् ॥ आक्रमहारी पन्न्यं च गत्वाग्रे प्रहनि
ष्यति ॥ पश्चात्घाती पन्न्यं च पश्चाद्गत्वा हनिष्यति ॥ द्वंद्वयुद्धे विशेषं च
वक्ष्यामि किंमपि स्फुटम् ॥ यस्मिन्दिने निशानाथः सप्तमगो जन्मराशितः ॥
यस्य योधस्य स जयं लभते नात्र संशयः ॥ जन्मपादोदये षष्ठे दृष्टे पातोऽ
भिजायते ॥ तस्माद्व्रतेऽष्टमे तोता च्यो रणे कोटिधवाक्तौ ॥ सप्तविंशतिन
क्षत्रे सप्तभाग्यादिपोधमे ॥ संग्रामे मृत्युमाप्नोति जन्मपादोदये भटः ॥
अथ दग्धतिथयो रणे वर्ज्याः ॥ कोदंडादिषु मत्स्येषु सचतुर्थेषु नाड्यपि ॥
द्वितीयाद्याः समा दग्धाः स्थिते कमलबोधने ॥२॥४॥६॥८॥१०॥१२॥ ए
ता स्मृतिपयो दग्धा वर्जनीयाः सदा रणे ॥ मेषलग्नेऽजमरणं कन्यायां
गोरहस्य च ॥ स्त्रीपुंसोः कर्कटे मृत्युः तुलायां कुक्कुटस्य च ॥ सिंहस्य वृ
श्चिके मृत्युः कन्यामीने मृतिं लभेत् ॥ तुलायां मिथुने मृत्युर्वृश्चिके स्यात्
खे मृतिः ॥ धनुषो वृषभे मृत्युर्धनुषि मकरस्य च ॥ तुलायां कुंभमरणं
मीनस्य मिथुने मृतिः ॥ अथान्यत्संप्रवक्ष्यामि संयोगाद्वारवर्णयोः ॥
पक्षी मरणमाप्नोति संग्रामे रविवासरे ॥ मार्जारमृत्युश्चंद्रे हि भौमे
न्हि मृगमूषलेः ॥ शुनो बुधे हि मरणं नागानां गुरुवासरे ॥ अश्वका
नां भृगुदिने शनौ मृत्युर्गजाजयोः ॥ अथ गादिभद्युद्धे रविवा
रादिषु क्रमात् ॥ तदूर्ध्वयामहोरायां वर्जयंति विशेषतः ॥ उदया
द्विमुहूर्तेन मेषवृश्चिकयोर्मृतिः ॥ परतो द्विमुहूर्तेन मिथुनाव
कयोर्मृतिः ॥ मुहूर्ते पुनः परतो मरणं कर्कटस्य तु ॥ कोदंडतौलि
लयोर्मृतिः ॥ पादत्रयं आयां राशि २ संयुतायां हि
सिंहानां मरणं परतो भवेत् ॥ शाक्रांतकस्यां मृतिमेति योधः शेषभ
भाजितायां धरणी २ समाजे ॥ हरेत्तथा तलभान्यंगरामा ३६ चितानि
जे स्ये विधुनो यदि कस्य ॥

18

द्विपैः ८ श्रोवदिग्यंत्रकः कीर्तितो सौ ॥ शुभोदक्षिणंगेऽथ पृष्ठे चवा
कः प्रोवामभागेच भंगप्रदः स्यात् ॥ सलाकासप्तके चक्रे मासनक्षत्रा
दिकं तारके ॥ आयपश्चात्के न्यसेन्मासधिष्ण्ये मासविधुं तथा ॥ ऽदिन
धे दिनशीतांशुं तस्मान्नात्कालिकं विधुं ॥ सपादयुग्म २।१५ ध
टिकाभुक्तिः समुदयो भवेत् ॥ ऽधिष्ण्यं च दघ्रौ २५ भानुं स्याप येत्
सर्वदा बुधैः ॥ दृष्टेपृष्ठे रविं कुर्यात् वामभागे निशाकरम् ॥ जयनो
स्न सन्देहो रणको विशलमाहवे ॥ अथ चरयोगिनी ॥ ऐन्द्र म
मीरणं दिशित्वथ दक्षिणेच ईशे तथा वरुण आग्निकोणे ॥ कुबे
रनैर्ऋत्यकयुग्म च तु भिर्नाडीस्त्रिलासा चरयोगिनीह ॥ एवं प्रति
पदादेहयुटिके दिक्षितिष्ठति ॥ ईशानयाम्ये च तथाग्रमं जनेश
चीवतौ नैर्ऋते तयुत्तवेश्वरे ॥ कृशानुकाष्ठावरुणे कक्रुभिर्ना
डीद्वयं स्यात्त्रिवियोगिनीह ॥ जयदायायिनां वामे स्याद्विने
दक्षिणे भवेत् ॥ उभयोर्जायते पृष्ठे योगिनी वामदक्षिणे ॥
दक्षिणे जयदा प्रोक्ता वामे चैव पलायनं ॥ वामेच सन्मुखे भं
गो जयदा पृष्ठदक्षिणे ॥ अथ संग्रामे योगिनी ॥ ऊर्ध्वं पश्यति
बाणभूपरिमि २५ तं पोदद्वयं खेन्दुभि १० वामं बाहुविधुत्रि
मि ३१२ पश्य पोसव्यं च रामेन्दुभिः ॥ १३ ॥ उग्रं नंदघटी १ रव्यभि
हितं पश्येत्सदा योगिनी दृष्टिं तां परिवर्जयंति विबुधाः सर्वा
र्थसिद्ध्यै सदा ॥ अथ राहुः ॥ शार्वातके मरुच्छक्रर क्षो पह्नान्नि
पाशिनां ॥ दिक्त्वाद्येन दलेराहुर्भ्रमत्यन्होपरेणच ॥ वारुण ५
वह्नि ३ धनेश ७ निशाचर ४ त्रिदशनाथ १ मरुद् ६ यम २ शूलि
नां ८ ॥ भ्रमतिदिक्षुविशाखकलेनचप्रथमकेन ततोऽपवरेण
च ॥ जन्मनक्षत्रमारभ्य गणयेद्दिनभं बुधः ॥ सर्पनक्षत्रमा
रभ्य गणयेन्नामभं बुधः ॥ नवभिस्तु हरेद्भागं शेषतो वाहनं
वदेत् ॥ गर्धभ तुरगो हस्ती मेषजंबुकसिंहकाः ॥ काको मयूरो
मयूरश्च नवैते नरवाहनाः ॥ गर्धमे धननाशः स्याद्दश्वे च वि
जयो भवेत् ॥ गजे च हंसगजा वाप्तिर्मेषे भोगमवाप्नुयात् ॥
जंबुके भंगमाप्नोति सिंहे युद्धे जयो भवेत् ॥ वायसे चभवेद्
कष्टं मृगे कार्यं च सिध्यति ॥ मयूरे धनलाभः स्याद्यात्रा कं
पालमादिशेत् ॥ इतिवाहनचक्रम् ॥ अथ वाराधिपो रवे
दानुलिखेत्स्याच्चादिपूज्यगो ॥ यत्राभजो भवेत्तत्र कालपा
शोहि पंचमः ॥ दक्षेपृष्ठे शुभः कालः पाशो वामाग्रगः शुभः ॥
अथ तात्कालकालः ॥ रुद्रः ११ शरीरं कालस्य पात्रं वेद ४ प
कर्तरी ॥ वह्निं श्रोतिर्विधिमंपुत्रे वसुशेषे क्रमात् दिशः ॥

अथ भ्रमिः॥ क्षेत्रपाली॥ विलोमेन च लोमासा चैत्राद्यादिक चतुष्
ये॥ ग्रहराः सव्यमार्गेण मास स्थानादिगण्यते॥ क्षेत्रपालीमहाभूमिर्वि
लानां च वलोत्कयत्॥ वह्निनां स्याद्वलवती भरन्या २४ दन्तिले॥ इंद्रोंत
३ का १ बुध ति ५ नैऋ वैले श्वरासु ७ दिक्शुक्रियादि रवि संक्रमेणं क्र
मेण॥ स्यात्क्रमशो नितरतः ग्रहराहु भजेया कामारूपा भ्रमति वायुसु
दिक्नुतनम्॥ शक्रा १ लकेश ७ वरुणं ५ नके ३ नाग काल काष्ठा
सु चैत्रमुखमासपरिभ्रमेण॥ अर्कोदये भ्रमति भूतलनईश ११ सर्प
१२ सर्पाह ८ तुल्यघटिकागतिरेककालः॥ रुद्रा ८ वुनाथ ५ शिखि ३
गुह्यक ७ राक्षसे ४ ६ १ वातांद्र नके ३ श जल ५ वह्निघनाधिपानो॥
चैत्रादिमासक परिभ्रमणेन नूनं गाहु विशुद्ध मनयो प्रवदन्ति मेकवार॥
रौद्रे १ वायु ६ जले ५ रुद्रे ८ वारुणे ५ ऽग्नौ ३ तु राक्षसे ४॥ प्राच्यां १
नके ३ जले सौम्ये ७ चैत्रमासादिसंक्रमः॥ दिनं दिनार्ध यामं च ग्रह
राधं लेद्गतः॥ एवं भ्रमिक्रमालेन दक्षपृष्ठगतो जयी॥ अथ लो
हपातस्थानं॥ संघट्टचक्रे प्रागुक्ते कृत्तिकाद्ये त्रिकोणके॥ ग्रहयोग
फलं वाच्यं नानापातसमुद्भवम्॥ एकरेखागते लोहं राहुकार्कि शिखी
बुभिः॥ मंदार्कराहुभिर्लोहं ज्ञेनुश्यंपा लोहमादिशेत्॥ कृत्तिकाग्रयरेखा
यां भानुभानुजराहवः॥ तत्र चक्रगतश्चंद्रो मेघे लोहं विनिर्दिशेत्॥॥
प्राजापते भेधनुष्प पिष्णु क्रो च तनुर्धनाऽप्याखलु धीर चन्द्रः॥ पेबोदपेचाङ्
रेखा जीवे भौवे भानुजे तन्त्र संस्थे॥ सौम्ये रौद्रे तद्विशो पातु
गर्जते वासवश्च॥ कुंमे मीने जायते चाऊ पातः चेच द्वाम्नी
केतु॥ प्रथ्याश्लेषा स्यान यो यो चरेखा नत्र स्थाने त्याग लोराहु
केतु॥ लग्ने कीटे संस्थितौ भौमचंद्रौ राहुश्चायी निश्चितं वज्रपातः॥६॥
चित्रे पूर्वे ११ । १ रुद्र दिक् संख्य रेखा भानुर्भौमो धीयरासजलश्च॥ सिंहे
लग्ने जायते वह्निपातो मध्यं पादं नष्टशेद् गनायाः॥ रक्षा[illegible] एकरेखा
[illegible]महास्थुः पिंगारक्षाराशयः संस्थिताश्च॥ अन्यक्रुतो जायते लो
हपातो द्विवसस्यार्धेन नमाहुर्ध्वं नीङ्गाः॥८॥ शनिरलपाधास्कर एकरेखागं
तस्थिको रोखलु एक एव॥ सिंहे च भानुर्मकरे शनिश्च उभे च लग्ने खलु
वीथ्य लोहम्॥ अमुरेन्दु स्थरे खापारेध ५ दिक् १० मुत ५ सप्तमाः ७॥
चंद्रचार्की स्थितो तत्र वायुपातं विनिर्दिशेत्॥११॥ एकोनविंशरेखायां
जीवसर्पमहीसुताः॥ लग्नांशे प्रथमे लोहं द्वितीयांशे तु वज्रकम्॥१२॥
यत्ररेखास्थितः सूर्यो रेखायां तत्र चंद्रमाः॥ राहुस्तत्रगतश्चैव लोहपा
तं विनिर्दिशेत्॥१३॥ कृत्तिकायष्टमी रेखा रव्यार्की यत्र संस्थितौ॥
तत्रस्थाने महालोहं लग्नांशे यत्र वर्तते॥१४॥ यत्ररेखास्थितश्चंद्रो भू
सुतो वाक्पतिः कविः॥ जलजं यस्य लग्नांशं कृपा दृष्टिं नराङ्गनम्॥१५॥
चक्रे त्रिकोणे खलु आयरेखास्थिताः पेरावाहृयरहस्य सवेटाः॥
लग्ने स्मिन्समायाति विधुर्द्विरेखो वह्नि[illegible]वः स्यात्समये कृशानोः॥१६॥

19

आद्ये चरांशे खलु लोहपातं मध्ये चरांशे सलिलं च वायुः ॥ अंत्ये चरांशे
सलिलं सवज्रं अग्निप्रपातं कथितं त्रिकोणे ॥१७॥ शेषे स्थिरांशे कथ
यंति वह्निं मध्ये स्थिरांशे सलिलं च वायुः ॥ आद्ये स्थिरांशे च लोह
पातं उडीशयाकं कथयंति तज्ज्ञाः ॥१८॥ एकरेखागतश्चंद्रो रविणा
राहुणा सजा ॥ जायते तद्दहत्युद्धं दारुणं लोमहर्षणम् ॥१९॥ शनि
ना यदि चंद्रः स्यादेकरेखागतस्तदा ॥ कथितो द्विघाते च निर्दिष्टो
दविशंकितः ॥२०॥ चंद्ररेखागतः क्रूरः संग्रामं सूचयेत्क्वचित् ॥ द्वौ
चेद्दवश्यमादेश्यं ग्रहयुद्धे सैन्यघातकाः ॥२१॥ अवश्यायं शनायु
क्ते क्रूरखेटद्वयं ग्रहम् ॥ एकरेखागतं चापि भवेदाहवसंस्थितिः ॥२२॥
तुषारकिरणो युक्तः क्रूरेण च शुभेन वा ॥ संग्रामसूचको न स्याद
परः क्रूरयुग्मवेत् ॥२३॥ रोहिण्यो शनो ध्वांचनीहार ध्वांशुरुगतः ॥
एकरेखागतो युक्तो जलपातस्तथा भवेत् ॥२४॥ कृशानुकेतुभौमा
भ्यां गुरुणा भृगुणा जलम् ॥ लोहपातं विनाकींध्यां युक्तः कुर्यान्नि
शाकरः ॥२५॥ सूर्याराभ्यां भयं कुर्यात्तमोकींध्यां युतोप्युतिम् ॥ सो
गुरुभ्यां युतः सेधिं समं शुक्रेण शीतगुः ॥२६॥ धी ५ विक्रम ३ व्यय
१२ धन ७ धर्म ९ शत्रु ६ तनु १ ख १०ः ॥ शशांकाद्यपसव्येन स्थितः सो
पि युतः स्मृतः ॥२७॥ ग्रहाणां क्रूरसौम्यानामिदं ज्ञात्वा बलाबलम् ॥
युद्धं पातं च घातं च ब्रूयात्तदनुसारतः ॥२८॥ एकरेखागतैः क्रूरैः
राहुयुक्तो निशाकरः ॥ रक्तपातो भवेत्तत्र यावत्तैः संयुतः शशी ॥२९॥
गुरुणा भृगुणा ज्ञेन यदा चंद्रः समन्वितः ॥ एकरेखागतो वापि जलपा
तस्तदा भवेत् ॥३०॥ आदित्येन यदा युक्तो महिपुत्रेण वा शशी ॥ एक
रेखागतो वापि युद्धं वाभ्यां महाहवः ॥३१॥ एकत्र बुधशुक्रौ च यदि तेजगतः
शशी ॥ यदि तत्र [illegible]तो भानुः समुद्रमपि शोषयेत् ॥३२॥ एकरेखा यदा
द्वौ चंद्रमाधरणीसुतौ ॥ यदि तत्र गतो जीवस्तत्र वृष्टिर्न संशयः ॥३३॥
॥अथ चंद्रस्य वक्रत्वमाह॥ वह्निभादिं दुपर्यंतं यावंति स्युरुडून्यथ ॥
तेन द्विगुणिते कोनाप सव्यं गण्येद्विधुम् ॥३४॥ लोहपातं वदेत्ता
त्रे संग्राममद्वैत्र संस्थयोः ॥ वर्षासु जलपातं च वायुपातं शुचौ व
देत् ॥३५॥ अनलेपनुपर्यन्येव वज्रपातं वदेत्सुधीः ॥ अर्को[illegible]
यस्मिन्राशौ ये ग्रहा ले खेवं पंचघटीपर्यंतं तिष्ठति तदुपरि द्वि
तीयराशौ स्याप्याः पुनर्द्वादंडोपरि तृतीयराशौ स्याप्याः एवं सं
स्थाप्य चिंतयेत् ॥ इति पंचपातनचक्रं त्रिकोणम् ॥ त्रिनाडि
के के त्रिकायेक लिचक्रे विपर्ययवत् ॥ दिननक्षत्रसंयोगा लोके
पातं तु तावदेत् ॥ इति त्रिनाडीचक्रम् ॥ वेधश्चक्रे यदा दृष्टा
रे त्रिकोणे भयसन्नमे ॥ यो यत्राकोदये खेटस्तं तत्रैव विनि
र्दिशेत् ॥ पंचपंचघटीमाना लग्नाल्लग्नव्रजेद्ग्रहाः ॥ राहुके
तु स्थितिमार्गे संहारे कोदयोग्रहाः ॥ मामंति राहुवद्वक्रा अन्ये सं

तारगामिनः ॥ क्रूरग्रहयुते विद्धे लग्ने लोहं विनिर्दिशेत् ॥ स्वल्पाधिक ब
हुत्वात मकादि ग्रहयोगतः ॥ शत्रुसंयोगतो घोरं मित्रसौम्ये न जायते ॥
इति द्वादशारलोहं ॥ अथ लोहपाते स्थानसंघट्टमाह ॥ मेषादि सहके
शल्ये पृष्ठे वक्षे पुरोतिके ॥ चित्रादि सप्तके लोपे क्षेत्रे वेश्याच तुष्टये ॥ लो
हं वर्षति मार्गेषु पूर्वभाद्रपदागये ॥ ग्रामजलसमीपप्रकारे लोहपातं
मोहं ॥ तिथिः ५ पंचगुणा कार्या दिनभेन समन्विता ॥ त्रिभि ३ र्भक्तो शेष
मेकं जले लोहं विनिर्दिशेत् ॥ द्वयं ग्रामे तथाकाशे शेषे शून्यं वदाम्यहं ॥
संग्रामदेश्या दृष्टिमाह ॥ तिथेः शक्रघटिकापञ्च दशो १५ द्धृ वीक्ष्यते शिवो ॥
दश १० ग्रामे दशो १० देशे दशग्रामे १० धस्थितिभ्रमः ॥ पञ्चाशि मेरवी हष्टि
स्तगलोहं गवर्षति ॥ अथ कविचक्रमाह उत्पाते प्रकारे वानिली
वेभ्रगयोगते ॥ शोकार्ते व्यसनं प्राप्ते लोभयो मत्तचेतसि ॥ विवाहमित्रसं
योगे शत्रूणां च समागमे ॥ तीर्थे देवालये व्यग्रे सेनाघाते निनायके ॥
बहुधा कविकालस्तु कविनोऽवलम्पते ॥ एतां ज्ञात्वा कविं कुर्यात
म हंति नृपतिं परं ॥ कविचक्रं प्रवक्ष्ये तेभ्यं चतुरंगिनाडिकं ॥
अग्निमाक्षी शि अस्तो लि प्रवेशे उदकोलनः ॥ निर्गमे गीलि अस्ता
लिमध्या त्रा दिक्षि विन्यसेत् ॥ लंभ धिष्ण्यानि चत्वारि मध्यस्थानि
चतुर्दिशि ॥ प्रवेशोदयचक्रादिके विचक्रमिदं भवेत् ॥ कविः शिखी १
पिंगलिको २ कपोत्यको न्नि वेशमे ॥ पूर्णालंबानि निपालेउले
खीचटकी वकी ॥ जीवपक्षे स्थिते चंद्रे प्रवेशा ते पिचाकुले ॥ प्रवे
शं निर्गमं ज्ञात्वा कविपुढ्ढं प्रकाशयेत् ॥ कवि पुढ्ढ पत्र धिष्ण्ये तद
ग्रते लिपावकः ॥ तदाभवेन्मार्गगमो मार्गरोधप्रपृष्ठगे ॥ जी
ववारेऽर्कभे शिरस्था सम पुढ्ढं गजायते ॥ स्वतावर्के हि पिंगला
पापिनो वह्निजं भयम् ॥ पुनर्वसौ भौमदिने कपोत्यापापिनो मृ
तिः ॥ पूर्णालंबा यां मंदे हि वह्नि भेत्रियते ग ॥ वेष्ये चंद्रे हि
वा हे खीहयंतस्को पलायते ॥ चटक्यां वाऽरे हि पापी त
त्से न्य यो मृतिः ॥ बक्यां पूर्व भग्नु दिने पापी बंधनमाप्नुयात ॥ सदो
षामपि निदोषा पुहे खीवर्जयेत्कवो ॥ उदयालो खरोपेवा जन्मस्थः
सप्तमो विधुः ॥ नाह्निनेत्रुमतः सर्वे वर्जनीया भगोरले ॥ क्रूरः प्रवेशभेय
त्र तदिशि स्यात्प्रवेशनं ॥ सौम्या स्वक्रे निर्गमसंशुभल्लिदिशि निर्गमः ॥
जन्मस्थः सप्तम स्वक्रेः पंचमो नवमोपवा ॥ परस्य पुरनोप स्य तदा भंगं
विनिर्दिशेत् ॥ भूवले १४ नः ज्ञात्वा पुरस्पपुरस्यकं ॥ घातपातदिशां हि
त्वा कविपुढ्ढं समाचरेत् ॥ निर्गमस्थे स्थिते चंद्रे क्रूरखेटे वहिस्थितेः ॥
निशीये वेष्टकास्तु ज्ञात्वा नि हन्युः पौरवासिनः ॥ नीलोः साधारलेक्रूरे
पुढ्ढयोगे त्रिपुष्करे ॥ केचिन्नरेश भात्के चित्स्थान भाच्चकमृचि
रे ॥ इति कविचक्रम ॥ सर्पभादिंदुपपं तं वह्नि भागा वशोषि
तम ॥ नरराक्क १ म भौहोतु २ श्लं १ लैं ० विनिर्दिशेत् ॥ नरेरागाढितुरणबु
द्धिर्भूमोद्रागन्निवर्तते ॥ श्ले संजायते सिद्धिः संग्रामेऽपि चतुर्विधे ॥ ।

रविसोमकुजः सौम्य गुनिजीवस्तमः कविः ॥ आद्यादिदिनभाज्ञी लिन्य
से क्रूरस्थिते मृतिः ॥ जन्मभेऽर्कौ विभे मृत्युभंगः स्यात्कुज राहुगे ॥
शुभे स्यान्नाश्रिते सिद्धि र्योद्धुस्ताराम्वये कवौ ॥ अथ भैरव गौरी सं
वादे त्रिकोणसंघट्ट ॥ त्रिकोणं नवभिर्दंडरेखाभिर्वेधसंयुतम् ॥
कृत्तिकादिगते देवि चन्द्रः पापग्रहं त्यजेत् ॥ अथ मध्ये भवेच्चंद्रः ॥
मध्ये चैव दिवाकरः ॥ एकरेखांगतौ तौ तु लोहं तत्र विनिर्दिशेत् ॥
कृत्तिकादीनि सव्यानि मघादीन्यपि सर्वतः ॥ मैत्रे यादीनि सव्यानि
वसुसप्ताप सव्यतः ॥ सव्यापसव्यमेवं तु गणयेदुक्तकर्मणि ॥ भौमश्च
गुरुयुक्तेन्दुरथवा राहुसंयुतः ॥ अग्निज्वालाकरिष्यंति लोहपाते
न संशयः ॥ एकनाडीयदा प्राप्तौ राहुकौ केतुमंगलौ ॥ तद्दिने जायते
युद्धं चातुरंगे महाहवे ॥ शन्यर्कौ बुध चंद्रौ वा जायते दारुणो रणः ॥
कुजराहोर्यदा दृष्टिः चंद्ररेखायुतौ यदि ॥ एकनाडी समायातौ चंद्रमा
धरणीसुतौ ॥ तत्र पश्चात्कृते जीवः पाषाणं जलपातनं ॥ उदयादिग
तादंडा नवघ्ना९ नख२० भाजिताः ॥ भुक्तात्यानि नक्षत्रं संयुक्ताः शेषे ता
त्कालिकाग्रहाः ॥ इति संघट्टचक्रम् ॥ सेनापादौ तु नक्षत्रानरा
गं तस्य तिः स्मृतः ॥ उदरे खड्गिणः श्रोक्ता हृदये वाहकाः ॥ स्कंधो
गजा भुजौ रथ्या करांगुल्यो धनुर्धराः ॥ वाद्यवादनकं पृष्ठे मंत्री जिह्वा
द्विजारदाः ॥ देवज्ञो ज्ञीनवो(?) प्राणं श्रवणे हेरवारकाः ॥ पताकाछ
त्रचमरध्वजाः केशाकलापकाः ॥ सेनोपकरणं सर्वं रोमावलिरि
ति स्मृतम् ॥ वस्थाने दद्यात् शिर्षि देयं १ श्रुतौ २ नेत्रे द्वयं द्वयं ॥ एकं १
घ्राणे २ रसने पार्श्वेकं १ दंते सागराः ४ ॥ पृष्ठे २ स्कंधे २ भुजे २ गुल्यो
२ हृदये च २ द्वयं द्वयं ॥ एकैकं २ मुदरे २ गुह्ये १ चत्वारि चरणद्वये = ॥
सर्वोपकरणं रोमन्यासः सेनास्वरूपकः ॥ यदंगस्थः क्रूरखेटस्तदंगो
भिद्यते परैः ॥ सौम्यग्रहाः यदंगस्थास्तदंगो जयमाप्नुयात् ॥ राहुस्था
ने गतो वाहाश्च विने(?) मिरथाद्वयं ॥ पदातिभिः कुजस्थाने मंदस्थाने
गजाद्वयम् ॥ चतुरंगः क्रतापीडा केतुस्थाने च जायते ॥ यदंगे सक
लाः क्रूरास्तदंगो मृत्युमाप्नुयात् ॥ मिश्रा मिश्रफलाः सौम्य मंदा वाय
दिवालग्नाः ॥ मंदस्थौ शीघ्रौ(?) प्राणे स्पृ नृपः (?)न्नाद्विनश्यति ॥ अत्रैव
राहुशिखिनौ राज्ञो बंधनदायकौ ॥ ददाति संततं भौमस्तरणे भं
गदायकः ॥ नाभेरधःस्थिताः पापा ऊर्द्ध्वे सौम्या जयावहाः ॥ विपरीता
मृत्युकराः सैनिकस्य नृपस्य च ॥ मिश्रा भंगप्रदा युद्धे पापयदिव
लान्विताः ॥ विजयो जायते राज्ञः सौम्या यदि बलाधिकाः ॥ ॥ २२

॥ इति सेनाचक्रम् ॥ ॥

योगे स्वकर्मतः पिंडे शरीराङ्गे सुहृज्जनात् ॥
राशौ स्वकुलतो जीवे स्वविज्ञाद्गृहतोरिपो ॥ २३ ॥
वर्णे स्वस्वामितो ज्ञेयं मात्रायां स्त्रीजनात्फलम् ॥
एवं ज्ञात्वा वदेद्विद्वान्दिने फलं शुभाशुभम् ॥ २४ ॥
इति यामले दिनफलस्वरचक्रम् ॥ गुह्याद्गुह्य
तरं सारम् प्रकाश्यं प्रकाशितम् ॥ इदं स्वरोदयज्ञा
नं ज्ञानानां मस्तके स्थितम् ॥ १ ॥ सूक्ष्मात्सूक्ष्मत
रं ज्ञानं सुबोधं सत्यप्रत्ययम् ॥ आश्चर्यं नास्तिके
लोके आधारमास्तिके जने ॥ २ ॥ दुष्टे च दुर्जने
क्रुद्धे असत्ये गुरुतल्पगे ॥ हीनसत्वे दुराचारे स्व
रज्ञानं न दीयते ॥ ३ ॥ शान्ते शुद्धे सदाचारे गुरुभ
क्तैकमानसे ॥ दृढचित्ते कृतज्ञे च देय एष स्व
रोदयः ॥ ४ ॥ इति यामले स्वरप्रशंसा ॥
अथान्यत्संप्रवक्ष्यामि शरीरस्थं स्वरोदयम् ॥ हं
सचारस्वरूपेण येन ज्ञानं त्रिकालजम् ॥ १ ॥
कुंडलिनी महाशक्तिर्नाभिस्था हि स्वरूपिणी ॥
ततो दशोर्ध्वगा नाड्यो दश चाधोगतास्ततः ॥ २ ॥

योगेति २३ ॥ २४ ॥ इति दिनफलस्वरचक्रम् ॥ कथितस्वरनिर्णयस्य
सकलशास्त्रेषु श्रेष्ठ्यं योग्यतां च प्रदर्शयति ॥ गुह्याद्गुह्येति ॥ १ ॥ सूक्ष्मेति ॥
नास्तिके मिथ्याज्ञानादिनो आश्चर्यं विस्मयकारणं ॥ २ ॥ ३ ॥ ४ ॥ इति स्व
रप्रशंसा ॥ अधुना पंचस्वरव्याख्यानानंतरं देहस्थवामदक्षिणस्वर
योरायमुनिप्रोक्तस्वरूपयो हंसचाररूपयोः श्लोकानां व्याख्यानं यथा
ज्ञानं करोमि ॥ अथान्येति ॥ अथशब्दोऽत्रानंतर्ये ॥ १ ॥ अथानंतरं
पंचस्वरकथनानंतरं हंसचारस्वरूपेण शरीरस्थं स्वरोदयं दक्षिण
वामस्वरोदयं वदयामि ॥ कुंडलिनीति ॥ यथा ॥ सदा उदयति दक्षिणः
स्वरो वामः स्वरो वा तथा व्याख्यास्यामि ॥ शक्तीनां मध्ये महाशक्तिः
देहिनां नाभिस्थाने विद्यते । तस्य नाम कुंडलिनीति । किंरूपा । आ
हि स्वरूपिणी । सर्पिणी च कुंडलीभूता विद्यते ॥ सा देहस्थानां नाडी
नां मूलभूता ॥ तथा च ॥ ततइति ततः तस्याः कुंडलिनीभूताया दश
नाड्य ऊर्ध्वगताः दश नाड्योऽधोगताः ॥ २ ॥ द्वे द्वे तिर्यग्गते इति ॥ त
स्या एव कुंडलिन्याः द्वे द्वे नाड्यौ तिर्यग्गते ज्ञेये एवं चतुर्विंश
ति नाड्यः कुंडलिनीशक्तेर्मूलमार्गजाताः ॥ ३ ॥ ताभ्य इति ॥
ताभ्यश्चतुर्विंशति नाडिकाभ्यः सप्तोत्तराणि शतानि जायंते ॥

ताः शरीरस्य अतिपोषिकाः पुष्टिकारिण्यः यतः एतनाहाराऽन्नादेरस
वाहिन्यः यत्र यत्र प्रतता विस्तृता तत्र तत्र रसान्नयंति तत्तन्मार्गग
तारसाः शरीरं पुष्णंति ॥४॥ प्रधाना दश इति । तासां मध्ये दश नाड्यः
प्रधाना विद्यंते तास्तु दशसंख्यानां वायूनां प्रवाहिकाः ताभ्यो दश
वायवः शरीराद्बहिः प्रभवंति तासां दशनाडीनां नामानि वदामि ॥५॥
अथ नाडिकां नामानि ॥ इडा पिंगलेति ॥ सुगमं ॥६॥ अथ वाता
नां नामानि ॥ प्राणोऽपानेति ॥ एते दश वायवः इडा नाडी हृदयाद्द
क्षिणनासापुटाभिमुखी तस्यां प्राणो नाम वायुर्वहति पिंगला
नाम नाडी हृदयाद्वामनासापुटाभिमुखी तत्रापानवायुस्तिष्ठति

ह्वेतिर्यग्गतेनाड्यो चतुर्विंशतिसंख्यया ॥
कुंडलिन्या महाशक्तेः स्थलमार्गा भवंतमी ॥३॥
ताभ्यः सूक्ष्ममुखा नाड्यः शरीरस्यातिपोषिकाः ॥
शतानि सप्त जायंते सप्तोत्तराशितिसंख्यया ॥४॥
प्रधाना दश नाड्यस्तु दश वायुप्रवाहिकाः ॥ ना
मानि नाडिकानां च वातानां च वदाम्यहम् ॥५॥
इडा १ पिंगला २ सुषुम्ना ३ गांधारी ४ हस्तिजि
ह्विका ५ ॥ पूषा ६ यशा ७ चम्बूषा ८ च कुहूः ९
शंखिनिका १० तथा ॥६॥ प्राणोऽपानः समान
श्च उदानो व्यान एव च ॥ नागः कूर्मः कृकश्चैव देव
दत्तो धनंजयः ॥७॥ एकैको वायुसंचारो लक्ष्य
ते देहमध्यतः ॥ इडापिंगलासुषुम्नाभिर्नाडीभिस्थि
रमिर्वुधै ॥८॥ इडा नाडी स्थितः चंद्रः पिंगला भानु

गांधारी नाडी नाभेरधोगता तत्रापानो वायुः जिह्विका नाम नाभि
स्था तत्र समानो वायुः सुषुम्नायां तिष्ठति एवं नागादयः पंचप्र
काराः पंच सुस्थिताः एकैकः अन्योन्यः प्रचित एव नासापुटे
दयास्ति पुट हृदय श्रोत्र पुट हृदय मुख नाभि वायु ब्रह्मरंध्रादिमार्गे
भ्यो दश वायवः प्रभवंति अयार्थ सनकादियोगिनः प्रमाणे
एषां प्रयोजनाभावात् सुगमार्थाः ॥७॥ अथ दशनाडीनां मध्ये
तिस्रः प्रचिताः ताभ्यां वायवो लक्ष्यंते ताआह एकैको वायु
रिति सुगमम् ॥८॥ इडा नाडी इति अस्यार्थोऽग्रे विधेयः ॥
॥९॥ शक्तिरूपइति ॥ अत्र वामनासापुटयो वायुः संचरति स
चंद्रः दक्षिणनासापुटयो वायुः स सूर्यः सूर्यरूपी शंभुर्महे
शः शक्तिरूपी चंद्रः ययोः शिवशक्ति उच्यते शंभुरेव हंससंज्ञः
॥१०॥

तस्यल ज्ञानं वहति॥ हकारो निर्गम इति अत्रशब्दा पोऽवानंदकारिणः प्रयो
जनाभावात्माप्यमूलानां॥११॥ अथ विज्ञानाज्ञानहेतु प्रयोजनमाह एकैके
ति॥१२॥ अथैनयोः प्रवहतोः पंचकलानां ज्ञानमाह मध्ये पृथ्वीति वामे
वा दक्षे वा नासापुटे वायो वहति पूर्णे पृथ्वी नाम तत्त्वं नासापुटादधो यो
वहति ओष्ठस्पर्शी सवायुर्जलसंज्ञः ऊर्ध्वं वहति चानलः नासापुटस्यो
र्ध्वभागं स्पृशन् यो वायुर्वहति तस्य वायोरनल इति नाम तिर्यग्वायुप्रवा
हश्चेति दक्षिणस्वरो वामो वा द्वयोर्मध्ये स्वोदये यो वायुस्तिर्यग्वहति त
स्य प्रवाह वायोर्वायुतत्त्वमिति नाम नभो वहति संक्रम इति वामो वा दक्षि
णो वा स्वोदये वहन् द्वितीयपुटादपि वहिर्निःसरति द्वितीयपुटे क्रमा
दर्द्धं ते स्वपुटात्क्रमाद्व्रजति जावत्तावहकालस्तावन्निष्ठति उभयो-

वाहिनी॥ इत्युक्ताः शंभुरूपेण शंभुर्हंसस्वरूपकः॥१९॥
शक्तिरूपः स्थितश्चन्द्रो वामनाडीप्रवाहकः॥ दक्षनाडीप्र
वाहश्च शिवरूपी दिवाकरः॥२०॥ हकारो निर्गमे प्रोक्तः
सकारोन्तः प्रवेशने॥ हकारः शंभुरूपस्यो सकारः शक्ति
रुच्यते॥२१॥ एकैकघटिकाः पंच क्रमेणैवोदयंति ताः॥
पृथिव्यापस्तथा तेजो वायुराकाशमेव च॥२२॥ मध्ये
पृथ्वी अधश्चापः ऊर्ध्वं वहति चानलः॥ तिर्यग्वायुः प्रवा
हश्च नभो वहति संक्रमे॥२३॥ धरादेकैकतत्त्वस्यैकैक
घटिकोदयः॥ अहोरात्रस्य मध्ये [illegible] लेन द्वादश संक्रमाः॥२४॥
आदौ चंद्रः सिते पक्षे भास्करस्तु सिते तरे॥ प्रतिपदादितो ह्या
॥ नि त्रीणि त्रीणि क्रमोदयः॥२५॥

सकालोग्ने व्याख्यातव्यः॥ वामदक्षिणस्वरस्थानग्रहानाह वामः स्वर आह
विद्यचंद्रशुक्रगुरवो वामनाड्यां धरादितः॥ रविभौमयमाः सर्पकथिताः सू
र्यनाडिगाः॥ वामस्वरे वहति यावत्पृथ्वी तत्त्वं वहति तावद्बुधग्रहस्यो
दयः अप्तत्त्वे वहति चंद्रस्योदयः॥ तेजसि वहति शुक्रस्योदयः॥ वायु
तत्त्वे वहति गुरोरुदयः॥ एवं दक्षिणवायो वहति रविभौमयमराहवः॥
पृथिव्यादुदयक्रमेण उदयंति॥ ग्रहोदये ग्रहफलमादिशेत्॥ यथा
लग्नवर्तिनि बुधफलं तथा तदुदयेपि एवं सर्वग्रहेषु शुभाशुभफलम्॥१३॥
अथ पृथिव्यादीनां स्थितिकालमाह॥ धराद्येकैकतत्त्वेति सुगमम्॥१४॥
अथ दक्षिणवामयोः शाकगवेषणसमयमाह॥ आदौ चंद्रः सितेति त्रि
षु त्रिषु शाकोदयं स्वस्य पक्षयोः तेनाकि पंच दशा सु तिथिषु शाकवामस्य
तयउदयाः दौ दक्षिणस्य एवं तथा च प्रतिपत्त्रिषु चंद्रस्य चेतुर्थ्या
दिषु भास्वतः सप्तम्यादित्रिषु विधोर्दशम्यादिषु भास्वतः तथा दिषु
विधोः शाकस्यादुदयः स्वरवेरपि॥ स्वपक्षे आपसुदयः प्रतिपत्प्रभृति रवे
ष्वेषः पंच पंच घटीमानादेकैकस्य स्याद्धि योभवेत् आदौ चन्द्रः सितेत्यर्थः
सितेन्येकृष्णतो विधुः एवं क्रमेण स्वरयोः पक्षे द्वादशसंक्रमः सुगमः॥२५॥

अथ विपरीतोदयफलमाह ॥ चंद्रोदये यदा सूर्य इति शुक्लपक्षे प्रतिपदादि
षु यदि प्राग्रवेरुदयस्तद्दिने हानिः अशुभं किमपि उद्वेगो वा निःकारण
त् । एवं कृष्णपक्षे चंद्रोदयः प्राक् तदापि हानिरुद्वेगोदयः ॥ १६ ॥
अथ वामदक्षिणस्वरयोर्वशीकरणमाह ॥ शशांकं चारयेदिति ॥ वाम
स्वरश्चंद्रो दक्षिणस्वरो रविः ॥ तेन दिनाधिपो रविः रात्रिपतिश्चंद्रः
शशांकं चारयेदिति प्रागुक्तं प्रतिपदादिषु त्रिषु त्रिषु आदौ चंद्रः
सितेपक्षे भास्करः कृष्णे इति तेन तत् इति सूर्योदयादारभ्य प्रहरमितकालं तिथ्यु
दये तिथिभुक्ताधिककाले प्रारब्धा भवति तिथ्युपलक्षणं तेन
शुक्लादौ प्राक् चन्द्रोदयः कृष्णे सूर्योदयः अतउक्तं शशांकं चारये
द्रात्रौ इति अभ्यासात्स च रात्र्यास्मिन् योगिभ्य उपदेशमादाय आ

चंद्रोदये यदा सूर्यश्चंद्रः सूर्योदये यदा ॥ अशुभं हा
निरुद्वेगस्तद्दिने जायते ध्रुवम् ॥ १६ ॥ शशांकं चारयेद्रा
त्रौ दिवा चार्यो दिवाकरः ॥ इत्यभ्यासरतो नित्यं स योगी
नात्र संशयः ॥ १७ ॥ यात्रादाने विवाहे च वस्त्रालंका
रभूषणे ॥ शुभकर्मणि संधौ च प्रवेशे च शशी शुभः ॥ १८ ॥
विग्रहे द्यूतयुद्धेषु स्नानभोजनमैथुने ॥ व्यवहारभये
भंगे भानुनाडी प्रशस्यते ॥ १९ ॥ होमप्रशांतिकं चै
व दिव्यौषधिरसायनम् ॥ विद्यारंभः स्थिरं कार्यं कर्त
व्यं च निशाकरे ॥ २० ॥ दूरयुद्धे जयी चंद्रः समासन्ने दि
वाकरः ॥ वहन्नाडीपदे चैव कृत्वा यात्रा प्रसिद्ध्यति ॥ २१ ॥

भ्यासं कुर्वन् रात्रौ वामस्वर एव यथा वहति तथाभ्यासं कुर्यात् ।
दिवासकले दक्षिणस्वर एव वहन् तिष्ठति एवमभ्यासात्
योगी भवति ॥ १७ ॥ अथ वामदक्षिणयोः स्वरयोः कार्ये पृथक्
प्रधानतामाह ॥ यात्रादाने इति । एतानि वामस्वरे वहति कुर्या
त् इत्यभिप्रायः ॥ १८ ॥ विग्रहेति ॥ भय इति भयोपस्थिते यदि
प्रश्नो दक्षिणस्वरे वहति तदाभयं भवति इत्यर्थः एवं भंगप्रश्ने
पि ॥ १९ ॥ होमप्रशांति सुगमम् ॥ २० ॥ अन्यदाह ॥ दूरयुद्धेति दूर
युद्धे भाविवद्काले युद्धे सति चंद्रो जयी कोर्थः वामस्वरो जयी
दूरयुद्धे इत्युपलक्षणं दूरयुद्धे ज्ञानविषये जयाय वामस्वर
बलेन यात्रां कुर्यादित्यर्थः समासन्ने दिवाकरः इतितथा निकटस्थे
युद्धे सूर्यवाहेन युद्धाय यात्रां कुर्यात् परं तु वहन्नाडीपदेन यः
एव स्वरो वहति वामो वा दक्षिणो वा वामे वहति वामपादं चा
लयेत् दक्षिणे वहति दक्षिणं चालयेत् ॥ ॥ २२ ॥

तत्र पादचालने विशेषमाह सूर्येवहतीति सुगमं ॥ २२ ॥ अथान्यत् ॥ पृथ्वीजलेति
अथ प्रश्ने शुभप्रश्ने शुभाशुभम् वामे स्वरे कार्यार्थं प्रश्ने पृथ्वीतत्त्वे वहति
जलतत्त्वे वा तदा वामस्वरवेलायां वामस्वरे कार्यस्य शुभं वदेत् तेजसि
तत्त्वे मिश्रं फलं व्योममारुतयोः प्रवहतोः हानिः कार्यहानिः मृत्युरिति कष्टं वा
च्यं प्रश्नः दक्षिणस्वरे वहति सति प्रश्नफलं ब्रूयात् ॥ २३ ॥ अथ मुष्टिविषय
रूपमाह ॥ आपः श्वेतइति मुष्टिः प्रश्नविषये वस्तुनि पृथिव्यादिवर्णं ब्रूयात् ॥ २४ ॥
अथ योधयोः स्वरबलात् जयाजयमाह । योधद्वयेति यथा केनापि प्रश्नः कृ
तो देवदत्तयज्ञदत्तयोर्मध्ये को जेता भविष्यतीति प्रश्ने पूर्णस्वरे सति प्रथमो
जयी यस्य प्रथमं नामग्रहणं स जयी वाच्यः अर्थादितरः पराजयी अथ रि
क्तस्थे प्रष्टरि योधयोर्मध्ये यस्य पश्चान्नामग्रहणं कृतं स जयी वाच्य इत्यर्थः ॥

सूर्ये वहति चंद्रे वा पूर्णपादं प्रचालयेत् ॥ चंद्रे समपदे यागास्सूर्ये ऽ
समपदे क्रमात् ॥ २२ ॥ पृथ्वीजले शुभे तत्त्वे तेजो मिश्रफलोदयं ॥
हानिमृत्युकरौ पुंसामुभौ हि व्योममारुतौ ॥ २३ ॥ आपः श्वेतं क्षि
तिः पीता रक्तवर्णो हुताशनः ॥ मारुतो नीलवर्णः स्यादाका
शो धूम्रवर्णकः ॥ २४ ॥ योधद्वयकृते प्रश्ने पूर्णे च प्रथमो ज
यी ॥ रिक्ते संस्थे द्वितीयस्तु जयी भवति नान्यथा ॥ २५ ॥ यु
द्धकाले यदा चंद्रः स्थायी जयति निश्चितम् ॥ यदा सूर्यप्र
वाहस्तु यायी च विजयी तथा ॥ २६ ॥ पार्थिवे समरं युद्धं
संधिर्भवति वारुणे ॥ विजयो वह्नितत्त्वे तु नाशो भंगो मृ
तिः खे ॥ २७ ॥ पूर्णनाडीगतं पृष्ठे शून्यमंगं तदग्रतः ॥
शून्यस्थाने कृतः शत्रुर्म्रियते नात्र संशयः ॥ २८ ॥

पूर्णे रिक्ते नामग्रहे के पुयिष्यति ॥ २५ ॥ अथ वामदक्षिणस्वरवहतोर्यायिजयत्व
माह ॥ युद्धकाले यदेति ॥ युद्धकाले यदा चंद्रो वामः स्यात्तदा स्थायिबलं द
क्षिणस्वरश्चेत्तदा यायिबलम् स्वरशकरणे व्याख्यातम् ॥ २६ ॥ अथ युद्धका
ले प्रश्नकाले वा पृथ्व्यादितत्त्वमाह ॥ पार्थिवेति ॥ खे आकाशतत्त्वे मृतिरि
ति शेषं सुगमं ॥ २७ ॥ अथ युद्धकाले पूर्णहीनयोर्वामदक्षिणयोः स्वरयोः क
र्तव्यमाह ॥ पूर्णनाडीगतमिति ॥ स्थायी वा यायी वा विजयकांक्षी युद्धे
युद्धकाले घातकाले पूर्णस्वरं पृष्ठे कुर्यात् शून्यमङ्गं तदग्रं सकलं च
वामं वा दक्षिणं वा शत्रुसन्मुखे दद्यात् एवं शून्यस्थानकृतः शत्रुर्म्रियते
घातेनेत्यर्थः ॥ २८ ॥ अथ वामस्वरयोर्दिशादिग्बलमाह ॥ पूर्वोत्तरदिशा
इति । चंद्रे वहति वामस्वरे वहति स्थायी योधः पूर्वदिशि उत्तरदिशि वा स्थितो
भयात् ॥ यायी दक्षिणपश्चिमदिशि नेते जयाजयविरोभयात् ॥ २९ ॥

अथ वामदक्षिणे वहति निषेधमाह ॥ वामनाड्युदयइति । युद्धकाले वा
मस्वरे वहति चंद्रे वाममन्मुखः कार्यः ॥ दक्षिणः स्वरे वहति सं
ग्रामकाले सूर्ये पृष्ठ दक्षिणस्थं कुर्यात् ॥ ३० ॥

॥ न॰ ज॰ ॥
ज॰ टी॰
॥ २३ ॥

23

पूर्वोत्तरदिशो श्चंद्रे भानौ पश्चिम[illegible] याम्ययोः ॥ स्थित
स्तत्र जयी युद्धे स्थायी यायी क्रमेण च ॥ २९ ॥ वामनाड्यु
दये चंद्रः कर्तव्यो वामसंमुखः ॥ सूर्ये वाहति पाः सूर्यः पृष्ठ
दक्षिणगो जयी ॥ ३० ॥ शयने वा प्रसंगे वा युवत्या लिंगने
पि वा ॥ यः सूर्येण पिबेच्चंद्रं स भवेन्मकरध्वजः ॥ ३१ ॥ जी
वेन गृह्यते जीवो जीवो जीवस्य दीयते ॥ जीवस्थानग
तो जीवो बालो जीवांतकारकः ॥ ३२ ॥ रात्र्यंते याम वे
लायां प्रसुप्ते कामिनीजने ॥ ब्रह्मजीवं पिबेद्यस्तु बालां
प्राणहरो नरः ॥ ३३ ॥ अर्केन्दुयोगे पुन्नार्यो ह्यस्मिन्काले
रतेः सति ॥ तत्काले दीयते चन्द्रो मोहमायाति कामिनी ॥ ३४ ॥
चन्द्रचारी विहरति सूर्ये बालां वशं नयेत् ॥ सुषुम्ना
यां भवेन्मोक्षः रोको देवत्रिधा स्थितः ॥ ३५ ॥ भुक्तमात्रे
च मन्दाग्नौ स्त्रीणां वश्यादिकर्मणि ॥ शयने सूर्यवाहेन
कर्तव्यं सर्वदा बुधैः ॥ ३६ ॥ श्रांते क्लांते विषार्ते चज्व
रिते मूर्छिते पि वा ॥ सज्जनस्यापि बोधार्थं चन्द्रचारं
प्रवाहयेत् ॥ ३७ ॥ ऊर्ध्ववामाग्रतो दूतो ज्ञेयो वाम

॥ अथान्यत् ॥ शयनेति ॥ यः सूर्येण पिबेच्चंद्रमिति शशांकं चारयेद्रात्रौ
दिवा चार्यो दिवाकर इति प्रथममुक्तं ॥ अत्र चंद्रोदयो रात्रौ भवति तं वा
मस्वरं दक्षिणेन पिबति कोर्थः दक्षिणमेव दिवानिशं चारयेत् अथ
मस्माकमर्थः दिवा दक्षिणस्वरस्योदयो भवति तेन दिवा वामस्वरे ऽ
भ्यासं कुर्यात् मकरध्वज इव भवति सुन्दर इत्यर्थः वाशब्द उभय
त्र समुच्चयार्थः शयनप्रसंगे युवती यदा लिंगति तदा यदि वामो वहति
तदा तं वामं दक्षिणस्वरेण पिबेत् स्वरे सैव रतो भूयादित्यर्थः ॥ ३१ ॥
जीवेनेति जीवेन प्राणेन जीवः प्राणो गृह्यते कोर्थः दक्षिणस्वरे वह
ति यदि वामो भवितुमुद्यतो भवति तदा दक्षिणेनैव वामं पिबेत् वामस्व
रोदये दक्षिणमेव स्थिरं कुर्यात् एवं वामेन दक्षिणं पिबेत् एवं क्रमेण जीवे
न गृह्यते जीवो व्याख्यानं एवं क्रमेण स्वरस्थानगतो दक्षिणः दक्षिण
स्थानगतो वामः तत्कृते बाला जीवांतकारको यं स्यात् बालो सुषुम्ना
मृत्युलक्षणकारकः कोर्थो मृत्युं जयतीत्यर्थः वायुर्वर्द्धते वायुर्धार
णाद्वायुर्वर्धते अमुमेवार्थं मनसि कल्पयति ॥ ३२ ॥ रात्र्यंतेति रात्रेरवसा
ने यामे निद्रां विहाय ब्रह्मवेत्ता योगाभ्यासं कुर्यादिति गुरुपरंपरा तदा
स्वराभ्यासं कुर्वन्नजपेत् तत्र वेलायां सुषुम्नायां वेलायां मृत्योर्जीवह
रो नरो भवति तथा च योगशास्त्रे शिवशास्त्रे लिंगपुराणे चैतत् पालनीयं तस्मिन्काले म
ति तत्काले दीयते चंद्रो मोहमायाति कामिनी ॥ ३३ ॥ ३४ ॥ चंद्रचारी
ति सुगमम् ॥ ३५ ॥ अथ दक्षिणस्वरे यत्कर्तव्यं तदाह ॥ भुक्तमा
त्रेति ॥ ३६ ॥ श्रांते क्लांतेति ॥ भुक्तमात्रे त्वाद्युक्त्या

येषु दक्षिणस्वरे वहति तानि तानि कुर्वीत एवं श्रांत इत्यादि कर्माणि चंद्रवा
हे प्रवाहयेत् ॥ ३७ ॥ अथ वामदक्षिणस्वरयोः प्रयोजनमप्यस्य मेवेत्याह । प्रा
ह ॥ ऊर्ध्वं वामाग्रतो इति । अथ वामदक्षिणस्वराभ्यासी ज्योतिर्विद् इत्युं प्रष्टारं लक्ष्
येत् असौ पृष्टा वामस्वरानुगतो वा इति वितर्कयेत् तत्र निर्णीतार्थमाह यऊर्ध्व
स्थो भवति इतो यत्र कुत्रचित् आत्मनः सकाशात् उच्चपीठादिप्रदेशस्थः स वाम
गतः स्याद्यः वामस्थितः वामगत एव अग्रतः स्थ्रेत्पृच्छति तदपि वामभागगत
एव बोद्धव्यः तथा तेनैव प्रकारेण पृष्ठे पश्चात् स्थितः दक्षिणे च स्थितः अध
स्तात्स्थितः आत्मनः सकाशात् नीचस्थ आत्मानं पृच्छति तत् ऊर्ध्वस्थं बुध्वा
एवं पृष्ट दक्षिणाध स्थितं दक्षिणगतं ज्ञायते एवं प्रश्नकाले पृष्टदक्षिणगते
उच्चस्थो वामगतः नीचस्थो वामाग्रतोऽपि दक्षिणः ॥ ३८ ॥ अस्यार्थः प्रष्टा नरः ते
वं पूरयति सूर्ये च विषमान्वर्णान्समवर्णान्निशाकरे वाहस्यो भावनेद्रतः
तदा लाभोन्यथा नहि ॥ पूर्णनाडीगतो दृतो यत्पृच्छति शुभाशुभं इति । अथ स्था

पपे स्थितः ॥ पृष्ठे दक्षे तथाधस्तात्सूर्यवाहगतो
मतः ॥ ३८ ॥ पूर्णनाडीस्थितो दूतो यत्पृच्छति शु
भाशुभम् ॥ तत्सर्वं सिद्धिमायाति शून्ये शून्यं न
संशयः ॥ ३९ ॥

स्या सूर्ये दक्षिणः स्वरे वहति सति दक्षिणलग्नगतो दूतो मिलाखित प्रश्नं वि
षमान्वर्णान्वदति एकत्रपंचादीन् तदा प्रष्टुर्मो किंतेपूर्णस्यादिति वदेत्
एवं निशाकरे वाम स्वरे वहति समवर्णान् द्विचतुःषडष्टादीन् स्वाभिला
षितेप्रश्ने वदति तदाप्यभिलाषितं भविष्यतीति वदेत् अन्यथा नहि
सूर्यस्वरे समवर्णान् वामे विषमान् इति अन्यथा विपरीतं वदेत् पूर्णना
डीगत इति अस्यार्थोऽपि स एव शुभं केश्यादि अशुभं संग्रामादि प्रश्नमपि
पूर्णनाडीगतस्य प्रष्टुर्भवति शून्य इति ऊर्ध्वं वामाग्रतो दूत इत्युक्तलक्षणे
न शून्यगतः स पृच्छति तदा शुभाशुभमपि पृष्टं तत्तच्छून्यं भवति न सिद्धिमा
याति अत्र न संशयः कार्य इत्यर्थः ॥ ३९ ॥ अथ शुभाशुभादीनां लाभालाभ
ज्ञानमाह ॥ पृथिव्यादित्रितत्त्वेनेति अथ प्रष्टुः प्रश्नकाले वामदक्षिणः पूर्ण
गतस्य लाभालाभजयपराजयादिप्रश्ने यदि पृथ्वीतत्त्वं प्रश्नकाले भवति
अपत्त्वं वा तेजो वा स्यात्तदा शुभाशुभप्राप्तौ कालं वदेत् एकः काल इत्याह
दिमासाद्वै फलं पृथ्वीतत्त्वे वहति दिवसेन फलं भविष्यति आपतत्त्वे व
हति मासेन फलं तेजसि तत्त्वे अब्देन फलं परं तु तत्फलं शुभाशुभं किं जया
जयलाभालाभादि सर्वं यथाक्रमेणापि प्रश्नः कृतः मया राजतो जीवनं कदा प्रा
प्तव्यं तदा पूर्णगतस्य दूतस्य पृथ्वीतत्त्वे वहति दिनेकेन प्राप्तव्यं तथा जीव

॥ न॰ग॰ज॰ ॥
॥ ज॰ग॰सी ॥
॥ २४ ॥

24

नमितिवदेत् अयमेव शोभनार्थः तथा दुष्टं व्योममारुतवह्निभिः स एव
प्रष्टा यदि शून्यगतः सन् पृच्छति वामदक्षिणयोरेकतमे वहति व्योममा
रुतवह्नीनामेकतमे च तदा दुष्टं फलं वदेत् जीवनं न शाश्वत्यमित्येवं
दुष्टमिति अयं पूर्णः स्वरे वहति पूर्णगतस्य प्रष्टुः व्योममारुतवह्निभिः
दुष्टं वक्तव्यं नो चेत् विकल्पे विरोधात् स एव प्रष्टा यदि शून्यग इति व्या
ख्यातं कवेरभिप्रायोऽयमेव व्योमतत्त्वे वहति दिनैकेन फलम्

पृथिव्यादित्रितत्त्वे नद्दिमासाब्दकैः फलम् ॥
शोभनं च तथा दुष्टं व्योममारुतवह्निभिः ॥ ४० ॥

वायुतत्त्वे मासेन वह्नितत्त्वे वर्षेण फलं तत्र कस्यचित् प्रष्टुरभिलषि
तं मम शत्रुः कदा मृतो भविष्यति तत्र पूर्णगतस्य प्रष्टुः पृथ्वीतत्त्वे
दिनैकेन मृतो भविष्यति। अप्तत्त्वे मासेन॥ तेजसि वर्षेण। पूर्ण
गतस्य इदमपि शोभनं शून्यगतस्य प्रष्टुः शत्रुर्मृतो भविष्यति शून्ये
इदमपि शोभनं अथान्यदविविरुद्धं पूर्णः स्वरे पूर्णफलं शून्यस्वरे
शून्यं पूर्णं पृथिव्यादित्रितत्त्वेन शुभं फलम् व्योममारुतवह्निभिः
अशुभं फलं तत्र पूर्णे व्योममारुतवह्नितत्त्वानि भवंति तदा शुभप्र
श्ने मध्यमं फलं लाभे लोकलाभः अशुभे पूर्णे पूर्णगतस्य हृतस्य
शुभप्रश्ने पृथिव्यादित्रितत्त्वे शुभं पूर्णम् व्योममारुतादित्रितत्त्वे
पूर्णगतस्याशुभप्रश्ने मध्यमं फलं एवं शून्यगतस्य प्रष्टुः पृथिव्यादि
तत्त्वैः पंचभिः पूर्णं मध्यं कल्पयेत्॥ ननु पंचतत्त्वानि वह्नितत्त्वस्य
शुभेऽशुभे च प्रधानता तत्र का गतिरित्याकांक्षायां व्याख्यायते। एक
घटीपर्यंतं वह्नितत्त्वस्य समयः तेन प्रागर्द्धघट्या वह्नितत्त्वे शु
भं वदेत् उत्तरार्द्धघट्या दुष्टं वदेदिति इदमपि स्वराभ्यासगम्यं ॥ ४० ॥

श्वासप्रवेशकाले तु दूतो वांछति जल्पितुम् ॥
तत्सर्वं सिद्धिमायाति निर्गमे नास्ति सुंदरम् ॥ ४१ ॥

अथ वामदक्षिणस्वरवशादेवान्यमपि प्रश्नमाह॥ श्वासप्रवेश
कालेत्विति॥ अत्र प्रश्ने वक्तुरेव स्वापन्नेता स्वराभ्यासी स्वरमना
वामदक्षिणस्वरप्रवेशकाले हतस्य गच्छुर्वांछितं फलं वदेत्॥ इद
मवश्यं भविष्यतीत्यर्थः॥ निर्गमे वामदक्षिणस्वरयोर्निर्गमे प्र
ष्टुर्वांछितस्य सुन्दरं नास्ति॥ इदं तत्र कार्यं न भविष्यतीत्यर्थः॥
अत्रापि भावाभावयोः कालं पृथिव्यादितत्त्वेनैव वदेत् ॥ ४२ ॥ - ॥

॥४२॥४३॥ अथान्यदाह॥ आदौ शून्यगतेति आदौ शून्यस्थानगतः पृच्छति पश्चा
त्पूर्णः स्वरस्थाने उपविशति तदा सर्वार्थसिद्धिः स्यात् जीवितमरणलाभालाभज
यपराजयादिप्रश्ने सिद्धिरेव स्वस्य जीवनं परस्य मरणं स्वस्य लाभः परस्य नलाभः
स्वजयः परस्य पराजयः इत्यादि सर्वप्रश्नेषु सिद्धिर्ज्ञेया यामेवाममिति आदौ पूर्णग
तः प्रष्टा यदि पृच्छति पश्चाच्छून्यस्थानगतः उपविशति तदा वामं वदेत् जीविते मर
णं मरणे जीवितं लाभे अलाभं जये पराजय इति वामप्रश्नार्थः॥४४॥ अथ गर्भ

व्यवहारा खलो वादी द्विषद्याद्यपवंचकाः॥ कुपितः स्वामिचौरा
द्याः पूर्णस्थाः स्युर्भयंकराः॥४२॥ सूर्ये चेद्विषमाञ्चपूर्णे तु सम
वर्णे तु निशाकरे॥ वाहस्थो भाषते दूतस्तदा लाभान्यथा नहि॥४३॥ भो
आदौ शून्यगतः पृच्छेत्पश्चात्पूर्णे विशेद्यदि॥ तदा सर्वार्थसि
द्धिः स्यादिति जानीहि निश्चितम्॥४४॥ गर्भप्रश्ने यदा दूतः पूर्णे
पुत्रः प्रजायते॥ शून्ये कन्या युगे युग्मं गर्भपातश्च संक्रमे॥४५॥

अथ गर्भप्रश्ने स्वरबलमाह॥ गर्भप्रश्नेति। वामे दक्षिणे पूर्णे वहति सति उभयोर्वा
मार्गतो दूत इत्यादिलक्षणेन पूर्णागतः सन् पृच्छति अस्मिन् गर्भे पुत्रः पुत्री वा
भविष्यतीति तदा पूर्णे सति अस्मिन् गर्भे पुत्रो भविष्यति शून्यगतश्चेत्पृच्छति
तदास्मिन् गर्भे कन्या भविष्यतीति वदेत् युगे युग्ममिति आदौ पूर्णगतेन प्रश्नः कृ
तः पश्चाच्छून्यगतो भवति तदा युगे युग्मं वदेत् एकः कन्या एकः पुत्रः पश्चात्पुत्री
आदौ शून्यगतः पश्चात्पूर्णगतो भवति तदापि युग्मं आदौ कन्या पश्चात्पुत्रः इदं
वक्तुं स्वराभ्यासिनः सामर्थ्यं न तु पठनमात्रेण गम्योऽर्थः गर्भपातश्च संक्रमे
वामाद्वा दक्षिणे वा पूर्णे वहन् पश्चादन्यपुटाति क्रमति इति संक्रमणकालं
विज्ञाय गर्भप्रश्ने जातकस्य मातुर्मरणं वदेत् गर्भपातो वा॥४५॥

आयाति वा रणे यां पस्त्वंगे वामे सुखं स्थितो॥ प्रयाति प
वनेऽन्यत्र गमन इत्यनलं वदेत्॥४६॥ उदयं चंद्रमा
र्गेण सूर्ये स्यात् गमनं यदि॥ तदाति गुणसंघातं विप
रीते च विघ्नता॥४७॥

अथान्यदागमप्रश्ने आयातीति अथ दूरगतस्यागमनप्रश्ने गमनस्य
स्य पूर्णशून्यविचारेण शुभाशुभं ज्ञात्वा पश्चाद्गमनं वा निवर्तनं वा व
देत् यदि इडानिले वामे वरुणतत्त्वं वहति तदा मासेन पान्थ आगमिष्यतीति व
त्रैवास्ते सुखं स्थितो पृथ्वीतत्त्वे वहति तत्रैव सुखमास्ते इति वदेत्
वायौ तत्त्वे वहति पान्थोऽन्यत्र गतस्तस्मादिति वाच्यः अनले तत्त्वे वहति पां
थो लेन रणे शुभाशुभं भाषितं वा शकुनादि
पान्थ इति वाच्यं आगापि पूर्णशून्ये अथान्यद्वामदक्षिणयोः फलमाह॥ उदयश्चं
ज्ञात्वा मरणं वदेत्॥४६॥ यद्युदयः सूर्यस्येति शेषः सूर्ये स्वरे वहति
दक्षमार्गेणेति वामस्वरे वहति विपरीते च विघ्नता सूर्ये वहति
अस्तमयः तदा गुणानां संघातो जायते तदा च वहति विघ्नानि भवन्ति अथ वाम
सूर्योदयः चन्द्रे वहति सूर्यास्तमनं तदापि बहुविघ्नता अथ वामस्वरे चन्द्रे वहति सूर्या
र्येस्ते चोदयास्तमने भवतस्तदापि बहुविघ्नता॥४७॥
स्तमयोदयौ तस्तदापि बहुविघ्नता

॥ न॰ ज॰
ज॰ टी॥

॥ ॥२५॥

२८

अथान्यदाह पक्षेति । वामदक्षिणस्वरवशात् उक्तशुभे पक्षे तो यदा
शुभपक्षता भवति उदयं चंद्रमार्गेण सूर्येनास्तमनं यदि तिशुभप
क्षमतिक्रम्य विपरीतपक्षमाश्रित्य यदुदयास्तमयौ पक्षमतिक्रम
ण तदा व्याधिः स्यात् पक्षद्वयमतिक्रम्य इष्टनाशनं पक्षत्रयमतिक्रम्य
मरणं ॥४८॥ अथ पृथिव्यादितत्त्वानां ज्ञानमाह ॥ वामे वा दक्षिणे वापीति
पृथ्वीतत्त्वं अष्टांगुलदीर्घं वहति तत्र कर्तव्यता स्वराभ्यासी षोडशांगुलं
शंकुं हस्ते कृत्वा स्वराभ्यासं कुर्यात् वामे वा दक्षिणे वा वहति तत्र नासा
पुटसंलग्नं शंकुं कृत्वा परीक्षेत किं तत्त्वं वहति अष्टांगुलसीमामागंय
दि वायुः संचरति तदा पृथ्वीतत्त्वं एवमपरेषां विचारात् ज्ञानात्
न्वदेत् ॥४९॥ अथ पुनः प्रश्ने पुष्टिमनो विषयेष्ट तत्त्वज्ञो वर्णज्ञा

पक्षतोतिक्रमाद्व्याधिर्द्विपक्षादिष्टनाशनम् ॥
पक्षत्रयमतिक्रम्य जायते मरणं ध्रुवम् ॥४८॥
वामे वा दक्षिणे वापि धराष्टांगुलदीर्घिका ॥
षोडशांगुलमापः स्युस्तेजश्च चतुरंगुलम् ॥४९॥
द्वादशांगुलदीर्घः स्याद्वायुर्व्योमांगुले नहि ॥४९॥
पृथ्वी पीता सितं वारि रक्तवर्णो धनंजयः ॥ मारु
तो नीलजीमूतमाकाशो वर्णपंचकम् ॥५०॥ पीत
वर्णं चतुष्कोणं लमध्यं पृथ्वीपुरम् ॥ वमध्यं वृ
दलाकारं श्वेतं वारुणमंडलम् ॥५१॥

नार्थं पृथिव्यादीनां वर्णमाह ॥ पृथ्वी पीतेति प्रश्नविषये तत्तत्पृथिव्या
दिवर्णेन वर्णं वदेत् सुगमं ॥५०॥ अथाचार्यः पंचतत्त्वानां भेदनामा
न्याह ॥ पीतवर्णं चतुष्कोणमिति । पंचतत्त्वस्य पृथक्कथनेन आगमेषु
ज्ञाः पटलवहे वर्णैर्मंत्रबीजमुक्तं अत्र पार्थिवादिपंचतत्त्वरूपेण
पुंजेति प्रश्ने किल पत्रपत्रेति तत्र तत्र स्वरूपे शब्दं उत्तरं दद्यात् ॥
अत्र प्रश्ने चिंतितादिप्रश्ने पृथ्वीतत्त्वेन पीतवर्णं चतुष्कोणं वक्तव्यं व
देत् ॥ जलतत्त्वेन षट्कोणं श्वेतवर्णं वदेत् ॥ रक्तां भत्रिकोणं वह्नित
त्त्वेन ॥ अष्टकोणं हरितं वायुतत्त्वेन वदेत् ॥ धूम्राभं वर्तुलं व्योमत
त्त्वेन वदेत् ॥ अन्यदपि यत्र यादृशी बुद्धिर्घटते स्फुरति तत्र स्वबुद्ध्या
प्रश्नोत्तरं दद्यात् ॥ अन्यच्च योगशास्त्रे वामदक्षिणे चंद्रसूर्यस्वरयो
भेदेन शरीरमुक्तं ॥ सर्वेषामेव जंतूनां नाड्यां तिष्ठति चंद्रमाः ॥ अधो
भागे रविः सोमो दृश्यकाले विवर्जयेत् ॥ योनिः स्त्रीणां भवेच्चंद्रो न
धारणं सूर्य उच्यते उभौ तौ सृष्टिसंहारौ जंतूनां नाड्यंशः ॥ सुगमो ना
त्वं तिके प्रयोजनिकौ ॥ ५२ ॥

रेफयुक्तं त्रिकोणं च रक्तमेवं वह्निमंडलम् ॥ अष्टपत्रं च
मध्यस्थं हरितं वायुमंडलम् ॥ ५२ ॥ समध्ये वर्तुलाका
रंध्रग्रामे व्योम मंडलं ॥ पंचतत्त्वे ष्वभेदो यं कथितः
सर्वसूरिभिः ॥ ५३ ॥ मारणं मोहनं स्तंभं विद्वेषोच्चाटनं
वशं क्षेरणं कर्षणं स्तोभं भानुनाड्युदये कुरु ॥ ५४ ॥
शांतिकं पौष्टिकं क्षेमं दिव्योषधि रसायनम् ॥ योगा
भ्यासादिकर्माणि तत्सर्वाणि निशाकरे ॥ ५५ ॥ चंद्र
सूर्यस्वराभ्यासं ये कुर्वंति सदा नराः ॥ अतीतानाग
तं ज्ञानं तेषां हस्तगतं सदा ॥ ५६ ॥ इति पा० सूक्ष्म
स्वरोदय प्र० इति श्री ब्रह्मयामलीयस्वरोद
ये हंसचारो नाम द्वितीयोध्यायः ॥ २ ॥ ॥
भेदा ये स्वरपंचके निगदिता नैः सर्गिकाः कालजाः ॥
तेषां बालकुमारयौवनजरा नेधन्यवस्थारूपा ॥
तान् जानंति गुरूपदेशविधिना भेदप्रभेदं स्वयं ते ॥
जानंति फलं शुभाशुभमयं कालत्रये निश्चितम् ॥ १ ॥
॥ इदं प्रथमं मंगलम् ॥ २ ॥

॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ इति पाठक श्रीहरिवंशात्म
ज महादेव विरचितायां नरपतिजयचर्याटीकायां जयलक्ष्म्यां हं
सचाराध्यायो द्वितीयः ॥ २ ॥ भेदा ये स्वरपंचकेति ॥ १ ॥
॥ शुभम् ॥ ॥ इति प्रथममंगं समाप्तम् ॥ ॥ शुभम् ॥

अथातः संप्रवक्ष्यामीति॥ अथातोऽनन्तरमर्थे हंसचारानन्तरं सर्वतोभ
द्रनामचक्रं प्रवक्ष्यामि किं विशिष्टं त्रैलोक्यदीपकम् दीपवद्दीपकं त्रैलो
क्यं दीपयति प्रकाशयति घटपटादिवत् त्रैलोक्यदीपकं विख्यातं लोकप्र
सिद्धं तेन च दीपदेशव्याप्ति सद्यः प्रत्ययकारकं विचार्यमाणं शुभाशुभकप्रती
तिकारकं॥ १॥ अथ चक्रन्यासमाह॥ ऊर्ध्वगा दश विन्यस्येति सुगमम्॥२॥
अकारादीति चक्रं प्राङ्मुखोपविश्य लिखेत् तेऽत्र स्थे तत्र स्वरा अकारादिश्चः
पर्यन्ताः स्वरा लेख्याः कुत्रेत्याकांक्षया ईशादौ विदिशि क्रमात् तत्र क्रमः अकार
ईशानकोणे आकार आग्नेये इकारनैरृत्ये ईकारो वायव्ये पुनरुकार ईशानकोणे
अकारस्याधः ऊकारस्त्वाग्नेये आकारस्याधः एवं षोडशस्वरान् ईशानादिचतु

अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम्॥ विख्यातं स
र्वतोभद्रं सद्यः प्रत्ययकारकम्॥ १॥ ऊर्ध्वगा दश विन्यस्य
तिर्यग्रेखास्तथा दश॥ एकाशीतिपदं चक्रं जायते नात्र सं
शयः॥ २॥ अकारादिस्वराः कोष्ठे ईशादौ विदिशि क्रमात्॥
सृष्टिमार्गेण दातव्याः षोडशैवं चतुर्भ्रमं॥ ३॥ कृत्तिकादीनि
धिष्ण्यानि पूर्वाशादि लिखेत्क्रमात्॥ सप्त सप्त क्रमादेतान्य
ष्टाविंशतिसंख्यया॥ ४॥ अवकहडादिषु प्राच्यां मटपर
ताश्च दक्षिणे॥ नयभजखाश्च वारुण्यां गसदचलाश्च सोमरे॥ ५॥
त्रयस्त्रयो वृषाद्याश्च पूर्वाशादिषु धीः क्रमात्॥ राशयो द्वादशै
वं तु वृषाद्याः सृष्टिमार्गतः॥ ६॥ ॥ ९९॥

कोणे ष्वेव विन्यसेत् एवं लिख्यमानेषु स्वरेषु सृष्टिमार्गेण चतुर्भ्रमं चतुरावृ
त्त्या स्वरलिखनं स्यात्॥ ३॥ स्वरलिखनानन्तरं नक्षत्रलिखनमाह॥ कृत्तिकादीनि
ति स्वरलिखनकोष्ठकान्तम् चतुर्दिक्षु सप्त सप्त लिखेत् यथा तत्र पूर्वस्यां प्रथम
पंक्तौ सप्त ७ तदधः पंक्त्यां तु न तदधो यः कोष्ठस्तदधः एवं कोष्ठकं एवं चतुर्दि
क्षु कोष्ठका उद्भूता दातव्याः॥ तत्र प्राक् सप्त कृत्तिकादीनि लिखेत्॥ मघादि सप्त
दक्षिणस्यां लिखेत्॥ मैत्रादि सप्त ७ पश्चिमायां लिखेत्॥ धनिष्ठादि सप्त उत्तरस्यां
लिखेत्॥ ४॥ अथ नक्षत्राधः कोष्ठलिखनमाह॥ अवकहडेति अवकहडाः
पंच वर्णाः नक्षत्राधः पंच कोष्ठकेषु प्राच्यां लिखेत्॥ मटपरताः पंच दक्षिणे
पंच वर्णा नक्षत्राधः पंच कोष्ठे लिखेत्॥ नयभजखाश्च वर्णान् पश्चिमनक्षत्राधः पंच को
ष्ठे लिखेत्॥ गसदचलान् पंच वर्णान् उत्तरनक्षत्राधः कोष्ठे लिखेत्॥ ५॥ पूर्वा
शादितृतीयपंक्तौ त्रिकोष्ठे लिखनीयमाह॥ त्रयस्त्रयो वृषाद्येति॥ वृषादित्रीन्
राशीन् पूर्वादिकोष्ठे लिखेत्॥ सिंहादित्रीन् दक्षिणकोष्ठे लिखेत्॥ वृश्चिका
दित्रीन् पश्चिमायां लिखेत्॥ कुम्भादित्रीन् उत्तरस्यां लिखेत्॥ ६॥
अथ शेषेषु लिखनीयमाह॥ शेषेष्विति॥ शेषेषु चतुर्दिक्षु उद्धृतेष्वेकैकेषु चतुः
कोष्ठेषु सैकमध्यकोष्ठेषु तिथ्यन्तादि तिथिपंचकं क्रमेण लिखेत्॥

॥नं॰॥ज॰॥
ज॰ टी॰॥
॥२७॥

27

प्रतिपत्पूर्वकोष्ठे लिखनीया द्वितीयादक्षिणकोष्ठे तृतीयापश्चिमे
चतुर्थी उत्तरे पंचमीमध्ये एवं षष्ठ्यादि नन्दापंचकं पूर्वाशादिलिखेत्
तथैकादश्यादिपंचकं पूर्वाशादिलिखेत् एवं कृते पंचमीदशमीपू
र्णिमेति त्रिपूर्णमध्ये लिखिता भवंति वाराणमिति भौमादिक्रमे
ण वाराणां सप्तकं लेख्यं वारलिखनं नंदादितिथिना सार्द्धमुक्तं तेन किं
येषु कोष्ठेषु नंदादयो लिखितास्तेष्वेव भौमादीन् लिखेत् तत्रच भौ
मं नन्दाख्ये लिखेत् बुधं भद्राकोष्ठे लिखेत् गुरुं जयाकोष्ठे लिखेत्
शुक्रं रिक्ताकोष्ठे लिखेत् शनिं पूर्णतिथिकोष्ठे लिखेत् पुनः रविं भौमे
न सह चंद्रं बुधं भद्राकोष्ठे लिखेत् वारान् लिखेत् सर्वतोभद्रसंपूर्ण

शेषेषु कोष्ठकेष्वेवं नन्दादितिथिपंचकम्॥ वाराणां
सप्तकं लेख्यं भौमादित्यक्रमेण च॥७॥ भौमादित्यौ
च नंदायां भद्रायां बुधशीतगू॥ जयायां च गुरुः प्रोक्तो रि
क्तायां भार्गवस्तथा॥८॥ पूर्णायां शनिवारश्च लेख्यं
चक्रे त्र निश्चितं॥ इत्येवं सर्वतोभद्रविस्तारः कीर्ति
तो मया॥९॥ ऊर्ध्वदृष्टिश्च भौमार्कौ ३।१ केकरौ बु
धभार्गवौ ४।६ समदृष्टिश्च जीवेंदू ५।२ शनिराहु
७।८ अधोदृशौ॥१०॥ नीचस्थितोर्ध्वदृष्टिश्च उच्चैरधो
निरीक्षते॥ समश्च पार्श्वतो दृष्टिस्त्रिधा दृष्टिः प्रकथ्यते॥११॥
शान्यर्कराहुकेत्वाराः क्रूराः शेषाः शुभग्रहाः॥ क्रूरयुक्तो बुधः
क्रूरः क्षीणश्च चन्द्रश्च पापे वेच॥१२॥ यस्मिन्नृक्षे स्थितः खेटस्त
तो वेधत्रयं भवेत्॥ ग्रहदृष्टिवशेनात्र वामसन्मुखदक्षिणे॥१३॥

भवति तथाच कविरेवाह॥ इत्येवं सर्वतोभद्रप्रस्तारः कीर्तितो मया॥
पूर्वशास्त्रानुसारेण यथोक्तं ब्रह्मयामले सुगमम्॥७॥८॥९॥१०॥
॥११॥ अधुना चक्रविचारणाय ग्रहाणां क्रूरसौम्यविभागमाह॥
शान्यर्कराहुरिति सुगमं॥१२॥ अथ ग्रहदृष्ट्या वेधविचा
रमाह॥ यस्मिन्नृक्षेति ग्रहस्थितनक्षत्रात् ग्रहदृष्ट्या वेधत्रि
तयं भवति यतो ग्रहाणां त्रिविधा दृष्टिः एकया दृष्ट्या सन्मुखं
विध्यति एकया दक्षिणे विध्यति एकया वामे विध्यति॥१३॥

कुघ
५८

	अ	कृ	रो	मृ	आ	पु	पु	श्ले	अ	
	भ	उ	अ	व	क	ह	ड	ऊ	म	
	अ	ल	लृ	२	३	४	लॄ	म	पूफा	
	रे	च	१	ओ	१ मं ६ शु ११	औ	५	८	उफा	
दूप ने	उभा	द	१२	४।९ १४ शु	५ श १० १५	३ बु १२ चं	द	प	ह	पूव लो८
	पूभा	स	११	अः	३।८ १३ गु	अं	७	२	चि	
	श	ग	ए	१०	९	८	ऐ	त	स्वा	
	ध	ॠ	ख	ज	भ	य	न	ॡ	वि	
	ई	श्र	अ	उषा	पूषा	मू	ज्ये	अं	इ	

मध
मह

भुंक्त भोग्यं तथा क्रांतं विद्धं क्रूरग्रहेण भं ॥ शुभाशुभेषु कार्येषु
वर्जनीयं प्रयत्नतः ॥२४॥ वक्रगे दक्षिणा दृष्टिर्वामदृष्टिश्च
शीघ्रगे ॥ मध्यचारे तथा मध्या ज्ञेया भौमादिपंचके ॥२५॥

॥२४॥ यथा त्रिविध दृष्ट्या त्रिविधो वेधस्तां लक्षणमाह ॥ वक्रगे दक्षिणेति ॥
एकैकस्य त्रिविधा दृष्टिर्भौमादीनां पंचानां भवति यतो भौमादयः पंच वक्रि
णो भवंति शीघ्रगा भवंति वामगा भवंति अतस्त्रिविधया दृष्ट्या त्रिविधो वेधः ॥
शाकलीके वेधत्रयं भवेत् इत्यत्र विशेषः ग्रहः सव्यापसव्येन चतुष्टा वेधयेत्पुनः ॥
अरत्नातरस्वरादीन् तु सन्मुखेनान्यमंतरमिति एके आचार्याः सव्यापसव्येन चतुष्टा न
लत्रवर्णस्वरादीन्वेधयेत् सन्मुखेनग्रहोऽत्यभं नक्षत्रमेव विध्येत् तथा चास्मिन्नर्थे र
णहलि संज्ञग्रंथे श्लोकाः वेधमेवं कथयति यन्त्रयुग्मं तथा उ च कन्यां स्वाति मेव च ॥
अश्विनी रोहिणी संख्या अभिजितं हंति पापकः कंकुलीरं हरिं पंच चित्रां मलं
च रेवती सौम्यस्या हंति पापात्मा वैरूपं च पुरःस्थितमि त्यादि सर्वत्रावगंतव्यं ॥२५॥

न॥ज॥
ज॥दी॥
॥२८॥

28

अथाचार्यो ग्रहगतिं तं विना ग्रहाणां मंदशीघ्रवक्रगतिलक्षणमाह॥ सूर्य
मुक्ता उदीयंतु इति अथ मतो रविमंडलगता अस्तमयंति ततो रवेर्मुक्ता उ
दयंति ग्रकोत्र अर्ककांतराशितो द्वितीयस्था ग्रहाः शीघ्रगाः शीघ्रगतयो
भवंति अर्कोत्तृतीयगत तृतीयराशिस्थाः समाः समगतयः भानावर्के च
तुर्थराशिस्थे मंदाभवंति समगतिभ्यो मध्यगतिभ्यो न्यूनागतिः अतो मंद
गतयः पंचमे षष्ठे सूर्ये ग्रहा वक्राः स्युः अर्थादर्के पंचमषष्ठराशिस्थे
भौमादयः पंचवक्रगतयो भवंति केचित्तु रवेः शकाशात् नगाष्टके सप्ता
ष्टमस्थाने अतिवक्रा भवंति नवमे दशमे वक्राः स्युः भानौ ग्रहाणां कुटि
लागतिर्जायते द्वादशैकादशे सूर्ये ग्रहाः शीघ्रगा भवंति एतेन वक्रशी
घ्रमध्यगत्या ग्रहाणां त्रिविधा दृष्टिर्भवति अतएवोक्तं वक्रगे दृष्टि

सूर्यमुक्ता उदीयंते सूर्यगास्तास्तगामिनः॥ ग्रहाद्वितीयगे सू
र्ये स्फुरद्विंबाः कुजादयः॥१६॥ समास्तृतीयगे ते या मंदा भानौ
चतुर्थगे॥ वक्राः स्युः पंचषष्ठेर्के त्वतिवक्राष्टसप्तमे॥१७॥ नव
मे दशमे भानौ जायते कुटिलागतिः॥ द्वादशैकादशे सूर्ये भज
न्ते शीघ्रतां पुनः॥ अदृश्यतां पुनर्लोके व्रजंत्यर्कगता ग्रहाः॥१८॥
राहुकेतू सदा वक्रौ शीघ्रगौ चंद्रभास्करौ॥ गतेरेकस्वभावत्वा
देषां दृष्टिस्त्रयं सदा॥१९॥ क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महा
शुभाः॥ स्युः सहजस्वभावस्थाः सौम्याः क्रूराश्च शीघ्रगाः॥२०॥

दृष्टिरित्यादि॥१६॥१७॥१८॥ अथ विशेषग्रहाणां विशेषगतिमाह॥
राहुकेतू सदा वक्राविति राहुकेतू सदैव वक्रौ स्वभावात् सदागतयः चंद्र
भास्करौ शीघ्रावेव एषां रविचंद्रराहुकेतूनां गतेरेक एव स्वभावः
रविचंद्रयोः शीघ्रैव गतिः राहुकेत्वोर्वक्रैव एकस्वभावजतेः सदा दृष्टित्रयम्
त्रिभिरेव दृष्टिभिर्वीक्षमसन्मुखदृष्टिरभिस्ते चत्वारः पश्यंति केवलं व
थायस्य गतिर्भवतस्तैवगत्या वेधो दृष्टिः तयो
वीमा दृष्टिः राहुकेत्वोर्वक्रा दृष्टिः वक्रत्वात् दक्षिणेन रविचंद्रौ सदैव शीघ्रौ तथा चरण
हलिः वक्रौ दक्षं केरलगत्या प्रथमं शीघ्रौ विध्ये दृश्यते गमसमस्तु नि
त्यं वक्रौ राहुकेतू रवींदू नित्यं शीघ्रौ
दाह॥ क्रूरा वक्रेति॥ सौम्या शीघ्रा दृश्यपातुल्यरूपो॥१९॥ अन्य
क्रूराः पापाः क्रूरदुष्टं कुर्वंति स्वभावोपि पापानां॥ सौम्याः शुभग्रहाः शुभ
मेव कुर्वंति ते च पापाः क्रूरास्वभावे शीघ्रा वलिष्ठाः स्युः क्रूराः शीघ्रा वलोज्झिताः॥
ति सौम्याः शुभाः यदि वक्रो भवति क्रूरा वक्रा यदि भवति तदा अतिपापेन क्रूरा भवं
तितदा महाशुभाः स्युरिति॥ सौम्याः शी

ग्रहा यदि स्युर्भवंति तदा सहजस्वभावस्था भवंति ये साहजिकस्वभावस्तत्र
स्थाः शीघ्रास्ते नो भवंति शुभं स्वभावेन कुर्वंति किंतु वक्राः संतो यथा तिशु
भं कुर्वंति तथा न एवं क्रूरा अशीघ्राः शीघ्रास्त यः स्वस्वभावेन स्थिता भवंति
मंगलस्य यः स्वभावः सः स्वस्वभावेन फलदायकः तथा च जातके वक्रिणः
शुभमहावीर्याः शुभा राज्यप्रदा नराणां पापा व्यसनं नराणां कुर्वंति वृथाटनं ॥
तथा स्वदशायां पुत्रवंधामयंति इतस्ततो भ्रमयंति ॥ २० ॥ अधुना वेधमाह ॥
अवर्णादिस्वराविति ॥ स्वरयुक्त आत्मा ययोस्तु स्वारविसर्गयोः तयोरपि वेधेन
द्वयोरपि वेधो ज्ञातव्यः । यतो ह्यवकारसहिताबुच्चार्येते अकारं विना तयोरु
च्चारणमशक्यम् ॥ २१ ॥ अथ वर्णवेधे विशेषमाह ॥ अथ चक्रे पवर्गीयब
कार उक्तः यवर्गीय सकार उक्तः सवर्गीयो षकारसकारो यदि कस्यापि

अवर्णादिस्वरे वैद्यावेकवेधे द्वयोर्व्यधः ॥ स्वरयु
क्तात्मनो वेधस्त्वानुस्वारविसर्गयोः ॥ २१ ॥ बवौ श
सौ षखौ चैव जञयो ङञो परस्परम् ॥ एकेन द्वितयं ज्ञे
यं शुभाशुभखगव्यधे ॥ २२ ॥ घङछाः षणठाश्चैव ध
पूढास्त्वत्र आस्पदा । एतत्त्रिकं त्रिकं विद्धं विद्धे कपदमे
क्रमात् ॥ २३ ॥ घङछा [illegible] रोहिणीवेधे षणठा हस्तगे ग्र
हे ॥ धफढाः पूर्वाषाढायां पउत्राभाद्र उत्तरे ॥ २४ ॥ अव
र्णादिस्वरद्वंद्वे चैकवेधे द्वयोर्व्यधः ॥ युक्तस्वरात्मके वेधेत्व
॥ नुस्वारविसर्गयोः ॥ २५ ॥

नाम्नि पवर्गीयो बकारः तालव्यः शवर्गीयः वकारः कवर्गीयरखकारः स्यात्
तदैतेषां वेधस्त्वेकोऽन्यवेधस्य वेधे नैव वेधो ज्ञातव्यः ॥ २२ ॥ घङछाः षणठ
इति एते वर्णाः घङछादयो नक्षत्रचरणस्थाः घङछ आर्द्रा पुषणठह
स्त धुधमढपूर्वाषाढ द्युपउत्र उत्तरभाद्रपदा आर्द्राहस्तपूर्वाषाढोत्तरभाद्र
पदानां चरणवर्णाः तेषां मध्ये कपमह एव वर्णाः चक्रे निवेशिताः तेषां
वेधे अपरत्र यो वर्णवेधितो भवंति ॥ २३ ॥ तथा चाह ॥ घङछा रोहगे इति
आर्द्रानक्षत्रगते पापे शुभे घङछा वर्णा विद्धा भवंति हस्तस्थग्रहे षणठव
र्णा विद्धा भवंति पूर्वाषाढस्थग्रहे धफढा विद्धा भवंति उत्तराभाद्रस्थे पउ
ञो विद्धा भवंति ॥ २४ ॥ २५ ॥ कोणस्थेति अग्रचतुःकोणद्वयेन देवेत्य

कोणस्थाधिष्ण्ययोर्मध्ये त्र्यंत्यादिपादगे ग्रहे ॥
अस्वरादिचतुष्कस्य वेधः पूर्णतिथेः क्रमात् ॥ २६ ॥

स्वमिति तत्र ईशानकोणे भरणीकृत्तिके आग्नेये मघाश्लेषे नैरृत्ये विशा
खानुराधे वायव्ये श्रवणधनिष्ठे एषु कद्वयोर्द्वयोरंत्यादिपादगतयोर्न
हयोर्द्वयपाकोणस्थानां चतुर्णां वेधउत्पद्यते तथा पूर्णातिथीनां वेधः अ
त्राम्नायः भरणीकृत्तिकयोरायांतचरणस्थौ ग्रहः अ उ लृ ओ स्वरान्वेधय
ति आश्लेषामघायांतचरणस्थः आ ऊ लॄ औ स्वरान्वेधयति विशाखा
नुराधायांतचरणस्थः इ ऋ ए अं स्वरान्वेधयति श्रवणधनिष्ठायांतचर
णस्थई ॠ ऐ अः स्वरान्वेधयति चतुःकोणस्था पूर्णातिथीन्वेधयंति ॥

न-ज-॥
ज-ही-॥

॥२९॥

29

अथान्यव्याख्यानं अस्वरादिचतुष्कस्य वेधः अआइईएषां चतु
र्णां वेधः यतः एषां केनापि वेधो न संभवति उकारादीनां वेधो वर्ण
राशिभिः सह वेधो भवत्येव अत एषामवेधनव्याख्यानम् ॥ २६ ॥
अथ वेधफलमाह ॥ एकादिक्रूरवेधेति शन्यर्कराहुकेत्वारः पंचपापा
उक्ताः तेषामेकतमेपुंसां नाम्नः स्वरवर्णराशिनक्षत्रायेकतमेवेधे
उद्वेगो जायते उद्विग्नमना भवंति ॥ द्विग्रहवेधे भयं भवति ॥ परच
कादितः ॥ स्वचक्रादितो वा ॥ कस्मादपि भयं भवति ॥ त्रिग्रहवेधे भंगः
राजोदयः संग्रामात्पलायते ॥ अर्थवादे अर्थभंगः ॥ विद्यावादे विद्या
भंगः ॥ इत्यादि बोद्धव्यम् ॥ एकद्वित्र्यादिवेधकल्पना स्वरवर्णादा
वपि ॥ ग्रहेष्वपि विचारः ॥ स्वरवर्णनक्षत्रतिथिराशौ पंच पापग्रहा
णां समासमविचारेणोद्वेगादिफलं ॥ यदि एको वर्णादीनां मध्ये एकेन
ग्रहेण वेधफलदाउद्वेगः क्रियानपि द्विग्रहवेधे बहुद्वेगः एवंग्रह

एकादिक्रूरवेधेन फलं पुंसां प्रजायते ॥ उद्वेगश्च भयं हा
नि रोगो मृत्युः क्रमेण च ॥ २७ ॥ अतो भमोक्षे हानिः स्व
रे व्याधिर्भवति यो ॥ राशौ विद्धे महाविघ्नं पंचविद्धेन
जीवति ॥ २८ ॥ एकवेधे भयं युद्धे युग्मवेधे धनक्षयः ॥
त्रिवेधेन भवेद्भंगो मृत्युर्वेधचतुष्टये ॥ २९ ॥ ॥

संख्यया उद्वेगस्य विकल्पना तथा वर्णस्वराणां द्विवेधे द्विग्र्या
दिग्रहेण तथा भयमपि वदेत् एवं भंगादीनां ग्रयाणामेकादिग्रह
वेधेन स्वरवर्णादिषु तथान्यत्राधिकं वदेत् ॥ २७ ॥ यस्मिन्वेधे
ग्रहवेधे भमः स्थान राहित्यं तदेवोद्वेगः उद्वेगादपि भ्रमो भवति
वर्णे विद्धे हानिः कार्यादीनां हानिर्विषयादीनां वा स्वरे
व्याधिर्विद्धे सति भवति एवं चतुःपापविद्धे सति रोग
उक्तः चतुर्भिर्ग्रहैः स्वरे विद्धे व्याधिग्रस्तो भवति अत्र
विचारः एकादिवेधेन उद्वेगादयः उक्ताः ते न कि समुदायेनापि भवंति
चतुर्भिर्ग्रहैर्विद्धे स्वरे उद्वेगादि व्याधिपर्यंतं फलानि भवंति तिथौ वि
द्धे भयं पूर्वमुक्तं षाभ्यां वेधे भयम् द्विपापवेधे सति भयं वाच्यं अत्रापि
ग्रहवेधेन मृत्युः अत्र राशौ विद्धे महाविघ्नं महाविघ्नं मृत्युः पञ्चादुक्तं पंच
ग्रहवेधाद्विघ्नं मादेशं मृत्युरित्यर्थः पंचविद्धेन जीवति अस्याय
महाविघ्नमुक्तं तेन किं राशेः पंचपाप
मध्ये वर्णादीनां पंचानां वेधे सुतरां मृत्युर्भवति एवं प्रकारस्याभिप्रा
योराशेः पंचग्रहवेधादेव मृत्युरिति ॥ २८ ॥ विशेषमाह ॥ एकवेधेति
एकग्रहवेधे युद्धे भयमादेशं नान्यत्र युग्मग्रहवेधे धनक्षयः त्रिवेधे
संग्रामात्पलायते चतुर्ग्रहवेधे मृत्युः संग्रामे मृत्युर्भवति अत्रापि ग्रह
संख्या वर्णादिसंख्या विचारः कर्तव्य इति पूर्ववत् ॥ २९ ॥ ॥ ९१

अथ पापग्रहवेधवशात् शुभग्रहाणां वेधफलमादिशति । यथादुष्टफला
इति यथा एकादिक्रूरवेधे उद्वेगादिफलमुक्तं तथा एकादिशुभवेधे हर्षलाभसौ
ख्यादिभिः फलं कल्पयेत् अत्र क्रूरयुक्तो क्रूर एव भवति क्रूरफलप्रदः अन्यथा
युक्तो न्यथा शुभोपि शुभयुक्तो त्यर्थं शुभः अत्र यद्यपि नोक्तं पापशुभमिश्रितं फ
लं वदेत् न्यूनाधिक्यं ग्रहवशात् पापाधिके पापफलमधिकम् शुभाधिके शु
भफलमधिकम् ॥ ३० ॥ यथा भौमोक्तो ज्वरे हानिरित्यादि एकैकफलमुक्तं त
थारव्यादिवेधे एकैकफलमाह अर्कवेधे मनस्ताप इति अर्कवेधे सति मन
स्तापो भवति किमुक्तं भवति उद्गतोर्को नक्षत्रं विद्धे तेन अर्केन नक्षत्रे वि
द्धे मनस्तापो भवति उद्विग्नमनाः अन्तरे हानिरुक्ता तेन भौमेन विद्धे अन्तरे
विद्धे द्रव्यहानिर्भवति एवमुक्तं स्वरे व्याधिः तेन शनिना स्वरे विद्धे रोगवा
न्भवति राशौ विद्धे महाविघ्नं भवति अत्र राहुकेतू च विघ्नदौ तेन राहुकेतु

यथा दुष्टफलाः क्रूरास्तथा सौम्याः शुभप्रदाः ॥ क्रूरयुक्ताः पुनः सौ
म्या ज्ञेयाः क्रूरफलप्रदाः ॥ ३० ॥ अर्कवेधे मनस्तापो द्रव्यहानिश्च
भूसुते ॥ रोगपीडाकरः सौरी राहुकेतू च विघ्नदौ ॥ ३१ ॥ चंद्रेमि
श्रफलं पुंसां रतिलाभः शुभार्गवे ॥ बुधवेधे भवेत्प्रज्ञा जीवः
सर्वफलप्रदः ॥ ३२ ॥ सौम्यपापग्रहो हन्यान्नाम्नो व्याधिधन
क्षयः ॥ वेधे वैनाशिके तस्य त्रिवेधे चापशोभयम् ॥ ३३ ॥
स्वक्षेत्रस्य बलं पूर्णं ६० पादोनं ४५ मित्रभे गृहे ॥ अर्द्धं ३०
॥ समगृहे ज्ञेयं पादं शत्रुगृहे स्थिते ॥ ३४ ॥

भ्यां राशौ विद्धे महाविघ्नं मृत्युः ॥ ३१ ॥ अथ शुभग्रहविद्धफलमाह । चंद्रेमि
श्रफलमिति चंद्रवेधे सति मिश्रं फलं पापशुभं क्षीणचंद्रः पापयुक्तः क्षीणचं
द्रवेधे पापफलं पूर्णचंद्रवेधे शुभफलं शुक्रवेधे रतिक्रीडादिरूपा सौख्यं बु
धवेधे प्रज्ञा भवति हेयोपादेये विचारे यथार्थज्ञानं भवति जीववेधे सर्वशु
भफलं भवति अभिलषितं शुभं भवतीत्यर्थः कस्याभिप्रायोयं एकवेधेर्थ
नाशः स्थानभ्रंशस्त्रवेधे च नाशश्चोभयवेधेन पापाभ्यां निर्दिशेन्मृतिः ॥ ३२ ॥
अथ विशेषमाह ॥ सौम्यपापग्रहेति । शुभपापौ यदि नाम्नो वेधं कर्त्तनमेन
दात्र त्रयोविंशतिभं २३ नक्षत्रं वेधयतस्तदा व्याधिधनक्षयं भवति वैनाशि
कं सामुदायिकं संघातिकं च त्रिवेधे मृत्युः ॥ ३३ ॥ अथ यत्रस्थो ग्रहः स्वस्य
मध्याधिकं पापशुभं दशति तदाह ॥ स्वक्षेत्रस्य फलं पूर्णमिति ॥ स्वक्षेत्रे नवां
शादेक्काणे स्वगृहे बलं पूर्णं ज्ञेयम् ॥ मित्रभे मित्रराशौ नवांशे मित्र
द्रेक्काणे च एकेन पादेनोनं कोर्थः त्रिचरणं बलम् ॥ अर्द्धबलं सम
गृहे पादं बलं शत्रुगृहे स्थिते ज्ञेयं ॥ इदं सामान्यमुक्तं ॥ ३४ ॥ ॥ ॥

॥ इदं च सौम्यक्रूराणां बलं स्थानवशात्समम् ॥
एतदेव फलं बोध्यं सौम्यक्रूरे विपर्ययात् ॥ ३५ ॥

अथ विशेषमाह ॥ इदं च क्रूरसौम्यानामिति । स्वक्षेत्रस्य बलं पूर्णमित्या
दि बलं बुधगुरुशुक्रपूर्णचन्द्राणां स्थानबलं ज्ञेयं ॥ एतदेव बलं पापग्र
हाणां विपर्ययात् ज्ञेयं ॥ तत्र विपर्ययः शत्रुगृहे स्थिते पूर्णं पादोनं स
मवेश्यपनि ॥

30

स्यान्न वेधसम्भावो योगे यत्संख्यं जायते बलम् ॥
नेत्संख्यं वेध्यवल्लानां फलं ज्ञेयं विचक्षणैः ॥ ३६ ॥

आर्द्रं मित्रगृहे ज्ञेयं पादं पापे खश्मनि विपर्ययार्थः श्लोके नैव व्या
॥ ॥ ख्यातः ॥ ३५ ॥ ३६ ॥ ॥ ॥

॥ श्रीविघ्नहर्त्रे नमः ॥

शुभविचारमाह ॥ ग्रहाः क्रूरा इति क्षेत्रशब्देन स्थानमुच्यते फलं ज्ञात्वा फ
लं ब्रूयात् स्थानवेधे यथार्थफलः स्वगृहं स्थानं मित्रगृहं समगृहं शत्रुगृहमपि
समस्थानमपि तेन समस्थाने वक्रमार्गो च्चादिभे गृहं स्थानं वेधमिति क्षिप्र
तत्र व्याख्यायते स्वक्षेत्रस्थेन स्थानबलिना ग्रहेण विद्धेन क्षेत्रे वक्रत्वेना
धिकबलिनाग्रहे वेधे यस्य लग्नक्षमस्ति तस्य तेषु फलं भवति यथा रविणा
विद्धेन क्षेत्रे सिंहस्थेन स्वस्थानस्थेन मनस्तापः उक्तमनस्तापश्च रवेः फलं भ
वति सम्यक् पादफलं भवति स्वक्षेत्रस्थेन गुरुणा च विद्धे सति जीवः सर्व
फलमिति फलं केवलम् पापलोको मतिभ्रमः फलं भवति उद्वेगश्च भयं च भंग
श्च रोगश्च मृत्युश्च एते ग्रहाः फलं वाच्याः यस्मिन्यस्मिन्विद्धे भयादय उक्ताः ॥

ग्रहाः क्रूरास्तथा सौम्या वक्रमार्गोच्चनीचगाः ॥
स्थानं च वेधमित्येवं फलं ज्ञात्वा फलं वदेत् ॥ ३७ ॥
वक्रग्रहे फलं द्विघ्नं त्रिगुणं स्वोच्चसंस्थिते ॥ स्वभा
वजं फले शीघ्रे नीचस्थोर्ध्वफलो ग्रहः ॥ ३८ ॥ तिथि
राशिप्रशनक्षत्रे विद्धे क्रूरग्रहेण यत् ॥ सर्वं शुभं कार्यं
शुभं वर्जयेत्तत्र जत्नतः ॥ ३९ ॥ ननंदति विवाहे च या
त्रायां न निवर्तते ॥ न रोगान्मुच्यते रोगी वारवेलाक्र
तो यमः ॥ ४० ॥ वेधस्थाने रणे भंगो दुर्गे खंडिः प्रजा
यते ॥ कविप्रवेशनं तत्र योधघातश्च तत्र वै ॥ ४१ ॥
रोगकाले भवेद्वेधः क्रूरखेचरसंभवः ॥ वक्रगस्य भवे
न्मृत्युः शीघ्रयायी ऽजान्वितः ॥ ४२ ॥

तस्मिन्स्वक्षेत्रस्थेन ग्रहेण विद्धे भयादयः फलं वाच्याः स्वक्षेत्रस्थो यदि व
क्री फलं त्रिगुणं चतुर्भिः पादैः फलं द्विगुणं चतुर्भिः फलं मित्रस्थेन ग्रहे
ण विद्धे भयाद्युत्पत्तिः स्थाने तत्र भयादयः पादोना वाच्याः मित्रगेहगो भवे
त् मित्रगृहं तदुच्चं चेत् तदा नवगुणं भयादयो वाच्याः शीघ्रगानां स्वभा
वमेव फलं स्थानबलीयुक्तः शीघ्रः स्वगृहे फलं मित्रगृहे पादोनं समस्थादि
नीचमेवं फलमदः मित्रगृहे नीचगो भवति तदा शुभं साद्धं च रणं फलं भा
वति ॥ ३७ ॥ तथा च वक्रग्रहे फलं द्विघ्नमिति ॥ ३८ ॥ तिथिराशिप्रशन
क्षत्रमिति प्रश्नं भीमं तथा क्रौर्यं विद्धं पापग्रहेण भयम् शुभाशुभेषु सर्वे
षु वर्जनीयं प्रयत्नतः सुगमं ॥ ३९ ॥ ननंदतीति वेधवेलायां वेधकाले
कृतविवाहो ननंदति शुभं न याति यात्रायां न निवर्तते वेधसमये संग्रा
मादियात्रा न कार्या न रोगान्मुच्यते रोगी वेधकाले रोगो यदि जायते त
दानंतरं पापवेध उत्पद्यते ततो रोगी रोगान्मुक्तो भवति ॥ ४० ॥ तथा च
वक्ष्यति रोगकालेति सुगमम् ॥ ४१ ॥ वेधस्थानेति यत्र ग्रामादिस्थाने
वेधो भवति तत्र स्थितिं न कुर्यात् ग्रामादिस्थानस्य स्वरवर्णादिवेधे तत्र
ग्रामस्थाने स्थितिं न कुर्यात् क्षेत्रवेधे तत्र संग्रामं न कुर्यात् तस्माद्भंगो भ
वति पलायते ग्रामवेधे ग्राम स्वप्यते दुर्गं सर्वतोभद्रे वेधे स्थाप्य वे
धविचारयेत् यद्दिशि नक्षत्रवर्णराशिस्वरवेधस्तत्र खंडिर्भवति
दुर्गं भज्यते तथा वेधे यद्दिशि कविप्रवेशनं कुर्यात् योधघातश्च तत्र वै या
धनक्षत्रात् नक्षत्रपुरुषं लिखित्वा यत्रांगे नक्षत्रे सर्वतोभद्रे विद्धे भवति

॥ तत्र घातं कुर्यात् ॥ ४१ ॥

१ समगृहे अर्द्धफलं ॥ शत्रुगृहे नीचे चेत् पादफलं एवं स्वगृहेऽपि स्थानबलिनां ग्रहाणां
वक्रादिफलैः सहफलानि कथितानि वक्तव्यानि । ४३ ॥ ५ ॥

31

अथ चक्रविचारमाह ॥ यत्र पूर्वादीति ईशानस्थाइति । वृषमिथुनक
लीराः प्राच्यां तत्रस्थेरवौ प्राचीदिगलग्नमिता तिष्ठति ॥ सिंहकन्यातु
लात्रिषुराशिषु दक्षिणा लग्नमिता तिष्ठति । वृश्चिकधनुर्मकरा पश्चि
मायां तत्रस्थेरवौ पश्चिमा लग्नमिता तिष्ठति कुंभमीनमेषा उत्तरस्यां
तत्रस्थेरवौ उत्तरा दिग्लग्नमिता तिष्ठति ॥ ४३ ॥ ४४ ॥ नक्षत्रा
दिविशेषमाह ॥ नक्षत्राणीति अथ पूर्वस्यां अ उ लृ ओ ए ते स्वराः कृ
त्तिका रोहिणी मृगशिर आर्द्रा पुनर्वसु पुष्य आश्लेषा सप्त नक्षत्राणि
अवकहडाः पंचवर्णाः वृषाद्यास्त्रयः राशयः नंदा तिथयः लिप्यवः र
विभौमवासरौ एते वृषादित्रयमासिके रवावलग्नमिता तिष्ठति ॥

यत्र पूर्वादिकाष्ठायां वृषराश्यादिगो रविः ॥ सा दिशा ल
ग्नमिता ज्ञेया तिस्रः शेषाः सदोदिताः ॥ ४३ ॥ ईशानस्थाः स्व
राः प्राच्यां ज्ञेया आग्नेयगा यमे ॥ नैर्ऋत्यस्थास्तु वारुण्यां
वायव्यां सौम्यगा मताः ॥ ४४ ॥ नक्षत्राणि स्वरा वर्णा
राशयस्तिथयो दिशः ॥ ते सर्वे लग्नता ज्ञेया यत्र भानुः
त्रिमासिके ॥ ४५ ॥ नक्षत्रे लग्ने रुजो वर्णे हानिः शोकः
स्वरे लग्ने ॥ राशौ विघ्नं तिथौ भीतिः पंचानामरणं ध्रुवम् ॥ ४६ ॥
यात्रा युद्धं विवादं च द्वारं प्रासादहर्म्ययोः ॥ न कर्तव्यं शुभं
चान्यद् लग्नाशाभिमुखं नरैः ॥ ४७ ॥ अलग्नाशायां स्थितं
यस्य यदा नामायुमन्तरं ॥ तदा तु सर्वकार्येषु ज्ञेयो दैवह
तो नरः ॥ ४८ ॥ कूर्मकोटे तथा द्वंद्वे चातुरंगे महाहवे ॥
उद्यमो लग्नतैर्योधैर्वर्जनीयो जयार्थिभिः ॥ ४९ ॥ ॥

एवं चतुर्दिक्षु नक्षत्राणि स्वरवर्णराशयस्तिथयो दिशो लग्नता ज्ञेयाः ॥ ४५ ॥
अलग्नदिगस्थस्य पृथक्फलमाह ॥ नक्षत्रे लग्ने इति इदं विफलं पूर्वफलेन स
ह उद्वेगश्रमयमित्यादि सहमेलयित्वा फलं ब्रूयात् अस्यार्थो विल
दनुगलरोव ॥ ४६ ॥ अथालग्नमितायां दिशि क्रियानिषेधमाह यात्रा
युद्धमिति । अथ श्रेयांसि कुर्वीत उरभैर लग्नाशाभिमुखं यात्रा न कार्या यु
द्धं च न कार्यम् विवादो विद्याविवादः प्रासादस्य द्वारं गृहस्य च ए
तत्सर्वं अलग्नाशाभिमुखं न कुर्यात् ॥ ४७ ॥ अथान्यदलग्नमितफल
माह ॥ अलग्नाशायां स्थितमिति सुगमम् ॥ ४८ ॥ कूर्मकोटेति न
क्षत्राणि स्वरा वर्णा राशयो यस्य योधस्य अलग्नगता भवंति ते यो
धा अलग्नगता ज्ञेयाः तैरलग्नगतैर्योधैः किंचिद्वर्ज्यं कोटयुद्धं व
र्ज्यं द्वंद्वयुद्धं वर्ज्यम् ॥ विशेषाच्चातुरंगे महाहवे न तिष्ठेत् ॥ ४९ ॥
अथानंतरं नक्षत्रस्वरादीनामुदितानां फलमाह ॥ नक्षत्रे भ्युदिते इति ॥
अतो भ्युदिते शरीरपुष्टिः वर्णे लाभः नक्षत्रवर्णस्वरराशितिथि
षु पंचस्वुदितेषु पदाप्तिः राज्यादिपदप्राप्तिः स्यात् ॥ ५० ॥ ॥ ॥

अथ प्रश्नकाले वेधफलमाह ॥ प्रश्नकाले भवेदिति सुगमम् ॥ ५१ ॥ ग्रहैरविद्धे इति
यच्चरादिके लग्ने प्रश्नफलमुक्तं तद्देशिकेन ज्योतिर्विदा सर्वैर्ग्रहैरविद्धे ल
ग्ने तु फलं लग्नस्वभावतः फलं ज्ञेयम् लग्नस्य यः स्वभावः हृतनष्टादौ लाभाला
भे जयाजये रचेतुः १६ ग्रामार एप जलराशिस्वभावेन फलं ब्रूयात् ॥ अथ
चरादिके यत्फलमुक्तं तदाह चरलग्नोदये नष्टं दुर्लभं रोगी रोगी म्रियते ॥ जा
तस्यापि च तत्रैव स्वल्पमायुर्विनिर्दिशेत् ॥ स्थिरलग्नोदये नष्टं स्वल्पकालेन
लभ्यते ॥ तत्र रोगी चिराद्व्याधिर्दीर्घायुर्लब्धजन्मवत् ॥ नष्टस्य शीघ्रं लाभः
स्यात् रोगि शीघ्रं शोभनः ॥ मध्यायुर्लब्धजन्मा द्विस्वभावोदये पथ्यं निस्या
दि चरादिकेन गदितम् ॥ ५२ ॥ अथान्यत् क्रूरैरुभयतेति वेधस्त्रिविध

नक्षत्रेभ्युदिते पुष्टिर्वर्गे लाभः स्वरे सुखम् ॥ राशौ जयः
तिथौ तेजः प्रदीप्तिः पंचकोदये ॥ ५० ॥ प्रश्नकाले भवेद्वि
द्धं यल्लग्नं क्रूरखेचरैः ॥ तद्दृष्टं शोभनं सौम्यैर्मिश्रैर्मिश्र
फलं भवेत् ॥ ५१ ॥ ग्रहाभिन्नं तु यल्लग्नं फलं लग्नस्वभा
वतः ॥ ज्ञातव्यं देशिकेन्द्रेण भाषितं यच्चरादिकम् ॥ ५२ ॥
क्रूरैरुभयतो विद्धा यस्या नरतिथिस्वराः ॥ राशिर्धिष्ण्यं च
वर्गं चापि तस्य मृत्युर्न संशयः ॥ ५३ ॥ मंडलं नगरं ग्रामं दु
र्गं देवालयं पुरम् ॥ क्रूरैरुभयतो विद्धं विनश्यति न संशयः ॥ ५४ ॥
कृत्तिकादित्रिकाद्ये भे क्रूरविद्धे च कूर्मतः ॥ देशानाथिस्यदे
शाद्या विनश्यन्ति यथाक्रमम् ॥ ५५ ॥ ॥ ॥

उक्तः वामदक्षिणसम्मुखः उभयदिकस्थो वामेन विध्यति वामदृष्ट्या
उभयत्र वेधः एवं सम्मुखदृष्ट्या उभयदिकस्थो वेधयति अथवा दक्षि
णदृष्ट्या वा उभयत्र वेधः कस्यापि दिशि कस्मिन्नपि नक्षत्रे मध्यगति
र्ग्रहस्तिष्ठति तत्सम्मुखदिशि तन्नक्षत्रे समसूत्रस्य नक्षत्रेऽपरो मध्यग
तिर्ग्रहस्तिष्ठति तदा तयोः सम्मुखे वेधः एवं क्रूरैरुभयतो विद्धाः पंचव
र्णतिथिस्वरादयो यस्य मर्त्यस्य तस्य संग्रामे मृत्युः तथा जायते यथा मृ
त्युर्भवति ॥ ५३ ॥ मंडलं नगरमिति क्रूरैरुभयतो विद्धमिति एवमेव व्याख्या
तं आमेशाचक्रे वोद्धव्यं अपरं सुगमं वर्णादिपंचकमपि अत्रापि वोद्धव्यं
॥ ५४ ॥ अथान्यत्र वेधफलमाह ॥ कृत्तिकादीति कूर्मचक्रे कृत्तिकादित्रि
त्रिकाद्ये नक्षत्रे तदेकतमे यदि क्रूरैरुभयतो विद्धे सति नाभ्यादौ नवधा विभा
गोक्तदेशा विनश्यंति तत्र कृत्तिकादित्रिभं कूर्मनाभौ कृत्तिकादित्रिके क्रू
रैरुभयतो विद्धे कूर्मनाभिस्था देशाः संकेता मिथिला चंपा कोशांबि कौ
शिकी तथा ॥ आहिछत्रं गया विंध्यमंतर्वेदिः प्रमेखला ॥ कान्यकुब्जप्रयागश्च म
ध्यदेशो विनश्यतीति ॥ तत्रायमाम्नायः सर्वे देशा विनाशं न यांति किंतु कृत्ति
कादित्रिनक्षत्रे विद्धे नाभ्युक्तदेशानां मध्ये यस्य यस्य वर्णस्वरादयः पंच क्रूरैरुभ
यतो विद्धा भवंति स स देशो विनाशं याति अयं विचारः ॥ ५५ ॥ ॥

अथान्यवेधविषयविचारमाह ॥ कृत्तिकायामिति अयमर्थः समु
दायेन सर्वे धानकरोति देशे विद्धे तद्देशग्रामे विद्धे कृत्तिकादिचतु
ष्कविद्धेषु ब्राह्मणादीनां पृथक्‌नाम्नां वर्णादिपंचके विद्धे फलं वद
32 तु ॥ परंतु येयैर्ग्रहैः क्रूरैर्वेधं क्रियते समस्ते द्वादशारचक्रे तन्नक्ष
त्रराशिं पश्यति तदा फलं भवति इदमग्रे विशिष्योक्तमस्ति यग
यत्र पापविद्धे विनाशः तत्र शुभदृष्टे आप्यतां वक्तव्या ॥ भागेयं तथा
ज्ञेयं ब्राह्मणानां प्रकीर्तितम् उत्तरात्रितयं पुष्यं क्षत्रियाणां वि
निर्दिशेत् । रोहिणी मैत्रं मघा चैव श्रवणं स्यविशां स्मृतम् आदि
त्यमश्विनी हस्तं शूद्राणामभिजित्तथा विद्धैरेभिर्द्विजातीनां
कारुकाणां च शेषके इति ॥५६॥ अथान्यद्विषये क्रूरवेधविचारः ॥

कृत्तिकायां तथा पुष्ये रेवत्यां च पुनर्वसौ ॥
विद्धे सति क्रमाद्वेधो वर्णे ब्राह्मणादिषु ॥
॥५६॥ तैलं भांडं रसो धान्यं गजाश्वादि चतु
ष्पदं ॥ सर्वं महर्घतां याति यत्र क्रूरो व्यवस्थि
तः ॥५७॥ क्रूरवेधसमायोगे यस्योपग्रहसं
भवः ॥ तस्य मृत्युर्न संदेहो रोगाद्वा परतोपि
वा ॥५८॥ सूर्यभात्पंचमं धिष्ण्यं ज्ञेयं वि
द्युन्मुखाभिधम् ॥ शूलं चाष्टममंशोक्तं सन्नि
पातं चतुर्दशम् ॥५९॥ केतुरष्टादशोप्रोक्तो
उल्कास्यादेकविंशतो ॥ द्वाविंशतितमे कंप
को पोविंशे च वज्रकम् ॥ ६०॥ निर्घा
तश्च चतुर्विंशे उक्ताः प्रोक्ता ह्युपग्रहाः ॥ स्वस्था
ने विपन्नदाः प्रोक्ताः सर्वकार्येषु सर्वदा ॥६१॥

तैलं भांडमिति कुंभचक्रोक्त शनिदेशे देशे क्रूरग्रहवेधे च तैलं भांडं गजाश्वा
द्यादि विद्धे सति तद्देशे ग्रामे सर्वं महर्घं भवतीति बहुधनेनापि दुर्लभं
भवति शुभग्रहविद्धे समर्घं भवति स्वल्पधनेन यदृच्छं लभ्यते ॥५७॥ क्रू
रवेधेति ॥५८॥ अथोपग्रहमाह ॥ सूर्यभात्पंचममिति ॥५९॥ केतु
रिति ॥६०॥ निर्घातश्च चतुर्विंशेति स्वस्थाने इति स्वस्थानात् उक्तवेधं ग
जदंष्ट्रानुसारतः विद्युन्मुखादयो ह्युपग्रहाः सर्वदा सर्वकार्येषु वि
घ्नदाः परंतु स्थाने स्थानेऽनावता यत्र यत्रोपग्रहा भवंति तन्नक्षत्रं शुभका
र्ये वर्जनीयं एते उपग्रहाः स्वस्थानस्था गजदंष्ट्रानुसारेण वामदक्षि
णवेधं कुर्युः सन्मुखेन वेधयंति विद्युन्मुखो रविर्ज्ञेयः शूलश्चंद्रः
प्रकीर्तितः सन्निपातः कुजो ज्ञेयो बुधः केतुः प्रकीर्तितः उल्का ज्ञेया
सुराचार्यो वज्रो भार्गव उच्यते कंपः शनैश्चरो ज्ञेयो राहुर्निर्घात एव च
यद्येन वर्तते विद्धं प्रजातस्य तु कारयेत् एतेषां ग्रहत्वेन द्वादशार चक्रे
॥ दृष्टिरपि भवति ॥६२॥

अथान्यदाह जन्मभंकर्मेति जन्मनक्षत्रादिचक्रनक्षत्रं सार्वजनीनकं सर्वे
जनविषयं ज्ञेयं यतो जन्मनक्षत्रादि प्रोक्तं ॥ ६२ ॥ अथ विशेषमाह
जातिदेशेति ॥ ६३ ॥ अधुना तत्र नामानि तं जन्मभं जन्मनक्षत्रं दशमं के
र्मसंज्ञकमिति ६४ ॥ अष्टादशं च नक्षत्रमिति ॥ ६५ ॥ अद्भिभमिति मग
मम् ॥ ६६ ॥ अथैषामशुभयत्र वेधे फलमाह मृत्युः स्याज्जन्मभे विद्धे इति ॥ ६७ ॥
देशजेति उपग्रहसमायोगात् जननभे विद्धे मृत्युः कर्मभे क्लेश ए
व चेत्यादि प्रोक्तं नक्षत्रमुपग्रहयोगादवश्यं भविष्यतीति वाच्यम् ॥

जन्मभं जन्मनक्षत्रं दशमं कर्मसंज्ञकम् ॥ एकोन
विंशमाधानमेषां विंशं विनाशभम् ॥ ६४ ॥ अष्टा
दशं च नक्षत्रं सामुदायिकसंज्ञकम् ॥ सांघा
तिकं च विज्ञेयमृक्षं षोडशमग्रहात् ॥ ६५ ॥ अ
ड्रिभं राज्यभं प्रोक्तं जातिनामस्य जातिभं ॥
देशभं देशनामर्क्षं राज्यर्क्षमभिषेकभम् ॥ ६६ ॥
मृत्युः स्याज्जन्मभे विद्धे कर्मभे क्लेश एव च ॥
आधानर्क्षे प्रवासः स्याद्विनाशे बंधुविग्रहः ६७ ॥
सामुदायकभे निष्टं हानिः सांघातिके तथा ॥
जातिभे कुलनाशं च बंधनं चाभिषेकभे ॥ ६८ ॥
देशर्क्षे देशभंगश्च क्रूरैरेवं शुभैः शुभम् ॥ उपग्र
हसमायोगे मृत्युर्भवति नान्यथा ॥ ६९ ॥
भपंभंगश्च घातश्च मृत्युर्भं गोपुरस्थितैः ॥
क्रूरैरेकादिपंचांतैर्युधि वेधे फलं भवेत् ॥ ७० ॥

भैर्विद्धैः शुभं ॥ शुभाशुभैर्मिश्रं फलं जातिभं संहितायामुक्तमस्ति पूर्वा
त्रयं सानुलमग्नजातां राज्ञां तपुष्यैरथ महोत्तरास्ति ॥ सर्वोद्यमेषुं पि
तृदेवतं च राजावनेभं च ह्वकोवलो नाम ॥ आदित्यहस्ताभिजिद्
नीश्च वालिग्र जने स्थाम्यमुपागतासु सार्वविशारवाश्रवलेभरएय श्र
ड़ालजातेश्च निर्दिशं स्यादि जातिनक्षत्राणि वोद्धव्यानि जन्मादि
चक्रनक्षत्राणि नाडीसंज्ञकानि राज्ञो जात देशाभिषेकर्क्षे सभिः
सह नव नक्षत्राणि नाडीसंज्ञकानि नाडीनक्षत्रे विद्धे च शुभं किमपि
न कुर्वीत ॥ ६९ ॥ अथान्यत् ॥ भपंभंग श्चेति जन्मादिनक्षत्रे
एकादिपंचांतैः क्रूरैः पुरःस्थितैः सन्मुखवेधकारिभिर्विद्धे सति फ
लं वदेत् एकेन पापेन विद्धे भयं वदेत् द्वाभ्यां भंगः पलायनं त्रिभिर्घा
तः चतुर्भिर्बंधः पंचभिर्मृत्युः ७० ॥ अथ विद्धे सति कदा फ
लं तन्निर्णयमाह ॥ तिथिमक्षमिति ॥ धिष्ण्यादि पंचकं शुभो वेधयेत्
यद्दिने चंद्रः पंचकं विध्यति तद्दिने शुभं वदेत् ॥ धिष्ण्यादिपंचकं पा
पविद्धे चंद्रवेधे सति तद्दिने अशुभं वदेत् ॥ ७१ ॥

अथार्घं संप्रवक्ष्यामीत्यर्थं स्पष्टम् ॥७२॥ अथ देशकालवशात्
विषयवैधनिर्णयमाह देशःकाल इति वणिजामर्घे देशनिर्ण
यः कस्मिन्देशे समर्घं महर्घं पण्यं भविष्यतीति पण्यं विक्रयद्रव्यं
33 कालनिर्णयश्च कस्मिन्वर्षे समर्घं महर्घं अयने ऋतौ मासे वा
पण्यस्यापि निर्णयः वणिजां त्रयाणामेव निर्णयः ॥७३॥
अथ देशानां विभागमाह देशोथ मंडलमिति सुगमम् ॥७४॥
धातुर्मूलं चेति धातवः सुवर्णरजतादयः मूलं चन्दनागुरुजल
मांसि मुगंधतल्लादयः जीवश्च गजतुरगकस्तूरिकागोवृषभादयः

तिथिनक्षत्रं स्वरं राशिं वर्णं चैव तु पंचकम् ॥ यद्दिने वि
ध्यते चंद्रस्तद्दिने स्याच्छुभाशुभम् ॥७१॥ अथार्घं संप्रव
क्ष्यामि यदुक्तं ब्रह्मयामले ॥ एकाशीतिपदे चक्रे महर्घं च
शुभाशुभम् ॥७२॥ देशःकालस्तथा पण्यमिति त्रीण्यर्घ
निर्णये । चिंतनीयानि वेध्यानि सर्वकालं विचक्षणैः ७३॥
देशोथ मंडलं स्थानमिति देशस्त्रिधोच्यते ॥ वर्षमासो
दिनं चेति त्रिधा कालोपि कथ्यते ॥७४॥ धातुर्मूलं च
जीवश्च इति पण्यं त्रिधा मतम् ॥ अथ त्रिकत्रिकस्यास्य
वक्ष्यामि स्वामिखेचरान् ॥७५॥ देशेशा राहुमंदेज्या मं
डलस्वामिनः पुनः । केतुसूर्यसिताः स्थाननाथाश्चंद्रारचं
द्रजाः ॥७६॥ स्थाने

यतः वणिजां लाभार्थं स्वस्वसामर्थ्येन पण्यक्रयक्रयणं पण्यं विक्रे
तव्यं वा तत्र पृच्छन्ति वणिक् कस्मिन्देशे कस्मिन्काले वा धात्वादि
पण्यं समर्घं महर्घं वा भविष्यतीति विचार्य कथय गच्छ वा राजाद
यः पृच्छन्ति राजा च कस्मिन्स्थाने कस्मिन्काले दुर्गादिकं महत्करिष्ये
अन्ये च कस्मिन्देशे कस्मिन्काले मया जीवनार्थं गंतव्यं वासो वा क
र्त्तव्य इति बहुधा वक्ष्यो विकल्पनाः संति ॥७५॥ अथ देशादी
नां त्रित्रिकानामधिपतीनाह ॥ देशेशा राहुमंदेति ॥ राहुशनिबृह
स्पतयो देशाधिपाः यथा देशो गौडः मुक्तिः मंडलं तत्र लक्षणाव
ती स्थानं किं रत्नपुरम् अत्र देशेशा उक्ताः सामान्यतः सर्वदेशाधि
पतयः देशराशिवशान्नाधिपतयः तथा स्थानकालयो रवि
मंडलाधिपाः केतुसूर्यशुक्राः स्थानाधिपाश्चंद्रभौमबुधाः ७६॥
अथ त्रिधाकालाधिपतीनाह वर्षेशेति ॥७७॥ धात्वीशा शौ
रिपालारा इति ॥ अत्रापि स्वभावतोधिपतयः न तु तत्तद्राशिवशा
त् ॥७८॥ पंगहाराद्विति संज्ञामात्रयोजनं न तु स्वभावतः ७९॥

अथ ग्रहाणां वलेनाह सितेंद्विति देशेशाराहुमंदेज्या इत्यारभ्य मुग्धमा
र्या: ॥ ८० ॥ देशानां नाथा: पृथक् उक्ता: कस्यापि त्रयोधिपतय: कस्या
पि द्वौ कस्यापि चत्वार: किं समुदायेन भवंति कालवशाद्वा वलवशाद्वा
अधिपतय: इत्याशंक्य विचारमाह ग्रहो वक्रोदय इति देशेशाराहु

वर्षेशाराहुकेत्वार्कीजीवो भासाधिप: पुन: ॥ भौमार्कसंसिता
नेया चंद्र: स्याद्दिवसाधिप: ॥ ७७ ॥ धात्रीशा: सौरिशाला
राजीवे शासेंदुस्तेरव: ॥ म्लेशाकेतुशुक्राकीं इति परम्पा
धिपा ग्रहा: ॥ ७८ ॥ एवं ग्रहाराहुकेत्वर्कजीवबुधसितामृ
ता: ॥ स्त्रीग्रहो शुक्रेशाशीनो सौरिसोम्यो नपुंसकौ ॥ ७९ ॥
सितेंदुसितवर्लेशौ शौरज्ञेशो भौमभास्करौ पीतोसौम्यगु
रुकुद्भाराहुकेत्वर्कजामता: ॥ ८० ॥ ग्रहो वक्रोदये स्वांशो
उदये च वलाधिक: ॥ देशादीनां समेके क: स्वामी स्वेदस्वधामत: ॥ ८१ ॥
वक्रोच्चग: स्वगृहस्थो पूर्णवीर्यो ग्रहो भवेत् ॥ मेषो वृषो मृ
ग: कन्याकर्कमीन तुलाधरा: ॥ ८२ ॥ आदित्यादि ग्रहो
चास्थुनी च पंचस्य सप्तमस्य ॥ परमो च्चादिशेरामी ३ अ
ष्टाविंशा स्तिथीद्विया: ॥ ८३ ॥ सप्तविंशा स्तथा विंशा: स्व
र्यादीनां तथांशका: ॥ परमो नास्यरंनीचमथ चक्रांतसे
स्यथा ॥ ८४ ॥ उच्चान्नीचाच्च यत्तुर्यं संमस्थानं तदुच्य
ते ॥ तद्ग्रहस्थगे खेटे वलं त्रैराशिकं मतम् ॥ ८५ ॥ उच्च
स्थे च वलं पूर्णं नीचांशस्थे वलं दलम् ॥ स्वक्षेत्रस्थे बलं
पूर्णं पादोनं मित्रमेदहे ॥ ८६ ॥ ॥ ॥ ॥

मंदेज्येत्यादिषु यो वक्री भवति उदितो भवति स्वांशे य: स्थित: यत्र कुत्र
चिद्राशौ स्वगृहे स्वोच्चे इत्यादि लक्षणेन षड्वलेनापि यो भवति त्रयाणां
मध्ये वेक देशादीनां तत्काले धिपति: कल्प्य: अग्रे अन्यो यदि वली भविष्य
ति तदा स एव कल्प्य: इत्यादिना अधिपविचार: ॥ ८१ ॥ अथ पुनर्वलं वि
चारयति वक्रोच्चग: स्वगृहस्थो इति स्वगृहे पूर्णवीर्य: वक्री पूर्णवीर्य:
उच्चग: पूर्णवीर्य: तत्रापि यदि वक्री तदाप्यधिकवल: उच्चस्थानाद्ग्र
गे पृष्ठस्थे वा त्रैराशिकेन वलं कल्प्यम् ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ अ
थ पुनर्वलविचारमाह उच्चसंस्थे वलं पूर्णमिति नीचराशौ नीचनवां
शे अर्द्धं वलम् किं वहुव्याख्यानेन जातकोक्तवलविचारेण जात
कपद्धति वलविचारेण स्थानदिक्कालनिसर्गचेष्टादृग्भेदेयोव
लविचार: स्वोच्च स्वगृह नवांश मित्रवर्गवलविचारेण यो वली
त्रयाणां भवति स नाथ: कल्प्य: द्वावपि वलिनौ तदा द्वावपि नाथौ
स्यातां वलाधिक्यात् त्रयो पि स्यात्स्यु: वलेन देशाधिनाथं ज्ञात्वा फ
लं वदेत् ॥ ८६ ॥ ॥

34

॥ ८७ ॥ अधुनाफलविचारः॥ एवं देशाधिनाथा इति॥ एवमिति॥
वक्ष्यमाणादिफलविचारे देशादीनां ये नाथा वर्तमानकाले भवंति
ते ग्रहवेधे व्यवस्थिताः कोर्थः वामसव्याग्रदक्षिणदृष्ट्या वेधयि
तुं व्यवस्थिताः ते देशाधिपा देशस्य वर्णादिपंचकं वेधयंति देश
पतिं च देशनामराशिपतिं वेधयंति तत्र वेधे समुत्पन्ने वेध
कर्तारो देशाधिपस्य किं सुहृदः शत्रवो वा मध्या उदासीना वा
इति प्रयत्नो विचारणीयाः ॥ ८८ ॥ अस्मिन्सति किं कर्तव्यमाह ॥
स्वमित्र सममिति यदि देशमंडलग्रामाधिपतयः स्वाधिपते
यो भवंति देशपतिवेधकर्ता यदि देशाधिपतिर्भवति स चेच्छुभ

अर्द्धं समग्रहे ज्ञेयं पादं शत्रुग्रहस्थिते ॥ गैरराशिकवशा
त्तेयं अंतरेतु वलं वुधैः ॥ ८७॥ एवं देशाधिनाथा ये ग्र
हवेधे व्यवस्थिताः॥ सुहृदः शत्रवो मध्यास्ति तनीयाः प्र
यत्नतः ॥ ८८ ॥ स्वमित्र सम शत्रूणां वेधे देशादिषु क्र
मात्॥ शुभग्रहः शुभं कुर्ते चतुस्त्रिद्व्येकपादकैः॥ ८९॥
स्वमित्र सम शत्रूणां वेधे देशादिषु क्रमात्॥ दुष्टं दुष्ट
ग्रहः कुर्यादेक द्वि त्रि चतुः पदैः॥ ९०॥ विद्धं पूर्ण
दृशा पश्येत्स्थानादेन फलं ग्रहः॥ विदधात्यन्य
थ्या ज्ञेयं फलं दृष्ट्यानुमानतः॥ ९१॥ ॥

तदा चतुर्भिः पादैः शुभं देशस्य धत्ते मित्रश्चेत्तदा त्रिचरणेन शुभं ध
त्ते शत्रुश्चेत्तदा एकेन पादेन एवं वर्णमासदिनानां शुभग्रहवलवि
चारेण शुभं तथा धातुमूलजीवाधिपविचारेण स्वमित्रादिविचा
रेण चतुस्त्रिद्व्येकपादैः शुभग्रहस्य वेधात् शुभं कल्पयेत् ८९
अथ क्रूरवेधविचारमाह स्वमित्र समेति क्रूरग्रहस्य विचारो यथै
